CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BASAVADATTA

पुस्तक मिट्…
वाल्मीकि …
केनापि न चोरणीयम्

वाल्मीकि शर्मा पौडेल

वाह्य वस्तवः न्यतिक …

दर्ता ४४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible] १५०२, सन् ४०
द्वितीय खिंड

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
वे. २२८

'Master' Manimala series No. 109(Karma Kanda Sec. 27)

THE

GRIHYASUTRA

OF

MAHARSHI PARASKARACHARYA.

EDITED WITH THE 'VIVRITI'

BY

Shri Veniram sharma

AND FOOTNOTES

BY

SHRI VIDYADHAR SHARMA,

Head of the Department of the Dharmashastra

At the Oriental College of Learning and Theology,

BENARES HINDU UNIVERSITY,

BENARES.

PUBLISHED BY

Master Khelari Lal & Sons.,

SANSKRIT BOOK DÈPOT

Kachauri Gali, Benares City.

PRICE Re 1 As. 8

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[All rights reserved by the publisher.]

Publisher:—
J. N. Yadava Proprietor, Master Khelarilal & Sons,
Sanskrit Book Depot, Kachauri Gali,
Benares City.

Printer:—
M. L. Abhimanyu M. A.,
Master Printing Works, Bulanala,
Benares City.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'मास्टर' मणिमालायाः १०९ मणिः (कर्मकाण्डविभागे २७)

॥ श्रीः ॥

श्रीमन्महर्षिपारस्कराचार्यविरचितम्

गृह्यसूत्रम् ।

[माध्यन्दिनशाखीयम्]

श्रीवेणीरामशर्मकृत-

विवृतियुतम् ।

काशीहिन्दूविश्वविद्यालयीय-धर्मविज्ञानविभागाध्यक्षेण

श्री विद्याधरशर्मणा

टिप्पण्यादिना संयोज्य

संस्कृतम् ।

-:०:-

तच्च

काशीस्थ 'संस्कृत बुकडिपो' इत्यस्याधिपैः

मास्टर खेलाड़ीलाल ऐण्ड सन्स इत्येतैः

'मास्टर प्रिण्टिङ्ग वर्क्स' नाम्नि

मुद्रणागारे मुद्रापयित्वा

प्रकाशितम् ।

मूल्यम् १॥)

880

११-डी आ.

६ ग्रा.

संस्कृत पुस्तकालय बनारस सिटी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[All rights reserved by the publisher.]

Publisher:—
J. N. Yadava Proprietor, Master Khelarilal & Sons,
Sanskrit Book Depot, Kachauri Gali,
Benares City.

Printer:—
M. L. Abhimanyu M. A.,
Master Printing Works, Bulanala,
Benares City.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'मास्टर' मणिमालायाः १०९ मणिः (कर्मकाण्डविभागे २७)

॥ श्रीः ॥

श्रीमन्महर्षिपारस्कराचार्यविरचितम्

गृह्यसूत्रम् ॥

[माध्यन्दिनशाखीयम्]

श्रीवेणीरामशर्मकृत-

विवृतियुतम् ।

काशीहिन्दूविश्वविद्यालयीय-धर्मविज्ञानविभागाध्यक्षेण

श्री विद्याधरशर्मणा

टिप्पण्यादिना संयोज्य

संस्कृतम् ।

-:o:-

तच्च

काशीस्थ 'संस्कृत बुकडिपो' इत्यस्याधिपैः

मास्टर खेलाड़ीलाल ऐण्ड सन्स इत्येतैः

'मास्टर प्रिण्टिङ्ग वर्क्स' नाम्नि

मुद्रणागारे मुद्रापयित्वा

प्रकाशितम् ।

मूल्यम् १॥)

संस्कृत पुस्तकालय बनारस सिटी

880

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

294.5921
PAR

शाखा—
मास्टर खेलाड़ीलाल ऐण्ड सन्स
संस्कृत बुक डिपो,
मुरादपुर-बाँकीपुर,
पटना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

MAHENDRA SANSKRIT UNIVERSITY
...विद्यापीठ-पुस्तक...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री विद्याधर शास्त्री, गौड़।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पणम्

आबाल्याच्छुकशावका इव वयं यैः स्नेहतोऽध्यापिताः ।
येषामेव कृपाऽधुना बलवती मल्लेखनीमाश्रिता ॥
वेदज्ञेषु विदांवरेष्वनुपमं येषां सदैवास्पदं ।
तान् विद्याधरशास्त्रिपूज्यचरणान् तातान् प्रणौम्यादरात्॥१॥

तैरेव कारिता सेयं तदीयतनुजन्मना ।
विवृतिस्तत्पदाम्भोजे सादरश्रद्धमर्प्यते ॥२॥

680

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेद· ११८

सम्पादकीयम् ।

इदमिदानीं महर्षिपारस्करनिर्मितं काण्वमाध्यन्दिनशाखीयं गृह्यसूत्रं लघ्व्या सरलया नातिविस्तृतया वृत्त्या टिप्पण्या च संयोज्य प्रकाशं प्राप्यते ।

जातस्य हि त्रैवर्णिकस्य तत्तत्कर्मस्वधिकारः ऐहिकामुष्मिकफलभोक्तृत्वं वा संस्कारैरेव भवति । यथा हि उत्पन्नमात्रं यत्किंचिदपि वस्तु केन चित्संस्कारविशेषेण संस्कृतं कस्मै चित्कार्यायासमर्थमेव भवति, तदपेक्षितयावत्संस्कारसंस्कृतमेव कार्यसमर्थं भवति, इति तु लोकप्रसिद्धम् । एवमेव पुरुषः संस्कारैः संस्कृतः सन् तत्तत्कर्मस्वधिकारी भवति । अत एव च सर्वे स्मृतिकारा गृह्यकर्तारश्च महर्षयः संस्कारान् तत्तद्धर्मौचितान् प्राधान्येन विदधति । तदभावे सर्वकर्मानर्हतां च ब्रुवते । यथा च आकरजातमत्युत्तममपि रत्नं शाणोल्लेखादिना यथावदसंस्कृतं सत् न स्वकार्याय प्रभवति तद्वदेवायं पुरुषः स्वीयैः संस्कारैरसंस्कृतो न कस्मै चित्कार्याय प्रकल्पते । अतो जातमात्रस्य त्रैवर्णिकस्य संस्कारोऽत्यावश्यकः । तद्विधायकोऽयं ग्रन्थः । वाल्मीकि शर्मा

यद्यप्ययं ग्रन्थो बहुभिर्बहुत्र भर्तृयज्ञ-कर्क-जयराम-हरिहर-मुरारिमिश्र-गदाधर-विश्वनाथ-गणपतिप्रभृतिभिर्व्याख्यातृभिर्व्याख्यातः तथापि तेषु महत्सु गभीरेषु च ग्रन्थेषु अवगाहितुं तत्र निगूढान्यर्थरत्नानि यथावदुपलब्धुं चाशक्नुवाना अत एव च कारणात् सूत्रार्थमपि यथावदवबोद्धुमसमर्थास्तत्कृते चातिक्लिश्यन्ति ये छात्रास्तेषां कृते मदीयोऽयमत्र लेखनीव्यापारः ।

अत्र च पाठका जानीयुरेव प्रसिद्धैरथ चातिसरलैरेव पदैः सूत्रार्थविवरणे कियान् यत्नो मया कृत इति ।

किञ्च पूर्वोक्त-कर्कप्रभृतीनां प्राचीनानां महर्षिकल्पानां सूत्रार्थविवरणे मन्त्रार्थकथने च या रीतिरवलम्बिता तां मनागप्यनुल्लङ्घ्यैव तत्रैव पथि गच्छन्नहं प्रायशस्तान्येवाक्षराण्युपादाय सूत्रार्थविवरणं मन्त्रपदार्थप्रकाशनं च वृत्तौ टिप्पण्यां चाकरवम् । क्वचित् क्वचित् सन्दिग्धस्थले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पण्यपि कृता । अत्र च सूत्रग्रन्थमध्ये "अथर्तुमतीं जायामधिगच्छेत् । अथ गर्भाधानम्, अथातो मूलविधिं व्याख्यास्यामः, अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामः, अथ कर्णवेधः, अथातो मुण्डो जटिलः, अथातो धर्मजिज्ञासा" इत्यष्टौ कण्डिकाः केवलं मूलपुस्तकेषू-पलभ्यन्ते । तासामुभयतः कोष्ठकरणेन च ताः क्षेपिका इति तत एवा-गम्यते । भाष्यकारैः कैरपि तासामुल्लेखो व्याख्यानं वा क्वचिदपि ना-कारि । अतस्ता मूलाद्बहिर्भूता इति कृत्वा मूलसूत्रग्रन्थस्वरूपविघटनभिया न सूत्रमध्ये निवेशिताः । परं तासामपि स्वरूपज्ञानार्थं कैश्चिदपि व्याख्या-तृभिरव्याख्यातत्वेऽपि मया गच्छतीं व्याख्यां कृत्वा ग्रन्थान्ते निवेशिताः ।

एवं मया अस्मत्प्रियसुहृदां छात्रावर्याणां सर्वप्रकारमत्र सौकर्यमा-धित्सता ग्रन्थोऽयं शब्दतोऽर्थतः स्वरूपतश्च लघूकृतः । परं न जाने विषयेऽत्र कियदवधि साफल्यमश्नुवीयेति ।

सावधानेन शोधितेऽपि ग्रन्थे पुरुषदोषेण मदीयप्रथमप्रवृत्त्या मुद्रण-दोषेण च काश्चनाशुद्धयो बिन्दुमात्राक्षरादिषु समवस्थिता एव । तदर्थं चाऽस्मन्मित्रवरान् विशेषतोऽभ्यर्थये अविशेषज्ञं बालककल्पं मामतीव क्षन्तुम् । इतो द्वितीयावृत्तौ सर्वं समीभविष्यति । छात्रसौकर्यमाधित्सतैव च श्रीमता मास्टर खेलाड़ीलालात्मजमहोदयेन कार्येऽत्राहं व्यापारितः । मूल्यमप्यस्याल्पमेव निक्षिप्तम् । अतोऽस्मन्मित्रवरान् सानुनयमभ्यर्थये ग्रन्थमिमं यथावदुपयुज्य मदीयं सम्पादकीयं च परिश्रमं सफलयन्त्विति । अत्र च संशोधनादिकार्ये पं० श्रीचन्द्रधरशर्मा वेदाचार्यो बहूपकृतवान् तमहं सधन्यवादमत्र स्मरन् लेखमुपसंहरामीति—

दीपावली सम्वत् १९९५	विदुषामाश्रवः— **वेणीराम शर्मा गौडः**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपोद्घातः

इदमत्र प्रस्तूयते—यत्किल काण्व-माध्यन्दिनशाखोपयोगि पारस्कर-गृह्यसूत्रं विद्यते। तत्र सूत्र्यते संक्षेपेण कथ्यते च विपुलोऽर्थो यत्र तत्सूत्रम्। तदुक्तम्—

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभ्यमनवद्यं च सूत्रं सूत्रविदो विदुः" इति।

एतल्लक्षणकान्येव सूत्राणि सर्वशाखायां सन्तीति तेभ्योऽन्यदिदमिति बोधयितुं गृह्येति विशेषणम्। गृह्यपदार्थश्च योगरूढः। गृहाय गृहस्थाश्रम-धर्माय हितो गृह्य इति यौगिकः। रूढस्तु खादिरगृह्ये—

"यस्मिन्नग्नौ पाणिं गृह्णीयात्स गृह्यः" (१-५-१) इति।

गृहम्, उपासनम्, आवसथः, इति गृहपर्यायाः। तत्र भव इति व्युत्पत्त्या गृह्यः, औपासनः, आवसथ्यः, इति संज्ञाः स्मार्ताग्नेः। यथाऽस्मिन्नेव पारस्करगृह्ये—

"गृह्यस्थालीपाकानां कर्म (१-१-१), आवसथ्याधानम् (१-२-१), औपासनस्य परिचरणम् (१-८-१)" इति गृहीताः।

तत्र क्रियमाणानां कर्मणामपि गृह्यसंज्ञेति तेषां कर्मणां सङ्क्षेपेण कथनं गृह्यसूत्रम्। तच्च शाखाभेदादनेकमुनिप्रणीततयाऽनेकविधम्। तद्यथा— आपस्तम्बगृह्यम्, आश्वलायनगृह्यम्, गोभिलगृह्यम्, इत्यादि। तेभ्यो व्यावर्तयितुं पारस्कर इति विशेषणम्। पारस्करेण प्रणीतं गृह्यसूत्रं पारस्करगृह्यसूत्रमिति फलितम्।

एतत्सूत्रं माध्यन्दिनकाण्वेतिशाखाद्वयोपयोगीति तच्छाखीयं कर्म एतत्सूत्रोक्तविधिना विधेयम्। अन्यथा प्रत्यवैति। तथा च जाबालिः—

"स्वशाखाविधिमुत्सृज्य संस्कुर्यादन्यशाखया।
प्राजापत्यत्रयं कृत्वा पुनः संस्कारमर्हति" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र स्वशब्देन स्वपुरुषपरम्परा वेदितव्येत्याह वसिष्ठः—

"पारम्पर्यगतो येषां वेदः सपरिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथा" इति ।

अन्यशाखीयकर्मकरणे शाखारण्डत्वमाह यज्ञपार्श्वः—

"स्वशाखां यः परित्यज्य परशाखां समाश्रयेत् ।
शाखारण्डः स विज्ञेयः सर्वकर्मवहिष्कृतः" इति ।

एवं च स्वशाखोक्तकर्मणामेव प्राधान्यमिति प्रतीयते । तानि च कर्माणि तत्तच्छाखाभिनिवेशिभिर्महर्षिभिः सूत्रेषूपनिबद्धानि । ऋषयश्च मन्त्रद्रष्टारः । ते च मनांसि समाधाय स्वशाखाभिवृद्धये स्वपरम्पराप्राप्तकर्मणामनवच्छेदाय भाविप्रजाकर्माभ्युदयाय च गृह्यसूत्राणि रचयामासुः ।

तत्र यथा गोभिलादयः स्वनामाङ्कितानि गृह्यसूत्राणि सूत्रयामासुस्तथा भगवान् पारस्करोऽपि माध्यन्दिनशाखाध्यायी स्वनामाङ्कितं गृह्यसूत्रं रचयामास ।

धार्मिकं विषयमवलम्ब्य सूत्राणि रचयितुं प्रवृत्ताः सूत्रकाराः श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्रात्मना त्रिविधानि सूत्राण्यरीरिचन् । तत्र वेदोक्तानां त्रेतासाध्यानां कर्मणामनुष्ठानबोधकानि श्रौतसूत्राणि । जातकर्मादिसंस्कारकर्मणामेकाग्निसाध्यानां कर्मणां प्रतिपादको ग्रन्थो गृह्यसूत्रम् । साधारणवर्णाश्रमधर्मप्रतिपादको ग्रन्थो धर्मसूत्रम् । तत्र श्रौतसूत्राणि गृह्यसूत्राणि धर्मसूत्राणि च त्रीण्यपि बौधायनापस्तम्ब-मानवैरारचितानि । वसिष्ठगौतमाभ्यां धर्मसूत्राण्येव रचितानि । आश्वलायन-शाङ्खायन-हिरण्यकेशिभिः श्रौतसूत्राणि गृह्यसूत्राणि च रचितानि । कात्यायनेन तु श्रौतसूत्रमेव केवलं रचितम् । पारस्करेणैकं गृह्यसूत्रमेवेति ।

तत्र गृह्यान्तरेषु क्वचिद् विवाहस्य क्वचिज्जातकर्मणः क्वचिदुपनयनस्य क्वचिदन्यस्यैव संस्कारस्य प्राथम्यम् । अत्र तु विवाहस्यैव प्राथम्येनोपन्यासः ।

यतः—सर्वे संस्काराः प्राक्तनसंस्कारापेक्षा इति निरपेक्षतया तावदुपनयनसंस्कारस्य प्राथम्येन विधानं नोपन्यसितुं शक्यते, तत्पूर्वभाविना जातकर्मादिना सापेक्षत्वात् । जातकर्मादि-संस्कारव्यतिरेकेणोपनयनेऽनधिकारात् । एवं जातकर्मणोऽपि प्राथम्यं निगदितुमयुक्तम्, पुत्रोत्पत्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्तरा तदनौचित्यात् । विवाहविधिं विना तादृशपुत्रोत्पत्तेरसंभवात् । एवं च विवाहविधेरेव अग्रतयाऽभिधानं संभवति ।

नन्वत्र 'अथातो गृह्यस्थालीपाकानां कर्मेति' प्रथमकण्डिकया अग्निमुखविधानमग्रतया न विवाहस्येति न शङ्कनीयम् । तस्य सर्वहवनकर्मसाधारणत्वेन विवाहादिषु सर्वत्रोपयोगात् । ततो द्वितीयकण्डिकया आवसथ्याधानविधानं तु माध्यन्दिनानां न वैवाहिकोऽग्निरावसथ्याग्निः, किन्तु वैवाहिकाग्नेः पृथगिति बोधयितुम् । आश्वलायनादयो हि वैवाहिकमेव होमं दाराग्न्योः संस्कारकं मन्यन्ते । अस्माकं तु माध्यदिनानाम्— 'आवसथ्याधानं दारकाले' इत्यादिना आवसथ्याधानस्य विवाहतोऽपि पूर्वं पृथगभिधानादेतत्संस्कारसंस्कृतोऽग्निरावसथ्यो न तु वैवाहिक इति । एवं च संस्कारेषु विवाहस्यैवाग्रतयाऽभिधानं पारस्कराचार्यैः कृतम् ।

सर्वाणि गृह्यसूत्राणि शाखावलम्बीनि । शाखाश्च—"एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽऽथर्वणो वेदः" इति महाभाष्ये पतञ्जलिमहर्षिणा परिगणिताः। शाखाशब्दो न वेदावयववाची, सर्वासामपि शाखानां शाखान्तरनैरपेक्ष्येण यावदपेक्षितार्थावबोधकत्वात् । अतः शाखाशब्देन एकैका संहिता (एकैको भागः) उच्यते । अतो यावत्यो वेदसंहितास्तावत्यः शाखाः । एवं चाध्ययनाध्यापनेन शाखाभेदः संजात इत्यस्याप्रामाण्यमिति विस्तरशो द्रष्टव्यं मत्कृतकात्यायनश्रौतसूत्रभूमिकायाम् ।

तत्र शाकल-वाष्कलयोः शाखयोः स्वाध्यायो यत्किंचिद् भिद्यते । गृह्यसूत्रं त्वाश्वलायनीयं शाङ्खायनीयं चेति द्वयमुपलभ्यते । शुक्लयजुर्वेदे काण्व-माध्यन्दिनशाखयोरध्ययनभेदेऽपि पारस्करगृह्यमेकमेव । सूत्रमिदं शाखाद्वयमधिकृत्य प्रवृत्तम् । यतः सूत्राणामयं नियमो यद् यामेकां शाखामवलम्ब्य तानि प्रवर्तन्ते तदा तत्रत्यान् मन्त्रान् प्रतीकमात्रं गृहीत्वा विनियुञ्जते । शाखान्तरस्थानां सत्यावश्यके विनियोगप्रसङ्गे समग्रं मन्त्रं पठित्वैव विनियुञ्जते । अत्र तु सूत्रे काण्वशाखीया अपि "मित्रस्य त्वा" (पार. गृ. १. ३.) इत्यादयो मंत्राः प्रतीकमात्रेण विनियुक्ताः । अतो न एकामेव माध्यन्दिनीयशाखामेकान्ततोऽवलम्ब्यते सूत्रमिदम्, किन्तु कण्वशाखामपीति स्पष्टमवगम्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं कात्यायनश्रौतसूत्रमपि शाखाद्वयमधिकृत्य प्रवृत्तमिति कात्यायनश्रौतसूत्रकर्कभाष्ये [२. १. १] स्पष्टम्। तैत्तिरीयशाखायाः समानपाठायाः अपि बौधायनापस्तम्ब-हिरण्यकेशि-भारद्वाज-मानव-वैखानस-कठगृह्यसूत्राणि।

सामवेदस्य राणायनीय-जैमिनीय-कौथुमेति शाखात्रयमेव। गोभिलम् हिरण्यकेशीम्, जैमिनीयम्, द्राह्यायणीयम्, खादिरम्, वाराहमिति गृह्यसूत्राणि।

अथर्ववेदस्य तु-एकं गृह्यसूत्रं कौशिकाभिधं समुपलभ्यते। तत्राऽऽश्वालयनगृह्यसूत्रप्रतिपाद्या विषयाः—

अग्निमुखम्, विवाहः, नित्यहोमः, स्थालीपाकः, गर्भाधानाद्युपनयनान्तम्, मधुपर्कः, श्रवणा, आश्वयुजी, स्रस्तरारोहणम्, अष्टका, रथारोहणादि, वास्तुकर्म, पञ्च महायज्ञाः, उपाकर्मोत्सर्गौ, नैमित्तिकानि, समावर्तनम्, आयुधधारणमन्त्राः, और्ध्वदेहिकम्, श्राद्धम्, शूलगव इति। अत्र अध्यायशः खण्डशश्च विभागः।

शाङ्खायनगृह्यसूत्रे— चतुर्थीकर्म, वृषोत्सर्गः, आभ्युदयिकम्, चैत्रीकर्म-प्रवासविधिः, वापीतडागोत्सर्गः, शान्तयश्चेति ततो विशेषः।

द्राह्यायणसूत्रे— परिभाषा-पाकयज्ञ-विवाह-गर्भाधानाद्युपनयनान्तोपाकर्म-आश्वयुजी-स्रस्तरारोहण-अष्टका-और्ध्वदेहिक-मधुपर्का विषयाः। अत्र पटलैः खण्डैश्च विभागः।

गोभिलगृह्ये प्रतिपाद्या विषयाः—परिभाषा, अग्न्याधानम्, वैश्वदेवः, स्थालीपाकः, विवाहः, चतुर्थीकर्म, गर्भाधानाद्युपनयनान्तम्, उपाकर्म, गोपालनविधिः, श्रवणा, आश्वयुजी, नवान्नम्, अष्टका, पिण्डपितृयज्ञः, कम्यानि, वास्तुयज्ञः, मधुपर्क इति। अत्र प्रपाठकैर्विभागः।

जैमिनिगृह्ये—पाकयज्ञ-पुंसवनाद्युपनयनान्त-नान्दीश्राद्ध-विवाहोपाकर्म-नित्यहोम-सन्ध्या-वैश्वदेवादिः। अद्भुतशान्तयः, ग्रहशान्त्यादयश्चेति। अत्र पटलैः खण्डैश्च विभागः।

हिरण्यकेशिगृह्ये—उपनयनादि—विवाहान्तम्, शालाकर्म, शूलगवः, नवान्नम्, मासिश्राद्धम्, अष्टका, श्रवणा, आग्रहायणी, उपाकर्मादिरिति। अत्र प्रश्नैः पटलैश्चविभागः।

खादिरगृह्ये—विवाहादयः, नित्यहोमः, वैश्वदेवः, स्थालीपाकः, उपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मादिः, आश्वयुजी, आग्रहायणी, अष्टकाः, पौष्टिककर्माणीति । अत्रापि पटलैर्विभागः ।

मानवगृह्ये—उपनयनम्, सन्ध्या, उपकर्मोत्सर्गौ, विवाहः, गर्भाधानादिः, दीक्षा, और्ध्वदेहिकम्, नित्यहोमस्थालीपाकौ । आश्वयुज्याग्रहायणी नवान्न-पशुयाग-स्रस्तराष्टका-लाङ्गलयोजन-गृहप्रवेश-वैश्वदेव-षष्ठीकल्प-विनायकादिशान्तय इति । अत्र पुरुषैः खण्डैश्च विभागः ।

काठकगृह्ये—गर्भाधानादिः, गृहशान्तिः, लाङ्गल-श्राद्धाष्टका-शूल-गव-वैश्वदेव-श्रवणादि-फाल्गुनीयज्ञ-होलाकर्मादि । अत्राध्यायैर्विभागः ।

आपस्तम्बगृह्ये-गर्भाधानादिः, स्थालीपाकः, उपाकर्मादिः, शालाकर्म-सर्पबलीशानबलि-नवान्न-मासिश्राद्धाष्टकादिः । अत्राष्टौ पटलास्त्रयो विंशतिः खण्डानि ।

बौधायनगृह्यप्रतिपाद्या विषयाः—विवाहः-गर्भाधानादि-समावर्तनान्तम्, वैश्वदेवहोमः, प्रत्यवरोहणम्, अष्टकाः, अद्भुतशान्तिः, आयुष्यचरुः, उपाकर्मोत्सर्गौ, श्रवणा, आभ्युदयिकम्, नैमित्तिकानि, पशुबन्धप्रतिनिधिः, अग्निमुखम्, पुण्याहदेवताः, कर्णवेधः, उदकशान्तिः, प्रतिसरबन्धः, नवग्रहार्चा, राजाभिषेकः, शताभिषेकविधिः, विष्णु-रुद्र-दुर्गादि-प्रतिष्ठाकल्पः मृत्युञ्जयादि-कल्पः, वृषोत्सर्ग-सहस्रभोजन-जीवश्राद्ध-नारायणबलि-संन्यासाङ्कुरार्पणविधयः, अशनिपातादिशान्तिः, उग्ररथशान्तिः, पितृमेध इति ।

शौनकगृह्यप्रतिपाद्या विषयाः—प्रथमेऽध्याये-अग्निमुखम्, परिभाषा च । द्वितीयेऽध्याये—मेधाकर्म, निर्ऋतिकर्म, राजकर्म, संग्रामविधिः, जयकर्म, परराष्ट्रप्रवेशविधिः, राजाऽभिषेकविधिः । तृतीयेऽध्याये—गोरोगशान्तिः, कृषिकर्म, पौष्टिककर्म । चतुर्थेऽध्याये—भैषज्यानि, पुंसवनम् । पञ्चमेऽध्याये—विज्ञानकर्मविधिः, नैमित्तिककर्माणि, नदीप्रवाहविधिः, वृष्टिकर्मविधिः, प्रवासविधिः, विघ्नशमनम्, पशुविधिः, पापापनोदविधिः । षष्ठेऽध्याये—अभिचारविधिः, स्वस्त्ययनानि, चौलम् । सप्तमेऽध्याये—उपनयनम्, काम्यकर्मविधिः । अष्टमेऽध्याये-पाकयज्ञविधिः । नवमेऽध्याये-आवसथ्याऽऽधानम् । दशमेऽध्याये—विवाहः । एकादशेऽध्याये—पितृमेधः । द्वादशेऽध्याये—मधुपर्कः । त्रयोदशेऽध्याये—अद्भुतकर्माणि । चतुर्दशेऽध्याये-वास्तुशान्तिः, अष्टकाः, वेदाध्ययनम्, अनध्यायविधिश्चेति ।

एवं वैखानसवराहादिगृह्येऽपि ज्ञातव्यम् । अत्र पारस्करगृह्ये त्रयः काण्डाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रथमे काण्डे—एकोनविंशतिः, द्वितीये सप्तदश, तृतीये पञ्चदश कण्डिकाः सन्ति ।

तत्र प्रथमकाण्डे—प्रथमकण्डिकायां कुशकण्डिका, द्वितीयस्यामावसथ्याधानम् । तृतीयातोऽष्टमीपर्यन्तं विवाहः, नवम्यां नित्यहोमः । दशम्यां नैमित्तिकम् । एकादश्यां चतुर्थी, द्वादश्यां पत्न्यादिः, गर्भाधानं च । त्रयोदश्यां गर्भौषधौ, चतुर्दशीपञ्चदशीषोडशीषु क्रमेण पुंसवन–सीमन्त-जातकर्माणि, सप्तदश्यां नामकरण-निष्क्रमौ, अष्टादश्यां प्रवासागतविधिः, एकोनविंशत्यामन्नप्राशनम् ,इति ।

द्वितीयकाण्डे—प्रथमायां चौलम्, ततोऽष्टम्यन्तमुपनयनम्, ततो नवम्यां पञ्च महायज्ञाः, दशम्यामुपाकर्म, एकादश्यामनध्यायाः, द्वादश्यामुत्सर्जनम्, त्रयोदश्यां लाङ्गलकर्म, चतुर्दश्यां श्रवणाकर्म, पञ्चदशीतस्तिसृषु क्रमेण इन्द्रयज्ञ-पृषातका-सीतायज्ञाः ।

तृतीये—प्रथमायां नवान्नम्, द्वितीयस्यामाग्रहायणी, स्रस्तरारोहणं च । तृतीयस्यामष्टका, चतुर्थ्यां शालाकर्म, पञ्चम्यां मणिकावधानम्, षष्ठ्यां शिरोरोगौषधम्, सप्तम्यां दासवशीकरणम्, ततोऽष्टमीप्रभृति-चतसृषु शूलगव-वृषोत्सर्गौर्ध्वदैहिकपशुयागाः क्रमेण । द्वादश्यामवकीर्णिव्रतम्, त्रयोदश्यां सभाप्रवेशनम्, चतुर्दश्यां पञ्चदश्यां च रथारोहणादि, अध्ययनविधिश्चेति ।

सूत्रमिदं शाखाद्वयमवलम्ब्य प्रवृत्तमित्येकः सूत्रान्तरेभ्यो विशेषः । एवमेव गृह्यान्तरेऽनुपलभ्यमाना मणिकावधानशिरोरोगौषधदासवशीकरणादयो विषया अत्र सन्तीति द्वितीयो विशेषः । सूत्राणां तदीयमन्त्राणां चोच्चारणं तु "छन्दोवत्सूत्राणि"(प्र०प०) इति शासनात् तत्तच्छाखानुसारेण कार्यम् । तेन पारस्करगृह्यसूत्राणां तदीयमन्त्राणां चोच्चारणे—रेफहकाराभ्यां संयुक्तस्य वर्णान्तरेणाऽसंयुक्तस्य पदादिस्थयकारस्य, रय्या इत्यादौ द्वित्वयकारस्य च सर्वत्र जकारोच्चारणं कर्तव्यम् । उपसर्गपरस्य यकारस्य तु न जकारोच्चारणम् । एवं वेदेऽपि "न यत्, (२०।८१) वि यत्, (१२।३४) स योजते" इत्यादौ, तथा "यजुषे यजुषे" इत्यादावाम्रेडितेऽपि न जकारोच्चारणं विशेषविधानात् । "अनु योज, अभि यज्ञम्" इत्यादौ तु उपसर्गपरस्यापि पदादियकारस्य जकारोच्चारणं भवति विशेषविधानात् ।

एवं पदादिस्थवकारस्य सर्वत्र द्वित्वोच्चारणम् । वा वाम्, वः वै. एषु न द्वित्ववकारोच्चारणं भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेफस्य असंयुक्तान्यहला ऊष्मणा ऋकारेण च संयुक्तस्य सर्वत्र रेकारोच्चारणं भवति।

एवमृकारस्यापि सर्वत्र रेकारोच्चारणम्। तथा लकारस्यापि ऊष्मणा संयुक्तस्य लेकारोच्चारणम्। षकारस्य टवर्गं विना सर्वत्र खकारोच्चारणम्। अनुस्वारस्य दीर्घात्परस्य ह्रस्वगुंकारोच्चारणम्। ह्रस्वात्परस्य तु दीर्घगूंकारोच्चारणम्। 'देवानाꣳ ह्रदयेभ्य' इत्यत्र दीर्घगूकारः। एवं संयोगे परेऽपि ह्रस्वात्परस्यापि अनुस्वारस्य न दीर्घगूंकारोच्चारणम्।

अत्र केचित् गुं गूं इत्यनयोः स्थाने ग्वम् इति पठन्ति तन्न समीचीनम्। तथाऽविधानात्। प्रतिज्ञापरिशिष्टे गुम् इत्याकारिकाया आनुपूर्व्याः स्पष्टमुल्लेखाच्च। ग्वम् इत्युच्चारणे ह्रस्वदीर्घयोः स्पष्टतया भेदोऽपि न स्यात्।

एवं "गर्भधम्, सहस्रपात्, रश्मीन्" इत्यादौ अर्धमात्रिक-मकाराद्युच्चारणानन्तरं द्वयोरोष्ठयोर्विश्लेषं कृत्वा तादृशस्यैव मकारादेरुच्चारणे ऋगन्तादिनियमेन मात्रात्रयादिविरामेऽर्द्धमात्रिको मकारादिः सस्वर इवोच्चरितः प्रतीयते न तु वस्तुतस्तत्र समाचरो मकारादिर्ज्ञेयः। अवसानगतमकारादीनुच्चार्य तत ओष्ठविश्लेषः कर्तव्य इत्यत्र प्रमाणं तु—

"अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये।
द्विरोष्ठ्यौ तु विगृह्णीयात् ॥"

इति पाणिनीयशिक्षा।

एवं निर्ऋतिरित्यत्र रेफऋकारयोर्योगे स्वरभक्तिप्रयोगो भवति न वेति विचारे याज्ञवल्क्यशिक्षायां—

"करिणी कुर्विणी चैव हरिणी हरिता तथा।
तथा हंसपदा चैव पञ्चैताः स्वरभक्तयः ॥"

इत्यादिना पञ्चानामेव स्वरभक्तीनां विधानात् तत्र चास्यानन्तर्भावात् दक्षिणात्यसम्प्रदाये स्वरभक्तिपाठाभावाच्च तत्र स्वरभक्तिर्नास्तीति केचित्कथयन्ति। परन्तु वयं मन्यामहे तत्रापि स्वरभक्तिप्रयोगः शास्त्रीय एव। यद्यपि शिक्षायां नोक्तं तथापि—"अथापरान्तस्य रेफोष्मऋकारे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेकार सहितोच्चारणम्" इति कात्यायनपरिशिष्टे प्रतिज्ञासूत्रे निऋ- तिरित्यादावपि स्वरभक्तेर्विधानात् । न चैवं वाच्यम् ? याज्ञवल्क्यशिक्षाया मन्त्रमात्रविषयकत्वेन तद्विषये तस्या एव प्राबल्यात्, प्रतिज्ञासूत्रं च ब्राह्मण- विषयकमिति, तथा कथने प्रमाणाभावात् । प्रत्युत तत्रैव "माध्यन्दिनी- यके मन्त्रे स्वरप्रक्रिया,, इत्येवोपक्रमात् तस्य च "ये मन्त्रा इषे त्वादि खम्ब्रह्मान्तास्तेषु" इत्यनन्तव्याख्यानात् प्रतिज्ञासूत्रस्यापि मन्त्रविषय- त्वस्य स्पष्टतोऽवगमात् । एवं "चानुक्तमविरोध्यन्यतो ग्राह्यम्" इति न्यायेन प्रतिज्ञासूत्रानुसारेण षष्ठ्यपि स्वरभक्तिरवश्यं स्वीकार्येति प्रतीयते । शिक्षास्थं पञ्चपदं तु उपलक्षणतया नेयम् । यथैव हि प्रातिशाख्येऽनुक्ता- नपि विषयानविरोधिनः शिक्षादितः स्वीकुर्मस्तथैव शिक्षानुक्तस्यापि परि- शिष्टतः स्वीकरणे न कश्चिद्दोषः । अत एव विकल्पमन्तरा पञ्चानामिव षष्ठ्यपि स्वरभक्तिः प्रतिज्ञासूत्रबलान्नियमेन प्राप्नोति । न च सम्प्रदाय- विरोधः, गौडीयसम्प्रदायेऽत्रापि स्वरभक्तिप्रयोगस्य नियमेन दर्शनात् । अतो वेदे पाठभेदस्यानुचितत्वात्प्रमाणसिद्धोऽयं निऋ तिरित्यादौ स्वरभक्तिपाठ एकरूपेण सर्वैरेव कर्तव्य इति प्रतिभाति । एवं यज्ञ इत्या- दावपि एकरूपपाठेनैव भाव्यमिति ।

गृह्यसूत्रविहितानि कर्माणि यद्यपि गृह्येऽग्नौ प्राप्नुवन्ति—

"कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु ॥"
"पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही ।"

इति वचनात्, तथापि—

"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् ।
स्वगर्भसत्क्रियार्थाश्च यावन्नाऽसौ प्रजायते ॥"

इत्यादि—वचनात् "पञ्चसु वहिः शालायां विवाहे चूडाकरणे उपनयने केशान्ते सीमन्तोन्नयने उपलिप्त उद्धतावोक्षितेऽग्निमुप- समाधाय" (पार. १. ४. २.) इति पञ्चसु वहिःशालाविधानसाम- र्थ्यात् आवसथ्य इत्यन्वर्थसंज्ञाकरणेन च विना वचनमावसथ्याग्नेर्वहिः प्रणयनाभावादावसथ्याग्निमतोऽपि सीमन्तादयः संस्काराः सर्वाणि शान्तिक-पौष्टिक-कर्माणि च लौकिकेऽग्नावेव भवन्ति न स्मार्तेऽग्नौ । उपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मणि शिष्यकर्तृका उदुम्बरसमिदाहुतिस्तु "भुक्त्वैकां समिदाहुतिम्" इति वचनबलादावसथ्येऽग्नौ भवति। एवं चाऽऽवसथ्याग्निमतो नित्यहोमः, पक्षादिकर्म, पञ्च महायज्ञाः, सप्त पाकयज्ञसंस्थाः, पित्रोर्मरणे सपिण्डनेऽग्नौकरणम्, पार्वणादावग्नौकरणं च गृह्येऽग्नौ भवन्ति। अनावस्थ्याग्नेः पञ्चमहायज्ञाः अग्नौकरणम् उपाकर्महोमो लौकिकाग्नौ भवति। सप्तपाकयज्ञसंस्थासु पिण्डयज्ञे च नैवाधिकारो निरग्नेः। सप्तपाकयज्ञसंस्था अपि न प्रतिसंवत्सरमनुष्ठेयाः किन्तु एकदा सकृदेव तासामनुष्ठानम्। पाकयज्ञानां गृह्याग्नेश्च सर्वेषु सूत्रेषु ऐतरेयब्राह्मणे (८. १०. ६. ३, ४० २) शतपथ ब्राह्मणे (१२. ३. ५. ५. १. ४. २. १०) तैत्तिरीय संहितायां (५. ५. ६. २) च निर्देशोऽस्ति। एवं विवाहस्य ऋग्वेदे (१०, ८५) उपनयनस्य (११. ५) अथर्ववेदे शतपथे च (११. ५. ४) और्ध्वदेहिकविधेः अथर्ववेदे (१०. १४. १६) पञ्चमहायज्ञानां च शतपथे (११. ५. ६. १) निर्देशोऽस्ति।

तत्रादौ प्रथमकण्डिकायां कुशकण्डिका (अग्निमुख) विधिः। 'एष एव विधिर्यत्र कचिद्धोमः' इति सूत्रादयं कुशकण्डिकाविधिः गार्ह्ये, स्मार्ते, तान्त्रिके, लौकिके च हवनकर्मणि सर्वत्रावश्यकः। यत्र तु 'उपयमनप्रभृत्यौपासनस्य परिचरणम्' (१।८।१) अत्र समिदाधानम् (२।४।१) 'अनादिष्टानि ब्रह्मा जुहुयात्' (का० श्रौ० सू २५) इत्यादौ विशेषविधिः, तत्र उपयमनकुशादानप्रभृतीनामेव यावदुक्तानां कर्मणामनुष्ठानम्, न सकलकुशकण्डिकायाः। एवम्—पञ्चमहायज्ञेऽपि स्वाहाकारेण होमे प्राप्तेऽपि पुनः 'स्वाहाकारैर्जुहुयात्' इति सूत्रणात् कुशकण्डिकाव्युदासः। अतश्च सर्वत्र शान्तिके पौष्टिके कर्मणि प्रायश्चित्तादौ च कुशकण्डिकाऽनुष्ठातव्यैव। श्रौतेषु कर्मसु तु श्रौतसूत्रोक्ता समन्त्रिका कुशकण्डिका भवति। पञ्च भूसंस्कारास्तु अत्र विहिताः श्रौतेष्वपि कर्मसु प्रवर्तन्त इति।

ततो द्वितीयस्यां कण्डिकायां स्मार्ताऽग्निस्थापनविधानम्। स्मार्त्ताऽग्निश्च—वैवाहिकचतुर्थीहोमानन्तरं वा पितृधनविभागकाले वा पितुरेकादशाहे वा आधातव्यः। कालत्रयेऽप्यकरणे प्रायश्चित्तं कृत्वाऽऽधेयः। प्रायश्चित्तं तु प्रतिवर्षं चान्द्रायणं प्राजापत्यं वा, वर्षसंख्यया चतुर्विंशतिसेटकमित-यवस्य तण्डुलस्य वा, त्रिसेटकमितघृतस्य च दानं च। स्मार्ताधानानन्तरमेव श्रौताधानं भवति इत्यपि बोध्यम्।

ततो विवाहः—विवाहश्च कन्यापित्रादिना कन्यादाने कृते ताम्प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विगृह्य स्वीयामापाद्य पाणिग्रहणादि-होमसंस्कारैः सत्वसम्पादनमेव । अयं च स्त्रीपुरुषयोरुभयोः संस्कारः अग्निहोत्रादिकर्माऽनुष्ठानाऽऽधायकः । अविवाहिता स्त्री पुरुषो वा क्वचित् श्रौते स्मार्ते वा कर्मणि नाधिक्रियते । अतो विवाहो नित्यः । द्वितीयादि-विवाहस्तु पुरुषस्य काम्यः । स्त्रियस्तु नास्त्येव । एवमन्तर्जातीयविवाहोऽपि अनापदि नानुष्ठेयः द्व्यामुष्यायण-विवाहे गोत्रद्वयोच्चारणं कर्तव्यम् । तत्र गौतमशाण्डिल्यगोत्रः गोत्रद्वयप्रवर इति वाक्यम् । "शौङ्गिशैशिरयोर्थथा" इति वचनात् ।

तत औपासनहोमः--स च सपत्नीकेन पुरुषेण यावज्जीवं मनुष्ठेयः ।

दशम्यां चतुर्थीकर्म—इदं च अवश्यमनुष्ठेयम् । एतद्विना भार्यात्व-स्यैवानुपपत्तेः । चतुर्थ्यां रात्रावापदादिना सर्वथा करणाऽशक्तौ कर्मलो-पापेक्षया विवाहदिनेऽप्येतदनुष्ठानं शोभनमिति सप्रमाणं द्रष्टव्यम् विवाह-पद्धति-परिशिष्टे ।

ततः पक्षादिः—अयं च प्रतिप्रतिपत् क्रियते । तत्राऽपि चतुर्दश्यामप-राह्णेऽमालाभे तद्दिने पिण्डपितृयज्ञमनुष्ठाय अमायामेव पक्षादि-कर्म । एवम्-मध्याह्नपर्यन्तं पूर्णिमासमाप्तौ पूर्णिमायामेव तदनुष्ठानम् ।

"अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः" इति वचनात्

एतदनुष्ठानं पञ्चमहायज्ञात्पूर्वं कर्तव्यम् ।

ततो गर्भाधानम्, ततः पुंसवनम्, पुमान् सूयतेऽनेनेति । ततः सीमन्तः । अयं च स्त्रीसंस्कारः । अतश्च प्रथमगर्भे एव क्रियते । गर्भसंस्कार इति कर्क-मते प्रतिगर्भमावृत्तिः । प्रथमपक्षे एवादरः साम्प्रतं लोकस्य ।

ततो जातकर्म । पुत्रे जातेऽयं भवति न कन्याजन्मनि । ततो नामकर-णादि । ततश्चूडाकरणम् । तत्र शिखा स्थापनीयेति बहुऋषिमतम् । तत उप-नयनम् । उपनयनं कुमारस्य वेदाध्ययनार्थं गुरुसमीपे गमनम् । अत्राप्यादौ शिखावर्जं मुण्डनं भवति । अत्र कैश्चित् मुण्डनं न क्रियते केशशोभावि-नाशभिया, तदशास्त्रीयम् । अत्र माध्यन्दिनानां वेदारम्भोऽपि उपनयन-दिने एव भवति समावर्तनं च । इतरशाखिनाम् उपाकर्मदिने वेदारम्भो विहितः । तैस्तत्रैवानुष्ठीयते, उपाकर्मपर्यन्तं तैर्वेदो न पठ्यते । परं तैः समावर्तनं वेदारम्भात्पूर्वमेवानुष्ठीयते तद्युक्तमयुक्तं वेति विचारणीयम् । यतस्तेषां सूत्रे उपाकरणानन्तरं समावर्तनविधिरस्ति । अतस्तैरपि कालापकर्षं कृत्वा यथाकथंचिदुपनयनदिने वेदारम्भं विधायैव समाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्तनं कर्तव्यमिति समीचीनः पन्थाः । ब्रह्मचर्यकरणपक्षे उपनायनाग्नेर्यावद् ब्रह्मचर्यसंरक्षणं तत्रैव च समिदाधानादि कार्यमित्येकः पक्षः । अथवाऽ लौकिकाग्नौ वा समिधानमिति पक्षान्तरम् । अस्मिन् कल्पेऽपि त्रिरात्रमुपनयनाग्निर्धार्य इति बौधायनादयः । सद्यः समावर्तनपक्षेऽपि उपनयनदिने विवाहो न कार्यः, ब्रह्मचर्यस्यान्ततस्त्रिरात्रं यावद्विधानात् । पारस्करगृह्ये उपनयना-(समावर्तना)-नन्तरं त्रिरात्रं स्त्रीदर्शननिषेधाच्च ।

कलौ उपनयनयोग्यक्षत्रियवैश्ययोरभावान्न तयोरुपनयनमिति नागोजिभट्टादयः । सर्वस्मिन् जनपदे अयं ब्राह्मणः, अयं क्षत्रियः, अयं वैश्य इत्यविगीतव्यवहारस्य जातिनिर्णायकस्य विद्यमानत्वात् स्वस्वजात्युचितधर्माचरणरहितानामपि तत्तज्जात्युचितधर्माचरणशीलैः सह भोजनादि-व्यवहारस्य दर्शनात् वणिज इत्याद्यव्यभिचरिताविगीतव्यवहाराच्च अगरवालाः सर्वेऽपि तृतीयवर्णाः प्रायेणोपनयादिसंस्कारभाजः शिष्टैः परिगृहीता भवन्तीति क्षत्रियवैश्ययोरप्युनयनमिति सर्वे । तत्र त्रिपुरुषं पतितसावित्रीका एवोपनयनार्हा न तु दशविंशतिपुरुषपर्यन्तमस्मर्यमाणोपनयना अपीति केचित् । बहुकालतोऽस्मर्यमाणोपनयनानामपि प्रायश्चित्तेनोपनयनार्हत्वमिति बहवः । प्रायश्चित्तं तु गोनिष्क्रयद्रव्यदानप्रत्याम्नायेन प्रत्याम्नायान्तरापेक्षया सुकरेण अनुष्ठेयम् । तत्र ब्राह्मणस्य द्वादशाब्दम्, क्षत्रियस्य नवाब्दम्, वैश्यस्य षडब्दम् । एषु क्रमेण ३६०, २७०, १८० इति गावस्तन्निष्क्रया वा दातव्याः । व्रात्यस्तोमस्य तु गणयज्ञत्वात् पशुसाध्यत्वाच्च नास्मिन् युगेऽनुष्ठानम् ।

तत उपाकर्म—उपाकर्मशब्देन वेदानां प्रथमारम्भ उच्यते । तत्र माध्यन्दिनानां वेदस्य प्रथमारम्भ उपनयनदिने विहितः । इतरशाखिनां तूपाकर्मदिने एव । तेषामुपाकर्म यावत् सावित्र्यैव ब्रह्मयज्ञः । इदं च श्रावण्यां पौर्णमास्यां श्रावणस्य शुक्लपञ्चम्यां वा कार्यम् । दिनद्वयेऽशतो व्याप्तौ परदिने संपूर्णसङ्गवव्याप्तौ एकदेशसङ्गवव्याप्तौ च परदिने एव कार्यम् । एवं पञ्चम्यामपि दिनद्वयेऽशतो व्याप्तौ परदिने सम्पूर्णसङ्गवव्याप्तौ एकदेशसङ्गवव्याप्तौ वा परदिने कार्यम्, अन्यथा पूर्वदिने कार्यम् । अत्र भद्रायोगः प्रतिपद्योगो वा न निषिद्धः । पूर्णिमायां संक्रान्तौ ग्रहणे वा तत्तिथौ न कार्यं किन्तु पञ्चम्यां कार्यम् । सूतकादिना प्रतिबन्धे कालान्तरेऽप्येतदनुष्ठेयम् । इदं च ब्रह्मचारिभिर्गृहस्थैर्वानिभिश्च प्रत्यब्दं कार्यम् । एवमुत्सर्गोऽपि । अस्य पूर्वाह्णः कालो मुख्यः । अत्र प्रथमोपाकर्मणि आभ्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयिकश्राद्धं कर्तव्यम् । इदं चाग्निमतो गृह्येऽग्नौ कर्तव्यमितरस्य लौकिकेऽग्नौ। यद्यप्यत्र निरग्नेर्नाधिकार इति कर्काचार्यैरुक्तं तथापि स्मृत्यन्तरप्रामाण्याद् बहुप्रामाणिकाचारोपष्टम्भाच्च क्रियत एव । अत्रौदुम्बरसमिद्भिर्धानाभिराज्येन च होमो वेदाध्ययनं च सूत्रे कर्तव्यत्वेनोक्तानि ।

तत उत्सर्गः—उत्सर्गशब्देनाधीतानां वेदानां प्रीणनाय तर्पणाख्यं कर्म उच्यते । अयं च पौषमासे कार्यः । साम्प्रतं तु उपाकर्मदिने एव उपाकर्मणः पूर्वमनुष्ठीयते । अयं च प्रत्यब्दं कार्यः । अयं च बहिर्जलान्ते कर्तव्यः । अत्रोत्सर्गाङ्गभूतः स्नानविधिरपि वृद्धसम्प्रदायागतो नित्यस्नानवदनुष्ठीयते । एवमुभयाङ्गभूतमृषिपूजनं ब्रह्मयज्ञश्चानुष्ठीयते । अत्र पापनिवृत्तिकामाः संकल्पवाक्ये अनेकपापान्युल्लिखन्ति तद्युक्तं चेद् ग्राह्यम् । न हि केवलनिमज्जनमात्रेण पापनिवृत्तिसंभव इति ।

ततः सप्त पाकयज्ञसंस्थाः साग्निकमात्रकर्तृकाः । तासु१श्रवणाकर्म (सर्पबलिः) श्रावणपौर्णमास्या आरभ्याऽऽमार्गशीर्ष्याः प्रतिदिनं सायं सर्पेभ्योऽर्थे क्रियमाणं कर्म ।२अष्टकाश्राद्धमन्वष्टकाश्राद्धं चास्मच्छाखीयानामस्मिन् युगे न भवति । एवं शूलगवोऽपि । संस्थाऽन्तर्गतं पितृपक्षान्तर्गतमन्वष्टकाश्राद्धं तु भवति। एवमन्येऽपि विषया गार्हस्थ्योपयोगिनोऽत्र वर्तन्त इति ।

गृह्यकर्त्ताऽयं पारस्करः किंदेशीयः, श्रौतसूत्रकर्तुः कात्यायनादन्य उतानन्यः? कदेमां भूमिमलञ्चकार इत्यादिषु विषयेषु बहवः संशया उन्मिषन्ति । तत्र पाश्चात्यैः पण्डितवरैर्न किञ्चिदत्रविषये आक्रान्तम् ।

केचिदस्मदीया एव विपश्चिद्वराः परम्पराभिज्ञा अनयोर्महर्षिकात्यायनपारस्करयोर्गुरुशिष्यभावं कथयन्ति । केचन मातुलभागिनेयतामभिप्रयन्ति । केचन द्वयोरैक्यमेव स्वीकुर्वन्ति । अत्र सर्वत्रापि संशयविच्छेदकं दृढं प्रमाणं नोपलभ्यते । बृहद्ब्राचस्पत्यभिधाने—कात्यायनेनैव गृह्यसूत्रमारचितमिति कात्यायनशब्दार्थकथनावसरे समुक्तम् । परन्तु तत् समुचितप्रमाणप्रदर्शनेन न पुष्टीकृतम् ।

अत्र केचित्—"अथातो गृह्यस्थालीपाकानां कर्म" (१.१.१) 'प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत् (१.२२.१) 'कालातिक्रमे नियतवत्" (२.५,) "न पूर्वचोदितत्वात्सन्देहः" (३.१७.) इति सूत्रचतुष्टये अथ पूर्वमित्यादिना श्रौतसूत्रोक्तस्य परामर्शात् उभयोः श्रौतसूत्रगृह्यत्रयोरेककर्तृकत्वं पूर्वोत्तरभावित्वं चावगम्यते । अन्यथा उभयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिन्नकर्तृकत्वे पूर्वोत्तरभावे नियमाभावेन पूर्ववदित्यादि-कथनं न संगच्छेत। अत उभयोगृं ह्यसूत्रश्रौतसूत्रयोरेककर्तृकत्वमेव, नाम्ना परं भेदेन व्यपदेशः केनचित्कारणवशेनेति वदन्ति ।

वयं तु ब्रूमः— नेदमपि प्रमाणं श्रौत-गृह्यसूत्रयोरेककर्तृकत्वे पौष्कल्यमावहति । नायं नियमः श्रौत-गृह्ययोः सूत्रयोरेककर्तृकत्वेनैव भाव्यमिति । यतो हि सामवेदे द्राह्यायण-लाट्यायनाभ्यां महर्षिभ्यां श्रौतसूत्रमेवारचितम् । गोभिल-खादिराभ्यां गृह्यसूत्रे रचिते । न हि तत्र लाट्यायन-गोभिलयोर्द्राह्यायण-खादिरयोर्वा श्रौतगृह्यसूत्रकर्त्रोरैक्यं संभावयितुमपीष्टे । अत एककर्तृकत्वे नियमाभावात् अन्यकर्तृकग्रन्थमादायापि अथशब्दपूर्ववच्छब्दादेः प्रयोगस्यापि 'अथ गृह्याकर्माणि वक्ष्यामः' इत्यादिना पूर्वोक्तगोभिलखादिरादौ दर्शनात् नेदं कात्यायन-पारस्करयोरेकत्वस्थापनाय पर्याप्तं प्रमाणम् ।

यद्यपि भेदसाधनेऽपि न सुदृढं प्रमाणमुपलभ्यते इति तु सत्यम्, तथापि पक्षान्तरेऽपि प्रमाणस्य दौर्बल्यात् अन्यतरमपि पक्षं स्थापयितुमशक्नुवाना वयं विषयमिमं सन्देहावस्थायामेव पर्यवस्थापयामः ।

एवमेव अस्य कालविषये न कञ्चन निर्णयं कर्तुं पारयामः । यद्यपि पाणिनिकृतायामष्टाध्याय्यां 'पारस्करप्रभृतीनि च संज्ञायाम्' इति सूत्रे पारस्करशब्द उपात्तः । परं स शब्दो महर्षेरस्य वाचक इत्यत्र तु सन्देह एव, यतो हि सूत्रेऽत्र भगवान्पतञ्जलिर्भाष्यकारः 'पारस्करो देशः' इति वदन् देशवाचित्वमेवास्योक्तवान्, न तु महर्षिवाचित्वम् ।

अतो यदि भगवतः पतञ्जलेः समये ततः पूर्वं वा महर्षिः पारस्करः प्रसिद्धोऽभविष्यत् कुतस्तन्नाम न निरदेक्ष्यत् । अतोऽत्रापि विषये सन्देह एव ।

यदि तु पाणिनिसूत्रे महर्षिवाचकत्वमस्याङ्गी क्रियेत तदा महर्षिपाणिनिपूर्वकालिकेन समकालिकेन वा अनेन भाव्यम् । पाणिनिकालश्च ख्रिस्तात्पूर्वमष्टमशताब्दी सप्तमशताब्दी वेति पाश्चात्यानामनुसमयः ।

देशस्त्वस्य उत्तरभारतमिति सामान्यतो वक्तुं शक्यते, यतोऽस्मिन्नेव देशे शुक्लयजुर्वेदस्य तत्संबन्धि-श्रौतगृह्यादीनां च कर्मणां प्रचारोऽपीत्यलं विस्तरेणेति शिवम् ।

वाराणसी
मार्गशीर्षशुक्ला दशमी
सं० १९९५

सुधीजनवशंवदः
श्रीविद्याधरशर्म्मा गौड़ः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* विषयसूची *

विषयः	पृष्ठ
प्रथमकाण्डे प्रथमा कण्डिका—	
मङ्गलाचरणम्	१
पञ्च भूसंस्काराः	,,
ब्रह्मवरणम्	२
अपाम्प्रणयनम्	३
परिस्तरणम्	,,
पात्रासादनम्	,,
पवित्रकरणम्	४
प्रोक्षणीसंस्कारः	,,
पात्रादिप्रोक्षणम्	,,
आज्यनिर्वापः	,,
पर्यग्निकरणम्	५
स्रुवसंस्कारः	,,
आज्योद्वासनम्	,,
आज्यसंस्कारः	,,
उपयमनकुशादानम्	६
पर्युक्षणम्	,,
होमः	,,
द्वितीया कण्डिका—	
आधानकालविकल्पव्यवस्था	७
वैश्यादिगृहादग्न्यानयनम्	,,
अरणिजन्याग्निपक्षनिरूपणम्	,,
चातुष्प्राश्यपचनवदितिकर्तव्यता विचारः	,,
स्थालीपाकेनाग्न्याधेयदेवताहोमः	८
बर्हिर्होमः	९
ब्राह्मणभोजनम्	१०

विषयः	पृष्ठ
तृतीया कण्डिका—	
आचार्यादिषडर्घ्यकथनम्	१०
विष्टराद्याहरणम्	११
विष्टरादिशब्दोच्चारणम्	,,
पादप्रक्षालने वामस्य प्राथम्यम्	१३
ब्राह्मणश्चेदर्घ्यंस्तदा दक्षिणस्य प्राथम्यम्	,,
अर्घग्रहणादिः	१४
मधुपर्कप्रतीक्षणम्	१५
मधुपर्कस्य सव्यपाणिकरणम्	,,
मधुपर्कस्य त्रिर्निरूक्षणम्	१६
तत्प्राशनम्	,,
पुत्रादीनां शेषदानम्	१७
चतुर्थी कण्डिका—	
पाकयज्ञानां स्वरूपम्	१९
वासः परिधानम्	२१
समञ्जनम्	२२
कन्यादानम्	२३
समीक्षणम्	२४
पञ्चमी कण्डिका—	
आघारादिपदार्थकथनम्	२५
जयाभ्यातान होममन्त्राः	२७
षष्ठी कण्डिका—	
लाजहोमविधानम्	३१
साङ्गुष्ठहस्तग्रहणम्	३२
सप्तमी कण्डिका—	
अश्मारोहणविधानम्	३३
गाथागानम्	३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः	पृष्ठ
प्रदक्षिणम्	३५
लाजहोमः	,,
अष्टमी कण्डिका—	
सप्तपदीविधानम्	३६
अभिषेकः	३७
सूर्यवीक्षणम्	,,
सिन्दूरदानम्	३८
ध्रुवावेक्षणम्	४०
दम्पत्योर्नियमाः	४१
नवमी कण्डिका—	
औपासनाग्निहोमः	४२
गर्भकामनायां पूर्वाहुतौ स्त्रियाः कर्तृत्वम्	४३
दशमी कण्डिका—	
अक्षभेदादौ प्रायश्चित्तम्	४३
एकादशी कण्डिका—	
चतुर्थीकर्म	४४
स्थालीपाकहोमः	४६
अभिषेकः	,,
स्थालीपाकप्राशनम्	४७
द्वादशी कण्डिका—	
पक्षादिकर्म	४८
त्रयोदशी कण्डिका—	
गर्भाधानम्	५१
चतुर्दशी कण्डिका—	
पुंसवनम्	५२
पञ्चदशी कण्डिका—	
सीमन्तोन्नयनम्	५३
तत्र मासकथनम्	५४
षोडशी कण्डिका—	
प्रसवकाले अभ्युक्षणम्	५६
जाते कुमारे मेधाजननायुष्यादिः	५७
सप्तदशी कण्डिका—	
नामकरणम्	६५
द्व्यक्षरादिपुन्नाम	,,
स्त्रिया नामकथनम्	,,
निष्क्रमणम्	६६
अष्टादशी कण्डिका—	
प्रवासादागतस्य साग्नेर्गृहोपस्थानम्	६७
पुत्रशिरोवघ्राणम्	,,
एकोनविंशी कण्डिका—	
अन्नप्राशनम्	६९
कामनाविशेषण मांसादिभक्षणे विशेषः	७०
द्वितीयकाण्डे प्रथमा कण्डिका—	
चूडाकरणकालनिरूपणम्	७२
केशान्तकाल निरूपणम्	,,
चूडाकरणकेशान्तेतिकर्तव्यता	७३
केशशेषविचारः	७७
द्वितीया कण्डिका—	
उपनयनकालः	७८
मेखलोपनयनाजिनदण्डादिधारणम्	८२
अञ्जलिपूरणम्	८६
सूर्यदर्शनम्	,,
हृदयालम्भादिः	८७
तृतीया कण्डिका—	
ब्रह्मचारिणोऽनुशासनम्	८८
गायत्र्युपदेशप्रकारः	९०
उपदेशकालः	,,
गायत्रीभेदाः	९१
चतुर्थी कण्डिका—	
समिदाधानादिः	९२
अङ्गालम्भः	९५
आयुपकरणम्	,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः	पृष्ठ
पञ्चमी कण्डिका—	
भिक्षाचरणम्	९६
मातृभिक्षायाः प्रथमत्वम्	,,
अधःशयनादिव्रतम्	९७
निषेध्याः पदार्थाः	९८
ब्रह्मचर्यकालः	,,
वर्णभेदेनाजिनम्	९९
मेखलाविचारः	१००
दण्डविचारः	,,
आचार्येणाहूतश्चेत्	१०१
स्नातकत्रैविध्यम्	,,
गौणकालः	१०२
व्रात्यस्योपनयनादिकर्मनिषेधः	१०३
व्रात्यप्रायश्चित्तम्	१०४
षष्ठी कण्डिका—	
ब्रह्मचारिणः स्नानकालः	,,
वेदशब्दार्थः	१०५
स्नानशब्दार्थः	,,
कल्पशब्दार्थः	,,
याज्ञिके विशेषः	,,
गुरुपादोपसङ्ग्रहणादीतिकर्तव्यता	१०६
सप्तमी कण्डिका—	
विवाहपर्यन्तं स्नातकव्रतम्	११२
तत्र शूद्रस्याप्यधिकारकथनम्	,,
नृत्यादिनिषेधः	,,
तत्प्रतिप्रसवः	,,
क्षेमे रात्रौ ग्रामान्तरगमनादिनिषेधः	११३
भिक्षाप्रतिषेधः	,,
सस्यवत्याम्भूमौ मूत्रपुरीषादिनिषेधः	,,
विकृतवस्त्रधारणनिषेधादिः	,,
अष्टमी कण्डिका—	
स्नातकस्य त्रिरात्रं व्रतचर्या	११४

विषयः	पृष्ठ
स्त्रीशूद्रादीनां दर्शनादि निषेधः	,,
शवशूद्राद्यन्नभक्षणनिषेधः	,,
अन्धकारे भोजननिषेधः	,,
नवमी कण्डिका—	
पञ्चमहायज्ञनिरूपणम्	११५
देवयज्ञः	,,
भूतयज्ञः	,,
पितृयज्ञः	११६
मनुष्ययज्ञः	,,
भिक्षुकादिभ्योऽन्नदानम्	११६
गृहस्थबालादीनां भोजनकालनिर्णयः	,,
दशमी कण्डिका—	
अध्यायोपाकर्म	११७
उपाकरणकालः	,,
उपाकरणानुष्ठानप्रकारः	११८
तत्र ब्रह्मचारिणः समिदाधाने विशेषः	,,
तिलहोमः	११९
कर्माङ्गनियमाः	,,
एकादशी कण्डिका—	
अनध्यायः	१२०
श्राद्धाशनाद्याकालिकानध्यायाः	,,
अभ्रदर्शनादावनध्यायनिरूपणम्	,,
धावतेत्यादिना तात्कालिकानध्यायनिरूपणम्	,,
गुरुमरणादावनध्यायनिरूपणम्	१२१
द्वादशी कण्डिका—	
अध्यायोत्सर्गनिरूपणम्	१२२
उदकान्तमित्यादिनाऽनुष्ठानप्रकारः	,,
त्रयोदशी कण्डिका—	
लाङ्गलयोजनकम	१२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः	पृष्ठ
ज्येष्ठ्या वेत्यादिना पक्षान्तरकथनम्	,,
इन्द्रमित्यादिना तदनुष्ठानप्रकारः	,,
चतुर्दशी कण्डिका	
श्रवणाकर्म	१२४
सर्पावनेजनम्	१२६
बलिहरणम्	,,
सक्तुशेषमित्यादिना सर्पोपस्थानादिनिरूपणम्	१२७
बलिहरणसमयेऽन्तरागमननिषेधनिरूपणम्	१२९
धानाप्राशनम्	१२९
पञ्चदशी कण्डिका—	
इन्द्रयज्ञकर्म	१२९
बलिहरणम्	१३०
षोडशी कण्डिका—	
पृषातका कर्म	१३०
सप्तदशी कण्डिका—	
सीतायज्ञः	१३२
व्रीहियवयोः स्थालीपाकः	,,
यावचरोर्निवृत्तिः	,,
आस्तरणे विशेषः	१३३
मन्त्रवत्प्रदानपक्षः	१३४
बलिहरणम्	१३५
तृतीयकाण्डे प्रथमा कण्डिका—	
अनाहिताग्नेर्नवप्राशनम्	१३७
द्वितीय कण्डिका—	
आग्रहायणीकर्म	१४०
प्रस्तरारोहणकर्म	१४२
तृतीया कण्डिका—	
अष्टकाश्राद्धम्	१४५
अष्टकाकालः	१४६
तासामनुष्ठानप्रकारः	,,
अष्टकाद्वितीयेऽहनि कर्मविशेषः	१५१
तर्पणशब्दार्थः	,,
चतुर्थी कण्डिका—	
शालाकर्म	१५२
संस्रवप्राशनान्ते विशेषः	१५७
पञ्चमी कण्डिका—	
मणिकाधानम्	१५९
षष्ठी कण्डिका—	
शीर्षरोगौषधम्	१६०
सप्तमी कण्डिका—	
दासवशीकरणोपायः	१६२
कृतोपायस्य पुनर्भ्रमणे विशेषः	,,
अष्टमी कण्डिका—	
शूलगवाख्यं कर्म	१६३
नवमी कण्डिका—	
वृषोत्सर्गः	१६६
दशमी कण्डिका—	
आशौचनिरूपणम्	१६८
एकादशी कण्डिका—	
पशुयागनिरूपणम्	१७६
द्वादशी कण्डिका—	
अवकीर्णि प्रायश्चित्तम्	१७८
त्रयोदशी कण्डिका—	
सभाप्रवेशः	१८०
चतुर्दशी कण्डिका—	
रथारोहणकर्म	१८२
पञ्चदशी कण्डिका—	
हस्त्यारोहणकर्मादि	१८४

...Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारस्करगृह्यसूत्राणां वर्णक्रमेण सूची ।

(अ)

अग्नये स्वाहा	१।६।४	अथास्यै दक्षिणा	१।८।५
अग्निमुपसमा	१।१।७	अथास्यै दक्षिणा	१।११।६
अग्निर्भूतानाम	१।५।८	अथाऽऽह वीणागा	१।१५।६
अग्निरैतु प्र	१।५।६	अथाऽत्ररावपत	१।१६।२
अग्निः प्रथमः	१।१।९	अथाऽस्याऽऽयुष्यं	१।१६।५
अग्ने प्रायश्चित्ते	१।११।२	अथाऽस्यमातर	१।१६।१४
अग्रयामभिषिच्य	२।१३।७	अथाऽस्य दक्षिणठं०	१।१६।१५
अग्न्याधेयदेव	१।२।७	अथाऽस्य मूर्धानम	१।१२।३
अङ्गान्यालभ्य ज	२।४।६	अथाऽत्र नवनीत	२।१।८
अजातलोम्नीं	२।७।९	अथाऽजिनं प्र	२।१।२१
अञ्जनानुलेपन	२।१४।१७	अथाऽस्याद्भिरञ्ज	२।२।१४
अत ऊर्ध्वं पति	२।५।३९	अथाऽस्य दक्षिण	२।२।१७
अतीतश्चेदेक	३।१०।४२	अथाऽस्मै सावि	२।३।२
अत्र समिदाधा	२।४।१	अथाऽत्र वधनीते	२।६।२२
अत्र भिक्षाचर्यं	२।५।१	अथाऽतोऽध्यायो	२।१०।१
अथ परिक्राम	१।७।३	अथाऽतः श्रवणा	२।१४।१
अथ पश्चाद् ज्या	२।१।१५	अथाऽतः शाला	३।४।१
अथ दक्षिणतो	२।१७।१५	अथाऽतो मणिका	३।५।१
अथ यवानाम्	३।१।७	अथाऽतः शीर्षरो	३।६।१
अथ दक्षिणतो	३।४।१९	अथाऽतो गृह्यस्थाली	१।१।१
अथ पश्चाद्दो	३।४।१६	अथाऽतोऽवकीर्णि	३।१२।१
अथ वृषोत्सर्गः	३।९।१	अथापरमाज्या	३।१२।६
अथ कामोदका	३।१०।४३	अथातः सभा	३।१३।१
अथ प्रविशति स	३।१३।३	अथातोऽ धीत्याधी	३।१५।२३
अथ यदि मन्येत	१।१३।६	अथाऽतो रथारो	३।१४।१
अथ यदि मन्थं	३।१५।२२	अथाऽतो हस्त्यारो	३।१५।१
अथास्यै दक्षिणठं०	१।६।३	अथाऽऽरोहतीन्द्र	३।१५।३
		अथैनां वासः प	१।४।१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथैनो समञ्ज	१।४।१४
अथैनौ समीक्ष	१।४।१६
अथैनामश्मान	१।७।१
अथैनामुदीची	१।८।१
अथैनाꣳ सूर्यमु	१।८।४
अथैनाꣳ स्थाली	१।११।५
अथैनमभिमृश	१।१६।१३
अथैनं वासः प	२।२।७
अथैनꣳ सूर्यं	२।२।१५
अथोत्तरीयम्	२।६।१९
अथोत्तरतो ये	२।१।१६
अथोत्तरतोऽस	३।४।१७
अथो चित्रपक्ष	३।६।३
अथोपतिष्ठते	३।१६।१०
अथोत्तरतो भोमा	२।१०।१०
अथोदककर्म	२।१०।१
अद्विवर्षे प्रेते	३।१०।२
अधिश्रित्य	१।१।१६
अधियज्ञमधि	१।३।३०
अधिरथꣳश	१।८।१०
अधः शयीया	१।८।६
अधः शाय्यचारा	२।५।१०
अधः शयोरंश्च	३।१।१६
अनपेक्षमाणा	३।१०।२१
अन्नपतीयया	३।१।६
अन्नपर्याय वा	१।१९।१३
अनामिकाऽङ्गु	१।३।१२
अनामिकया सु	१।१६।४
अनाहिताग्ने	३।१।१
अनुगुप्तमेतꣳ	१।१४।२२
अनुवातं पशु	३।८।११
अन्तः सूतके चे	३।१०।४
अन्वारभ्य आघा	२।३।२
अन्वारभ्य आघारा	१।५।३
अन्वारभ्य आघा	२।१।६
अन्यस्त्रिभिः प्रा	१।३।६
अन्ययानमुपकु	१।१०।२
अपश्वेतपदा	२।१४।५
अप आसिञ्चति	३।५।३
अपूपमाꣳसशाकैः	३।३।३
अप्राप्य देवताः	३।१४।८
अप्स्वात्मानं ना	२।७।७
अभिमृशति न	१।१६।२०
अभ्यन्तरतोऽग्नि	३।४।५
अभ्युक्षय	१।१।६
अभ्युक्षय	१।१।२०
अमाꣳसाश्यमृ	२।८।२
अमावास्यायां	३।१२।२
अयुजाक्षरमाका	१।७।३
अरणिप्रदानमेके	१।२।५
अर्वं प्रतिगृह्य	१।३।१३
अर्थवदासाद्य	१।१।११
अर्थवत्प्रोक्ष्य	१।१।१५
अर्धषष्ठान्मासा	२।१।१०
अर्धसप्तामान्मा	२।१।११
अलङ्करणमसि	२।६।२४
अवज्योत्य रात्रौ	२।८।७
अवनेज्य पूर्वं	२।१४।१५
अवेक्षय	१।१।२४
अष्टवर्षं ब्राह्मण	२।२।१
अष्टकायै स्वा	३।३।७
अष्टाचत्वारिꣳश	१।५।१३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असम्भवाद्विनि	२।१७।५
असावहं भो३इ	२।२।१८
अस्तमितेधु	१।८।१२
अस्तमितानुदि	१।९।२
अहतं वासो धौतं	२।६।१८
अहरहः स्वाहाकु	२।१।१७
अहरहःग्नमस्मै	३।१०।५०
अहिर्ट०सन्नरण्या	२।५।९
आग्नेयपाण्डुपा	२।१४।९
आग्नेयपाण्डुपा	२।१४।१२
आग्नेयपाण्डुपा	२।१४।१४
आग्नेयपाण्डुपा	२।१४।१६
आचतुर्विंट०शा	२।५।३८
आचामत्यामाग	१।३।१५
आचम्य प्राणान्	१।३।२५
आचान्तोदकाय	१।३।२६
आचार्याय वेरं	१।८।१०
आचार्याय भैक्षं	२।५।८
आचार्येणाऽऽहूत	२।५।२९
आचार्यायान्तेवा	३।३।१२
आचार्ये चैवम्	३।१०।३६
आज्यमुद्वास्य	१।१।२२
आज्यभागाविष्ट्वा	२।१०।५
आज्यर्ट० संस्कृत्ये	३।४।७
आत्वा ब्रह्मवर्चस	१।१९।११
आद्वाविर्ठ०शा	२।५।३७
आपो हि ष्ठेति च	२।६।१२
आपो हि ष्ठेति	३।५।४
आवसथ्याधानं	१।२।१
आश्वत्थेषु पला	२।१५।५
आश्वयुज्यां	२।१६।१
आषोडशाद्वर्षाद्	२।५।३६
आहरन्ति विष्टरं	१।३।५
(इ)	
इतरयोश्चोन्द	२।१।१४
इन्द्रम्पर्जन्यम	२।१३।३
इन्द्र श्रेष्ठानि द्र	१।१८।६
इन्द्रं दैवीरिति	२।१६।१०
(उ)	
उत्तरपूर्वस्यां दि	३।५।२
उत्तीर्णाञ्छुचौ	३।११।२०
उतूलपरिमेहः	३।७।१
उत्पूय	१।१।२३
उत्साद्य पुनः	२।६।१६
उत्सृष्टेष्वभ्रद	२।११।३
उदपात्रर्ट० शिर	१।१६।१७
उदपानावेक्षण	२।७।५
उदकान्तं गत्वा	२।१२।२
उदुत्तममिति मे	२।६।१४
उद्धृत्याग्रं ब्राह्म	२।९।१३
उपयमनान्कु	१।२।२६
उपयमनप्रभृतयौ	१।९।१
उपसङ्गृह्य गु	२।६।१०
उपाकरणनियो	३।१९।५
उपोद्धतिष्ठन्ति	३।२।३४
उभयर्ठ० समाप्य	२।५।३५
उर्वरायामन	२।७।११
उषसे भूतानां	२।९।१०
उष्णीषेण शिरो	२।६।२४
उष्ट्रमारोच्यन्	२।१५।५
ऊर्ध्वमाग्रहायण्या	३।३।१
ऊर्ध्वबालामि	३।१२।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊवध्यलोहित ३।८।१०

(ए)

एकरात्रमशत्र २।११।१
एकवस्त्राः प्राची ३।१०।१६
एका वैश्यस्य १।४। ०
एकादशवर्षठं० २।२।२
एकादशयामयु ३।१०।४५
एके प्रागुदगांव २।११।१३
एकञ्चेत्पूर्वस्यो २।६।२०
एतदेव प्रायश्चित्त ३।१२।११
एतदेव वशोक ३।.३।७
एतेनैव गोयज्ञो ३।८।१३
एतेनैवाश्वारोह ३।१५।४
एत्य हस्तिनम ३।१५।२
एवमत ऽऊर्ध्वम् १।१२।१०
एवमुपरिष्ठा १।२।८
एवन्द्विरपरं ला १।७।४
एवन्द्विरपरं तृ २।११।१३
एवन्द्वितीयाम् २।४।४
एवन्द्विरपरं त्र ३।३।१५
एष एव विधि १।१।१
एषा तऽ इति वा २।४।५
ऐणेयमजिनमु २ ५।१७
ऐन्द्री वैश्वदेवी ३।३।२
ओषधीनां प्रादु २।६।२
औदुम्बरो वैश्य २।५।२६
औपासनमरण्यटं० ३।१८।३

(क)

कपिञ्जलमाठं १।१९।७
कस्य ब्रह्मचा २।२।१९
कार्तिक्यां पौर्ण ३।९।३
कामं तु याज्ञि २।६।९
कामादितरः २।७।२
कामादीजानो २।१७।३
कालातिक्रमे २।५।४१
कुमार्या भ्रात। १।६।१
कुरुध्वं मा चैवं ३।१०।१२
कुशकण्टकटं० १।१५।४
कूर्मपित्तं चोप १।१५।५
केशश्मश्रिति २।१।७
केशसम्मितो २।५।२८
कृकपाया श्रा १।१६।१०
क्रीत्वा लब्ध्वा ३।१०।२४

(ग)

गर्भिणीं विजन्ये २।७।६
गवान्त्वा हिङ्कारे १।१८।४
गां केशान्ते २।१।२३
गिरिमभिमन्त्रय ३।१५।१२
गुरौ प्रेतेऽपो २।११।७
गोयज्ञेन व्या ३।९।२
गोष्ठमभिम ३।१५।१४
गोत्रांब्राह्मणस्य वरः १।८।११
गौर्वां शब्दाव ३।८।४
ग्रामवचनञ्च १।८।८
ग्रामे वोभयस ३।१७।७

(घ)

घृताक्तान्सक्तून् २।१४।८

(च)

चक्षुर्भ्यांठं श्रो ३।६।२
चतुर्थठं० शूर्पकु १।७।५
चतुर्थ्यामपर १।१५।५
चतुर्थे मासि ४।५८।५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुष्पथमभिम	३।१५।७	तां दृढपुरुष	१।८।७
चातुष्प्राश्यप	१।२।४	ताभिरद्भिः शि	२।१।२०
चित्तं च चित्ति	१।५।७	तामुदुह्य य	१।११।७
(छ)		तिलमुद्गमिश्रठं	१।१५।४
छत्रं प्रतिगृह्णा	२।६।२७	तिस्रोऽप्रत्याख्या	२।५।५
(ज)		तिस्रो ब्राह्मणस्य	१।४।८
जगतीं वैश्य	२।४।६	तिस्रो रात्रीर्व्रतं	२।८।१
जातस्य कुमा	५।१६।२	तूष्णीं ग्रामा	३।१०।१०
ज्येष्ठया वेन्द्र	२।१३।२	तूष्णीं वा	२।२।१०
ज्योतिष्मती प्र	३।३।६	तूष्णीठं ह	१।१३।६
(त)		तेषाठं संस्कारे	२।५।४३
तत आदाय	२।१।९	त्रयः स्नातकाः	२।५।३२
ततो ब्राह्मणभो	१।२।१२	त्रिपुरुषं पतित	२।५।४२
ततो ब्राह्मणभो	१।१०।४	त्रिभिस्तूष्णीं	२।६।१३
ततो ब्राह्मणभो	१।१५।६	त्रिर्दक्षिणेऽस्य	१।१८।५
ततो ब्राह्मणभो	२।१३।९	त्रिरात्रमक्षारा	१।८।१५
ततो ब्राह्मणभो	२।१५।११	त्रिरात्रं नाधीयी	२।१०।१२
ततो ब्राह्मणभो	२।१६।६	त्रिरात्रठं० सहो	२।११।१३
ततो ब्राह्मणभो	३।१।८	त्रिरात्रंब्रह्मचा	३।१०।२३
ततो ब्राह्मणभो	३।४।१६	त्रिरात्रठं० शाव	३।१०।२७
ततो ब्राह्मणभो	३।५।५	त्रिषु त्रिपूत्तरा	१।४।६
तप्तेनोदकार्था	२।८।६	त्रिष्टुभठं० राज	२।३।८
तस्मादेवंविद्व	१।११।६	त्र्येण्या शलल्या	२।१।१०
तस्य तुल्यवया	३।८।१४	त्र्यायुषमिति	१।१६।६
तस्य त्रिः प्राश्ना	१।३।२०	तृतीये वा ऽप्रति	२।१।२
तस्य न काच	३।१४।१४	(द)	
तस्य शूलगवेन	३।१०।१०	दक्षिणतो ब्रह्मा	१।१।८
तस्या अवटम	३।३।३	दक्षिणतस्ति	२।३।४
तठं० हरन्तं	२।१४।२३	दक्षिणतो ब्रह्मा	३।२।७
तां छविं परि	३।१२।६	दक्षिणामुखा	३।१०।१८
तां जुहोति सठं०	१।६।२	दण्डधारणम	२।५।११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दण्डं प्रयच्छति २।२।१२
दध्ना तण्डुलैर १।९।३
दधिक्राव्ण इति २।१०।८
दधि तिलान्वा २।६।१५
दन्तप्रक्षालना २।६।३०
दशम्यामुत्थाप्य १।१७।१
दर्वीं शूर्पं च २।१४।१०
दर्व्याचमनम् २।१५।२४
दायाद्यकाल ए १।२।२
दिवस्परीत्येत १।१६।८
दिशां च २।४।७
दीक्षितोऽप्यात २।८।६
दीक्षावदेके २।२।१३
देवस्य त्वेति १।३।१७
दैवीं नावमिति ३।२।६
द्वव्रतो वधत्रः १।७।१४
द्वादशवर्षम् २।२।३
द्वादश द्वादश २।५।१४
द्वादशकेऽप्ये २।६।४
द्वारदेशे १।१६।१८
द्वारदेशे मा २।१४।२१
द्विवर्षप्रभृति ३।१०।६
द्व्यक्षरं चतुर १।१७।२

(ध)

धनुर्ज्या राज २।५।२२
धात्रे विधात्रे २।६।५
धानाः प्राशनन्त्य २।१४।२५
धावतोऽभिश २।११।५
धानावन्तमिति २।१४।७
धुर्यौ दक्षिणा १।१०।३

(न)

न कल्पमात्रे २।६।८
न त्वेवामांसो १।४।२९
नदीमुत्तरिष्यन् ३।१५।८
न पूर्वचोदित २।१७।४
नभ्यस्थमभि ३।६।७
नमो माणिचराय ३।१४।७
न स्त्री ब्रह्मचा ३।१४।९
नवं स्थाली ३।१।२
नवै श्येतस्याध्या २।१४।५
नात्रोदककर्म ३।१०।५
नामान्येषा २।१६।९
नित्यानि निव ३।१०।३०
निनयन्नभि १।३।१४
नियुक्तामप्ये १।१६।८
निरुप्याज्यम् १।१।१५
निर्ऋतिं पाकये ३।१२।३
निवेशनद्वारे ३।१०।२२
निवर्तेत चतु ३।१०।४७
निष्क्रमणप्रभृ १।८।२
निष्क्रम्य दिश ३।४।१४
निष्ठितां प्रप ३।५।१८
नीहारे वादित्र २।७।३
नैतस्य पशोर्ग्रा २।८।१२
नैनानुपनयेयुः २।५।४०
नृत्यगीतवादि २।७।३

(प)

पञ्चसु बहिः १।४।२
पञ्चोर्ध्वचंशः २।३।५
परम्मृत्यविति १।५।१०
परिसमुह्य १।१।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिस्तीर्य	१।१।१०
परिपश्चव्ये	३।११।३
परिव्ययणो	३।११।२
पर्यग्नि कु	१।१।१७
पवित्रे कृ	१।१।१२
पशुमप्येके	३।१०।६
पशुश्चोदा	३।११।१
पश्चादग्नेस्ते	१।५।२
पश्चादग्नेरव	२।२।६
पश्चादग्नेः स्वस्तर	३।२।६
पश्चादग्नेः प्राञ्चम	३।२।८
पश्वङ्गं दक्षि	३।११।६
पर्षदमेत्य	३।१३।४
पश्वादिषु स्था	१।१२।१
(पा)	
पाणिनाग्निं परि	२।४।२
पाणौ प्रतप्य	२।४।७
पात्रं निर्णिज्य	२।६।१२
पाद्योरन्यं	१।३।६
पायसमैन्द्रꣳ०	२।१६।२
पायसेनानर्थलु	३।८।१४
पालाशो वा	२।५।२५
(पि)	
पिण्डकरणे	३।१०।४६
पिण्डमप्येके	३।१०।५१
पितरः शुन्ध	२।६।१७
पित्रा प्रत्तामा	१।४।१५
(पु)	
पुण्याहे लाङ्ग	२।१३।१
पुण्याहेशालां	३।४।२
पुत्रायान्ते वासि	१।३।२२
पुत्रं दृष्ट्वा	१।१८।२
पुनः प्रतप्य	१।१।२१
पुमाꣳसौ मि	१।१०।५
पुरा स्यन्दत	१।१४।२
(पू)	
पूर्ववत्परिस	२।४।६
पूर्वे सन्धाव	३।४।१०
पुꣳ०सवनवत्	१।५।२
पूर्वो ब्रूयात्	१।१६।१०
पूर्वो वा गृहपति	२।६।१६
पूषा गा अन्वेतु	३।६।५
(पौ)	
पौषस्य रोहि	२।१२।१
(पृ)	
पृथिव्याः सप्त	३।२।१४
(प्र)	
प्रकृतादन्यस्मा	२।१७।१८
प्रत्तानामितरे	३।१०।३६
प्रत्याह माता	१।३।२६
प्रणीय	१।१।६
प्रति—दिशं वा	२।९।६
प्रतिदिशं पञ्च	१।१६।९
प्रतिमहाव्या	१।१५।५
प्रथमाष्टका प	३।३।४
प्रदक्षिणमग्निं	१।५।१
प्रदक्षिणमग्निं परी	२।३।१
प्रदक्षिणमग्निं पर्यु	२।४।३
प्रवेशनादि स	३।१०।३४
(प्रा)	
प्राङ् महाव्याहृति	१।५।४
प्राशनान्ते प्रत्य	१।१०।१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राशनान्ते सक्तू	२।१४।११	भूतगृह्येभ्यो	२।६।४
प्राशनान्ते दधि	२।१६।३	भूमौ पशुपुरो	३।१२।५
प्राशनान्ते सक्तुशे	३।२।४	(म)	
प्राशनान्ते काᳬंस्ये	३।४।६	मत्स्यैर्जवनका	१।१९।९
(प्रे)		मधुमतीभिर्वा	१।३।२१
प्रेतायोदकर्ट०	३।१०।१६	मधुमाᳬंस	२।५।१२
प्रेताय पिण्डं	३।१०।२५	मध्यमा गवा	३।३।८
प्रोक्षणीः सं	१।१।१३	मध्या वर्षे च	३।३।१३
प्रोषितश्चेत्प्रे	३।१०।४१	मध्ये त्रीन् त्र	२।९।८
प्रोक्षणीश्च पृ	१।१।२५	मध्ये गवाᳬं सु	३।९।४
प्रौष्ठपद्यापि	१।१५।११	मनसा	२।१५।८
(व)		मन्त्रवत्प्रदान	२।१७।११
वर्हिर्हुत्वा प्रा	१।२।११	मातरं प्रथ	२।५।७
वालज्येष्ठा गृह्या	२।६।१५	मातामहयोश्च	३।१०।३७
वाह्यतः स्रोवलिर्ट०	१।१२।४	मातृभिर्वत्सान्	२।१६।५
वैल्वो वै राजन्यस्य	२।५।२६	मार्गशीर्ष्यां	३।२।१
ब्रह्मचर्यं वा	२।६।२	मार्जनान्त उ	३।२।५
ब्रह्मचारिणश्च	२।१०।६	मित्रस्य त्वेति	१।३।१६
ब्राह्मणमामन्त्र्य	३।२।१०	मुखमिति च	२।१।१६
ब्रह्मणे प्रजाप	२।९।३	मुञ्जाभावे कु	२।५।२४
ब्रह्मानुज्ञाताः	३।२।११	मुहूर्तमतीयाय	३।१४।१०
ब्रह्मानुज्ञातः प्र	३।४।६	मूत्रपुरीषे	२।८।५
ब्राह्मणश्चेद	१।३।११	मेखलां बध्नीते	२।२।८
ब्राह्मणान् भोज	२।१।५	मेधां मे देवः	२।४।८
ब्राह्मणान् भोजये	२।२।५	मौञ्जी रशना	२।५।२१
(भ)		मौर्वी वैश्य	२।५।२३
भवत्पूर्वां ब्राह्म	२।५।२	मृन्मये ताᳬं	३।१०।२६
भवन्मध्याᳬं रा	२।५।३	(य)	
भवदन्त्यां वै	२।५।४	यज्ञोपवीतं प	२।२।११
भारद्वाज्या माᳬंसे	१।१६।७	यत्र श्रपयिष्यन्	२।१७।८
भुक्त्वार्द्रपाणिरु	२।११।४	यत्र चान्यत्रापि	३।१५।१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्क्षुरेण मज्जय २।१।१८
यथाकामो वा १।१२।८
यथामङ्गलं वा २।१।४
यथामङ्गलं के २।१।२१
यथामङ्गलं वा २।२।४
यथार्हं भिक्षु २।९।१४
यदहः पुं॰सा १।१४।३
यदि कुमार उप १।१६।१९
यद्देवते तद्देवतं ३।११।१०
यद्यप्यसकृत्स १।४।३१
यद्युपेतो भूमि ३।१०।८
यमगाथां गाय ३।१०।७
यक्ष्यमाणात्स्ट १।३।३
यस्ते स्तन इति १।१६।१६
यात्वाऽध्वानं ३।१४।१५
यावद्ग्रहणं २।५।१५
यावद्ग्रहणं २।६।३
युङ्क्तेति रथं ३।१४।४
युवा सुवासाः २।२।८

(र)

राज्ञोच्चऽभेदे नद्ध १।१०।१
रात्रौ चेदादि ३।१०।३३
राष्ट्रभृत इच्छ १।५।६
रासभमारोच्य ३।१५।६
रुद्रान् जपित्वै ३।९।६
रोचिष्णुरसि २।६।२६
रौरवटं॰ राज २।५।१८

(ल)

लक्षण्यं वृत्तम ३।१५।२०
लोहितं पलाशे ३।८।९

(व)

वनमभिमन्त्र ३।१५।११
वनस्पतिस्विष्ट ३।२।६
वपनानुषङ्गा २।१३।६
वपाश्रं हुत्वा ३।११।६
वपाश्रं श्रपयि ३।८।५
वपोद्धरणं चा ३।११।४
वर्ष्मोऽस्मि समाना १।३।८
वातेऽमात्रास्या २।११।१
वामदेव्यमसी ३।१४।५
वासांसि शाण २।५।१६
विकृतं वासो २।७।१३
विधिर्विधेयस्त २।६।६
विनिवृत्तिः २।१७।१३
विमुखेन च २।१६।७
विराजो दोहोऽसि १।३।१२
विश्वाभ्यो माना २।६।२९
विश्वेभ्यो देवे १।१२।२
विश्वेभ्यो देवेभ्यो २।९।९
विष्टरं प्रतिगृ १।३।७
वेदटं॰ समाप्य २।६।१
वैश्वदेवस्याग्नौ १।१२।३
वैश्वदेवादन्ना २।९।२
वैश्यस्य वहुप १।२।३
व्याघारणान्ते ३।८।८
व्रीहियवानां य २।१७।२
वृत्रस्येत्यङ्क्ते २।६।२५

(श)

शकुनिर्वाश्यमा ३।१५।१९
शतायुधाय ३।१।३
शन्नो भवन्त्वि २।१०।७
शर्म ब्राह्मण १।१८।४
शयानं चेदा २।५।३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शव-शूद्र-सूत २।८।४
शालाग्निनां ३।१०।९
शालाग्नौ चै ३।१०।३१
शिवां वाश्यमा ३।१४।१८
शिवो नामेति २।१।११
शूलगवः ३।८।१
शेषमद्भिः प्र १।१२।५
श्मशानमभि ३।१५।१२
श्राद्धाशने चो २।११।२
श्रावणस्य पञ्च २।१०।३
श्रावण्यां प्रौ २।१४।२
श्वोऽन्वष्टका ३।३।१०

(ष)

षडङ्गमेके २।६।७
षड् द्वादशा २।५।६
षष्ठे मासेऽन्न १।१९।१
षडर्घ्या भवन्त्या १।३।१०
षोडशवर्षस्य १।१।३

(स)

स एवं वर्तमा २।५।३१
सकेशानि प्र २।१।१२
सक्तुशेषꣳ २।१४।१८
सतानूनप्त्रिणि २।११।८
सत्यवदनमेव २।८।८
सद्यस्त्वेव गा २।३।७
सभामभ्येति ३।१३।२
समाप्य वेद २।५।३३
समानग्रामवा ३।१०।१५
समाप्य व्रत २।५।३४
स यदि कामये १।१६।७
स यदि किञ्चि ३।१५।२०
स यदि दुर्वलो ३।१५।१२
स यदि पुनर्भ्रं ३।१५।१३
स यदि भ्रम्याद् ३।७।३
स यदि मन्येत ३।१३।५
स यस्मिन्देशे १।१६।१२
स यावत्काम २।१४।१९
सर्वत ऽआत्मा २।७।१५
सर्वप्रायश्चित्त १।५।५
सर्वाणि त्रीणि ३।११।७
सर्वं वा प्राश्नीया १।३।२३
सर्वहुतमेककपा २।१४।१०
सर्वासां पयसि ३।१०।८
सर्वं जपन्ति स २।१०।११
सर्वेषाꣳ शूद्रा १।४।११
सर्वेषां वा गाय २।४।१०
सर्वेषां वा गा २।५।२०
सर्वैः सर्वका १।१९।१२
सव्यनास्थाना ३।१०।१७
सव्ये पाणौ कृ १।३।१८
सव्यं पादं प्र १।३।१०
सा यदि न प १।८।१४
सा यदि गर्भं न १।१३।१
सावित्रीं चतुर २।१२।३
साम्वत्सरिकस्य २।१।१
सिचावधूतो ३।१५।१६
सीरा युञ्जन्तीति २।१३।४
सुमनसः प्र २।६।२०
सूर्यमुदीचय १।१७।६
सोष्यन्तीमद्भि १।१६।१
सम्वत्सरे षण्मा २।३।६
सम्वत्सरं ब्रह्म च २।१।२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्वत्सरं पृथ	३।१०।४८
सम्वत्सरं भिचा	३।१२।८
सम्मृज्य	१।१।१९
संयुक्तं मैथुनं	३।१०।११
सꣳस्थिते कर्म	२।१७।२०
स्तनयित्नुमभि	३।१५।१७
स्तम्भमुच्छ्रय	३।४।४
स्तरणशेषकूर्चे	२।१७।४
स्नातस्य यमान्व	२।७।१
स्त्रियश्चोपय	२।१७।१६
स्त्रियै तु मूर्धा	१।१८।७
स्त्रीणां चापत्ता	३।१०।३८
स्त्रीशूद्रशव	२।८।३
स्थालीपाकꣳ श्र	१।१९।२
स्थालीपाकस्य	२।१९।४
स्थालीपाकस्य	१।११।३
स्थालीपाकस्य	२।१४।८
स्थालीपाकꣳश्र	२।१४।३
स्थालीपाकस्य	३।१४।६
स्थालीपाकस्य	२।१७।१०
स्थालीपाकस्या	३।१।४
स्थालीपाकꣳ श्र	३।१।२
स्थालीपाकस्य	३।२।३
स्थालीपाकꣳ श्र	३।३।५
स्थालीपाकस्य	३।४।८
स्थालीपाकमि	३।११।८
स्योना पृथिवि नो	३।२।१२
स्रुवं प्रतप्य	१।१।१८
स्वर्ग्यः पशव्यः	३।८।२
स्वयं वा कुर्याद	१।१६।११
स्वयं प्रशीर्णे	२।७।१२
स्वातौ मृगशिर	१।४।७
स्विष्टकृते च	१।२।६
(ह)	
हस्तेनोपस्थम	३।१४।६
हुत्वा हुत्वैतासा	१।११।४
(क्ष)	
क्षपणं प्रवच	२।१२।४
क्षेत्रस्य पुरस्ता	२।१०।६
क्षेमे नक्तं ग्रा	२।७।४
क्षेम्यो ह्येव भ	३।७।४
क्षेम्यो ह्येव भ	३।६।४

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्राणामकारादि-क्रमेण सूचिका ।

अक्षण्वन् २।१
अग्नये समि २।४
अग्निर्भूताना १।५
अग्निरैतु १।५
अग्निरायुष्मान् १।१६
अग्निमिन्द्रं ३।४
अग्निः प्रथ ३।१
अग्ने सुश्रवः २।४
अघोरचक्षु ३।४
अङ्को न्यङ्का ३।१४
अङ्गादङ्गात् १।१८
अङ्गानि च २।४
अन्नब्र ३।४
अन्नाद्याय २।६
अनानुजा ३।३
अनिमिषा २।१७
अपश्वेत २।१४
अपान १।१६
अभिभूः २।१४
अभिभूः २।१५
अभून्मम ३।३
अमीवहा ३।४
अमोऽहम १।६
अयमग्निः ३।२
अयमूर्जाव १।१५
अयम्मे २।७
अयास्यग्ने १।२
अयं वा ३।१४
अयंमणं १।६
अलङ्करणम २।६
अवभेदक ३।६
अवैतु पृ १।१६
अश्मा भव १।१६
अश्वावती ३।४
अश्वावत्र ३।४
अस्मे प्रय १।१६
आग्नेयपा २।१४
आग्नेय पा २।१४
आग्नेयपा २।१४
आ त्वा कुमा ३।४
आप स्थ १।३
आपो देवेषु १।१६
आपोरेव ३।५
आपो मरीची ३।२
आपः शिवा १।८
आमागन्य १।३
आयुः की ३।२
आलिखन् १।१६
इडासि मै १।१६
इन्द्रपत्नी २।१७
इन्द्रस्य त्वा ३।१५
इन्द्रश्रेष्ठा ३।१८
इन्द्रस्य २।२
इमामुच्छ्र ३।४
इमामग्निः १।५
इमांल्लाजा १।६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इयन्नायुंप	१।६	गृभ्णामि	१।६
इयमोषधी	१।१२	(च)	
इयन्दुरुक्तं	२।२	चक्षुर्भ्यां	३।६
इह गात्रो	१।८	चन्द्र प्राय	१।११
(उ)		चित्तं च	१।५
उदान	१।१६	(ज)	
उदायुषा	१।३	जराङ्गच्छ	१।४
उद्यन्भ्राज	२।६	ज्योतिष्म	३।३
उभाक्त्री	२।११	(त)	
उष्णेन वा	२।१	तनूपाऽग्न	२।४
ऊनम्मे	२।१६	तान्तेवाच	३।१३
ऊर्क् च	३।४	तावे हि	१।६
(ऋ)		तुभ्यमग्ने	१।७
ऋतस्य ग	३।३	तेन मा	२।६
ऋतूनां प	३।३	ते सन्तु	१।६
ऋषयऽश्रा	१।१६	त्रिंशं०शव	३।३
(ए)		त्वाष्ट्रोऽसि	३।१५
एकमिषे	१।८	(द)	
एकाष्टका	३।३	दीदिवि	३।४
एतमुत्यं	३।१	देवाऽश्रा	१।१६
एतं युवा	३।६	दैवी वाच	१।१८
(क)		द्यौस्त्वा ददा	३।१५
कर्ताख	३।४	(ध)	
कामाव	३।१२	धर्मस्थू	३।४,
कूर्कुरःसु	१।१६	धातारश्च	३।४
केता च	३।४	ध्रुवमसि	१।८
(ख)		(न)	
खलमाजि	२।१७	न नामयति	१।१६
(ग)		नमो रुद्रा	३।१५
गवान्त्वा	१।१६	नमः श्यावा	१।१
गन्धर्व प्रा	१।११	नमः स्त्रियै	१।१२
गोपाय	३।४	न वै	२।१४
ग्रीष्मो हेम	३।२		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प)

पञ्च व्युष्टीः ३।३
परि त्वा ३।७
परि त्वा ३।७
परिधास्यै २।६
पितरऽश्रा ३।१६
पितरः शु २।६
पुमाꣳसौ १।१६
पुरस्तावे २।१७
पूर्वाह्ण ३।९
पृषागा ३।८
प्रजापते १।१८
प्रजापतिर्ज १।४
प्रजापत २।२
प्रतिष्ठे स्थो ३।६
प्रतीकम्मे ३।१५
प्राण १।१६
प्राणापानौ २।६
प्राणेनान्न १।१९
प्राणैस्ते प्रा १।११
पृथिवी द्यौः २।१७

(ब)

ब्रह्मचर्यं २।२
ब्रह्मचार्य २।२
ब्रह्मात्वा ३।१५
ब्रह्मायुष्मव १।१६
बृहस्पते २।६

(भ)

भद्रान्नः ३।१
भीमा २।१७
भूस्त्वयि १।१६

(म)

मम व्रते १।८
मम व्रते २।२
मातारुद्राणां १।३
मात्वाऽशनिः ३।१५
मित्रस्य च २।२
मेधाम्मे २।४

(य)

यज्ञऽआयु १।१६
यज्ञश्च ३।४
यज्ञोपवीतं २।२
यत्क्षुरेण २।१
यत्ते देवाः १।१६
यत्ते सरमा १।१६
यत्ते सुसीमे १।११
यदैषि मन १।१४
यद्यशो २।६
यन्मधुनो १।३
यन्मेऽर्कि २।१७
यशसामा २।६
यस्याम्भूतꣳ० १।७
या ऽश्रकृन्त १।४
या ऽश्राहर २।६
यां जनाः ३।२
यात ऽए ३।१३
या ते पतिघ्नी १।११
या प्रथमा ३।३
यास्ते ३।८
यास्ते ३।८
ये चत्वारः ३।१
युवासुवासा २।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येनाऽऽवपत्	२।१
येन भूरिश्च	२।१
येनेन्द्राय बृ	२।२
येन श्रिय	२।६
येऽप्स्वन्तर	२।६
यो मे दण्डः	२।२
(र)	
रोचिष्णुर	२।६
(व)	
वर्म्मोऽसि	१।३
वाङ्म ऽआ	१।३
वायो प्रायः	१।११
वास्तोष्पते	३।४
वास्तोष्पते	३।४
वास्तोष्पते	३।४
वास्तोष्पते	३।४
विराजो दो	१।३
विश्वाभ्यो	२।६
विश्वे देवा	३।३
वेद ते भूमि	१।१६
व्यान	१।१६
(श)	
शण्डामर्का	१।१६
शतायुधाय	३।१
शान्तापृथि	३।२
शिवान्ते	३।१५
शुक्रऽऋप	१।३
शूद्रोऽसि	३।१५
श्रीश्च	३।४
श्वेत	२।१४
(स)	
सभाङ्गिर	३।१३
सभा च मा	३।१३
समञ्जन्तु	१।४
समान	१।६
समुद्रं वः	१।३
समुद्र ऽआ	१।१६
सम्पतिभू	२।१७
सम्मा	३।१२
सरस्वति	१।७
सर्पदेव	३।४
सवित्रा प्र	२।१
संवत्सर	३।२
संवत्सर	३।२
सहनोऽस्तु	२।१०
सानः पूषा	१।४
सिगछि	३।१५
सुगन्धु	१।५
सुचक्षा	२।६
सुमङ्गली	१।८
सुहेमन्तः	३।३
सूर्यप्राय	१।११
सोमऽआ	१।१६
सोमः प्रथमो	१।४
सोम ऽएव	१।१५
सोम ऽएत्र	१।१६
सोमोऽददव	१।४
स्योनटं०शि	३।४
स्वप्नश्च	३।४
स्वस्तिनो	१।५
स्विष्टमग्ने	३।१
(ह)	
हस्तियशसः	१।१५
हिरण्यपर्णं	३।१५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सूरसीति ,, यमिष्ठीवान्
आत्माचोमतिमृत्तिका स्थापनं
एषवेत्तामः दर्भ इष्टकाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ श्रीः ❀

पारस्करगृह्यसूत्रम् ।

विवृतिसहितम्

विघ्नौघध्वान्तविध्वंस-भास्करायित-विग्रहम् ।
अवलम्बे निरालम्बः साम्बं शिवमहर्निशम् ॥ १ ॥
नामं नामं गुरोरङ्घ्रि स्मारं स्मारं पितुः पदम् ।
श्रुत्यर्थं प्रबुभुत्सूनां सतामानन्दवृद्धये ॥ २ ॥
क्लिष्टपारस्करवचोऽवगाहाय यथामति ।
श्रीवेणीरामगौड़ेन विवृतिः कापि तन्यते ॥३॥

वेदोक्तानां त्रेतासाध्यानां कर्मणामनुष्ठानक्रमबोधको ग्रन्थः श्रौतसूत्रम् । जातकर्मादिसंस्कारकर्मणामेकाग्निसाध्यानां प्रतिपादको ग्रन्थो गृह्यसूत्रम् । तत्र शुक्लयजुर्वेदस्य श्रौतसूत्रं कात्यायनमहर्षिणा पूर्वमारचितम्, अनन्तरं पारस्करमहर्षिणा गृह्यसूत्रमारचितम् । तत्रादौ सर्वकर्मसाधारणीं परिभाषामाह—

अथातो गृह्यस्थालीपाकानां कर्म ॥ १ ॥

तत्रायमथ शब्दः श्रौतकर्मानन्तर्यप्रज्ञप्त्यर्थः । हेत्वर्थश्चातः शब्दः । तेनायमर्थः—अथ श्रौतकर्मविधानानन्तरं यतः श्रौतानि कर्माणि विहितानि स्मार्तानि च विधेयानि, अतो हेतोः गृहे भवो गृह्यः आवसथ्योऽग्निः । स्थाल्यां पच्यन्ते इति स्थालीपाकाः ओदनाज्य-सक्तु-पयस्या-पुरोडाशादयः । गृह्ये स्थालीपाकाः गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म अनुष्ठानं निर्माणप्रकारो वक्ष्यते ॥ १॥

परिसमुह्य ॥ २ ॥

त्रिभिर्दर्भैः स्थण्डिले कुण्डे वा प्राक्संस्थमुदक्संस्थं वा पांसूनपसार्य (तान् कुशानैशान्यां क्षिपेत्) ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मूरसीत॥ [illegible]
अश[illegible]आचेमतिमृत्तिका स्थापनं
इष्टवत्ताम· दर्भ इष्टकाते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ श्रीः ❀

पारस्करगृह्यसूत्रम् ।

विवृतिसहितम्

विघ्नौघध्वान्तविध्वंस-भास्करायित-विग्रहम् ।
अवलम्बे निरालम्बः साम्बं शिवमहर्निशम् ॥ १ ॥
नामं नामं गुरोरङ्घ्रि स्मारं स्मारं पितुः पदम् ।
श्रुत्यर्थं प्रबुभुत्सूनां सतामानन्दवृद्धये ॥ २ ॥
क्लिष्टपारस्करवचोऽवगाहाय यथामति ।
श्रीवेणीरामगौड़ेन विवृतिः कापि तन्यते ॥३॥

वेदोक्तानां त्रेतासाध्यानां कर्मणामनुष्ठानक्रमबोधको ग्रन्थः श्रौतसूत्रम् । जातकर्मादिसंस्कारकर्मणामेकाग्निसाध्यानां प्रतिपादको ग्रन्थो गृह्यसूत्रम् । तत्र शुक्लयजुर्वेदस्य श्रौतसूत्रं कात्यायनमहर्षिणा पूर्वमारचितम्, अनन्तरं पारस्करमहर्षिणा गृह्यसूत्रमारचितम् । तत्रादौ सर्वकर्मसाधारणीं परिभाषामाह—

अथातो गृह्यस्थालीपाकानां कर्म ॥ १ ॥

तत्रायमथ शब्दः श्रौतकर्मानन्तर्यप्रज्ञप्त्यर्थः । हेत्वर्थश्चातः शब्दः । तेनायमर्थः—अथ श्रौतकर्मविधानानन्तरं यतः श्रौतानि कर्माणि विहितानि स्मार्तानि च विधेयानि, अतो हेतोः गृहे भवो गृह्यः आवसथ्योऽग्निः । स्थाल्यां पच्यन्ते इति स्थालीपाकाः ओदनाज्य-सक्तु-पयस्या-पुरोडाशादयः । गृह्ये स्थालीपाकाः गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म अनुष्ठानं निर्माणप्रकारो वक्ष्यते ॥ १॥

परिसमुह्य ॥ २ ॥

त्रिभिर्दर्भैः स्थण्डिले कुण्डे वा प्राक्संस्थमुदक्संस्थं वा पांसूनपसार्य (तान् कुशानैशान्यां क्षिपेत्) ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपलिप्य ॥३॥

उदकमिश्रितेन गोमयेन स्थण्डिलं कुण्डं वा प्राक्संस्थमुदक्संस्थं वा त्रिरुपलिप्य ॥३॥

उल्लिख्य ॥४॥

स्फयेन स्रुवेण वा स्थण्डिलादौ उदक्संस्थाः प्राक् संस्था वा स्थण्डिलायामपरिमिताः प्रादेशमात्रा वा तिस्रो रेखाः कृत्वा ॥४॥

उद्धृत्य[1] ॥५॥

पूर्वोक्तरेखाभ्य उल्लेखनक्रमेणानामिकांगुष्ठेन पांसूनपसार्य। अत्र एकस्या रेखायाः पांसुमुत्य द्र वामहस्ते धारयित्वा पुनर्द्वितीयरेखातः पांसुमुद्धृत्य तमपि वामहस्ते धृत्वा एवं तृतीयवारमुद्धृत्य तमपि वामहस्ते धृत्वा तत्सर्वं दक्षिणहस्ते गृहीत्वा ईशान्यां क्षिपेदिति साम्प्रदायिकाः ॥५॥

अभ्युक्ष्य ॥६॥

स्थण्डिलादिकं जलमादाय न्युब्जेन[2] हस्तेन त्रिरभिषिच्य ॥६॥

अग्निमुपसमाधाय ॥७॥

कांस्ये ताम्रे वा पात्रे स्थितं लौकिकमग्निमात्माभिमुखं स्थण्डिल[3]मध्ये इन्धन[4]शून्ये हस्ताभ्यां स्थापयेत् ॥७॥

दक्षिणतो ब्रह्मासनमास्तीर्य ॥८॥

स्थापितस्य अग्नेः दक्षिणस्यां दिशि ब्रह्मण उपवेशनार्थम् आसनमास्तीर्य निधाय तत्र ब्रह्माणमुपवेशयेत्[5] ॥८॥

---

(१) "उत्करं गृह्यरेखाभ्योऽरत्निमात्रे निधापयेत्।
द्वारमेव हि द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्" इति गृह्यासंग्रहे।

(२) "उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्।
तिरश्चाऽवोक्षणं प्रोक्तं नीचेनाऽभ्युक्षणं स्मृतम्" ॥

(३) "कुण्डे वा स्थण्डिले वाऽपि मध्यदेशे हविर्भुजम्।
दीप्तवह्न्यङ्गारमयं निर्धूमं स्थापयेद्बुधः" ॥
"अभिमुखमग्निं प्रणयन्ति" इति गोभिलगृह्यम्।

(४) "कुण्डे वा स्थण्डिले वापि मार्जनादि-सुसंस्कृते।
वह्निं संस्थाप्य तत्रैव समिधं प्रक्षिपेत्ततः" ॥

(५) पञ्चकुण्ड्यादौ उदङ्मुखे होतरि दिग्विपर्यासेन उदीची दिक् प्राचीवद्भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रणीय ॥९॥

प्रणीतापात्रं सव्यहस्ते कृत्वा जलेनाऽऽपूर्य[१] अग्नेरुत्तरतः स्थापिते कुशद्वयरूपे पश्चिमासने निधाय ब्रह्मणो मुखमवलोक्य ईक्षणमात्रेण ब्रह्मणाऽनुज्ञात अग्नेरुत्तरतः स्थापिते कुशद्वयरूपे द्वितीयासने निधाय॥९॥

परिस्तीर्य ॥१०॥

पुरस्ताद्दक्षिणतः पश्चादुत्तरतश्च इत्येवं क्रमेण त्रिभिस्त्रिभिः कुशैः[२] अग्निम्परिस्तीर्य।

इदम्परिस्तरणं दक्षिणोत्तरयोः प्रागग्रैः पुरस्तात्पश्चाच्च उदगग्रैः कुशैः कार्यम् ॥ १० ॥

अर्थवदासाद्य ॥११॥

अर्थः प्रयोजनं विद्यते यस्य स्रुवादेः तत् अर्थवत् अर्थात् अर्थवन्ति प्रयोजनवन्ति पात्राणि अग्नेरुत्तरतः उदकसंस्थानि[३]

तेन प्राची दक्षिणा, दक्षिणा प्रतीची, प्रतीची चोत्तरा इति का० श्रौ० सू० (४, १०, ३,) देवयाज्ञिकः। अतो यदा हता उदङ्मुखस्तदा ब्रह्मा पूर्वस्यां दिश्युपविशेत्। पात्रासादनादिकं तु पश्चिम-दिश्येवेत्यादिकं बोध्यम्।

(१) यत्र पायसमैन्द्रं श्रपयित्वा (पा. गृ. २,१५,२) इत्यादौ चरुश्रपणार्थं पयो विहितं तत्र पात्रान्तरे पयः कृत्वा प्रणीतापात्रस्योपरि तत्संस्थाप्य तस्यापि प्रणयनं युगपद्विधेयम्। देवयाज्ञिकास्तु—"प्रणीतापात्रे पिष्टादिना तथा मर्यादा विधेया यथोदकपयसोः सङ्करो न स्यात्" इत्येवमुक्तवन्तः (का. श्रौ. २, ३, २)। वृषोत्सर्गविधाने रुद्रधरादयोऽप्येवमिति।

(२) बर्हिषश्चतुर्थभागमादाय तेन परिस्तरणमिति केचित्पद्धतिकाराः। बर्हिःपरिमाणं तु "इध्मोऽरत्निप्रमाणः स्यात् बर्हिः स्यान्मुष्टिसम्मितम्" (आश्व. स्मृ.) "कौशं बर्हिः" (का० श्रौ० सू०) कुशा एव बर्हिः शब्देनोच्यन्त इति तदर्थः। "चतुः षष्टिकुशा बर्हिः" "एकाशीति भवेद्बर्हिः" इत्यादि तु कुत्रापि नोपलभ्यते। बौधायनगृह्य (१, ७, १) अष्टषष्ठ्या कुशैः परिस्तरणमुक्तम्, हि. के. गृह्ये—(४, ६,) षोडशभिः कुशैः परिस्तरणमुक्तम्, का. श्रौ. सूत्रे (अ ३. कं. ३०६) तृणैरग्नीन्परिस्तीर्येत्यत्र तृणशब्दस्य दर्भपरत्वात्तत्र च बहुवचनोपदेशात् बहुवचनस्य च आदिसामर्थ्यात् अनवस्थाभयाच्च त्रित्वे एव पर्यवसानात् (का. श्रौ. सू.)(अ. ४ कं. २ सू. २९—३१) त्रिभिस्त्रिभिः कुशैः परिस्तरणमुक्तम्।

(३) "पश्चादुत्तरतो वा स्यात् पात्रासादनमग्नितः।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थलसंकोचे प्राक्संस्थान्यपि अथवा अग्नेः पश्चिमतः प्राक्संस्थानि असम्भवे[1] उदक्संस्थान्यपि एकवारं हस्तेन पात्रद्वयं पात्रद्वयमादाय प्रागग्रमुदग्रं वा आसाद्य ॥११॥

पवित्रे कृत्वा ॥ १२ ॥

कौशे समे अप्रशीर्णाग्रे अनन्तर्गर्भे द्वे पत्रे वामहस्ते गृहीत्वा अग्रत आरभ्य प्रादेशमात्रे मापयित्वा प्रादेशाधस्तात् पत्रद्वयोपरि उत्तराग्रं कुशत्रयं धृत्वा पत्रद्वयमूलं दक्षिणेनादाय कुशत्रयोपरि धृत्वा प्रादक्षिण्येन कुशपत्रद्वयस्याधस्ताद्वेष्टनं विधाय पूर्वपश्चिमायतं कृत्वा कुशत्रयं मोटनेन एकीकृत्य वामे गृहीत्वा दक्षिणेन पत्रद्वयं छिन्द्यात् ॥१२॥ (का. श्रौ. २।३।३०-३)

प्रोक्षणीः संस्कृत्य ॥१३॥

प्रोक्षणीपात्रं[2] प्रणीतासन्निधौ निधाय तत्र प्रणीतोदकमासिच्य पवित्राभ्यां तज्जलमुत्क्षिप्य पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्यहस्ते कृत्वा तदुदकस्य दक्षिणहस्तमध्यमाऽनामिकाङ्गुल्योर्मध्यपर्वभ्यामुच्छालनं कृत्वा प्रणीतोदकेन तज्जलं प्रोक्षेत्[3] ॥१३॥

अर्थवत्प्रोक्ष्य ॥१४॥

अर्थः प्रयोजनं विद्यते यस्य यत् तदर्थवत् प्रयोजनवत् आसादितं पात्रजातं प्रोक्षणीजलेन प्रत्येकं पवित्राभ्यामुत्तानेन[4] हस्तेन प्रोक्ष्य ॥१४॥

निरुप्याज्यम् ॥१५॥

अग्नेः पश्चान्निहितायामाज्यस्थाल्याम्[5] उपयोक्ष्यमाणमाज्यं प्रक्षिप्य ॥१५॥

अधिश्रित्य ॥१६॥

प्रविलापनार्थं तदाज्यम् अग्नावधिश्रित्य संस्थाप्य ॥१६॥

उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत् ॥
"प्राग्बिलान्युदगग्राणि प्राक्संस्थान्यग्नितो यदि ।
प्रागग्रोदग्बिलान्यग्नेरुदक्संस्थानि चैव हि" इति ॥

(१) प्राग्वम्प्राग्वमुदगग्रेरुदगग्रं समीपतः ।
तत्तथा सादयेत् द्रव्यं यद्यथा विनियुज्यते ॥ (छ. प.)

(२) वैकङ्कतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते ॥

(३) प्रोक्षणीः संस्कारः (का० श्रौ० सू० २. ३. ३२–३५ सूत्रेषु द्रष्टव्यः)

(४) उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम् ।

(५) आज्यस्थाली तु कर्तव्या तैजसद्रव्यसम्भवा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्यग्नि कुर्यात् ॥१७॥

अग्नेरुल्मुकं गृहीत्वाऽऽज्यस्य (चर्वादेश्च) परितो भ्रामयेत् । इतरथावृत्तिं च कुर्यात् । न पयस्यायाः पर्यग्निकरणमिति कर्कः ॥१७॥

स्रुवं प्रतप्य ॥१८॥

स्रुवमधोमुखं विधाय अग्नौ सकृत् हस्ताभ्यां प्रतप्य तापयित्वा ॥१८॥

सम्मृज्य ॥१९॥

स्रुवं वामहस्ते आदाय दक्षिणेन सम्मार्जन[1]कुशानामग्रै आदौ स्रुवमुखं सम्मृज्य, ततो मूलादारभ्याग्रपर्यन्तं प्राक्संस्थं सम्मृज्य, विपर्यस्य कुशमूलैः अग्रादारभ्य मूलपर्यन्तं स्रुवस्याधस्तात्सम्मृज्य (सम्मार्जनकुशानैशान्यां क्षिपेत्) ॥१९॥

अभ्युक्ष्य ॥२०॥

स्रुवं प्रणीतोदकेन न्युब्जेन पाणिना पवित्राभ्यामभ्युक्ष्य (पवित्रे प्रोक्षणीषु निदध्यात्) ॥२०॥

पुनः प्रतप्य निदध्यात् ॥२१॥

स्रुवं पूर्ववत् पुन प्रतप्य आत्मनो दक्षिणे भागे निदध्यात् ॥२१॥

आज्यमुद्वास्य ॥२२॥

अग्नेः सकाशात् आज्यम् उत्तरत उद्वास्य उत्तार्य (अग्नेः पश्चान्निदध्यात) ॥२२॥

उत्पूय ॥२३॥

आज्यम्—[2]हस्तद्वयस्यानामिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां उत्पूय उच्छाल्य ॥२३॥

अवेक्ष्य ॥२४॥

तदाज्यमवेक्ष्य अवलोक्य । (सत्यपद्रव्ये तन्निरसनं कुर्यात्) ॥ २४ ॥

---

(१) सम्मार्गाय त्रयः प्रोक्ता उपग्रहकुशास्तथा ।
त्रयो वा पञ्च वा सप्त नवैकादश वा तथा ॥
त्रयोदश समुद्दिष्टाः सर्वभूमिषु याज्ञिकैः ।

(२) अङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्याम्पाणिभ्यामुत्पुनाति ।
(आ० गृ० १, ३, ३,)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रोक्षणीश्च पूर्ववत् ॥२५॥

ततः पूर्ववत् ताभ्यां पवित्राभ्यां प्रोक्षणीश्च अप उत्पूय (पवित्रे प्रणीतासु निदध्यात्) ।।२५।।

उपयमनान् कुशानादाय समिधोभ्याधाय पर्युक्ष्य जुहुयात् ॥२६॥

उपयमनान् कुशान् दक्षिणेन आदाय गृहीत्वा सव्यहस्ते कृत्वा उत्तिष्ठन् [१] पालाशीः प्रादेशमात्रीः तिस्रः समिधः प्रागग्रा अग्नावभ्याधाय— प्रक्षिप्य प्रोक्षण्युदकेनाग्निं प्रदक्षिणं पर्युक्ष्य परिषिच्य जुहुयात् श्रुवेण वक्ष्यमाणं होमं कुर्यात् ।।२६।।

एष एव विधिर्यत्र क्वचिद्धोमः ॥२७॥

यत्र क्वचिद्धोमः शान्तिकपौष्टिकादिष्वपि गृह्याग्निव्यतिरेकेण, तत्रापि एष एव विधिः स्यात् ।२७।।

इति प्रथमस्य प्रथमा कण्डिका ॥१॥

गृह्यस्थालीपाकानां कर्म वक्ष्यते इति प्रतिज्ञातम् ।

अधुना गृह्योऽग्निः कथं कदा चोत्पद्यत इत्याह—

आवसथ्याऽऽधानं दारकाले ॥१॥

आवसन्ति जना अस्मिन् इति आवसथो गृहम् ।

आवसथे [२] गृहे भवोऽग्निः आवसथ्यः (आवसथ्यः, औपासनः,

---

(१) पलाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।
वैतसोदुम्बरो बैल्वः चन्दनः सरलस्तथा ।
शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः ॥

(२) चतुर्थीहोमानन्तरम् आवसथ्याऽऽधानमित्यनेन विधिना सम्पादितोऽग्निः स्मार्ताग्निरित्युच्यते । यदि तु तस्मिन् काले ग्रहणं न सुशकं तदा दायकाले सम्पादनीयः । यदि च कालद्वयेऽपि नाऽऽहितस्तदा पितर्युपरते द्वादशाहे सपिण्डनपक्षे तस्मिन्नेव दिने आधेयः । कालत्रयेऽपि यदि नाऽऽहितस्तदा यावान् कालोऽतीतस्तत्कालोक्तं प्रायश्चित्तमनुष्ठाय तदाऽऽधेयः । प्रायश्चित्तं च प्रतिवर्षं चान्द्रायणम् अशक्तौ प्राजापत्यं वा । चान्द्रायणस्य अष्टौ गावः प्रत्याम्नायाः, प्राजापत्यस्य च एका धेनुः । प्रतिवर्षं चतुर्विंशतिप्रस्थमिततण्डुलस्य यवस्य वा त्रि, प्रस्थमितस्य घृतस्य च हवनीयद्रव्यस्य दानमिति ।अस्मिन्नेवाऽग्नौ नित्यं सायम्प्रातरौपासनहोमः, पिण्डपितृयज्ञः,पक्षादिः पञ्च महायज्ञाः, दैनन्दिनपाकः, सप्तपाकयज्ञाश्चानुष्ठीयन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्यः, स्मार्तः, इत्यनर्थान्तरम्) आवसथ्यस्य आधानं स्थापनं आवसथ्याधानम् । दारकाले विवाहकाले चतुर्थीकर्मोत्तरं भवति ॥१॥

दायाद्यकाल एकेषाम् ॥२॥

एकेषाम् आचार्याणाम्मते दायाद्यकाले पैतृकद्रव्यस्य भ्रातृभिः सह विभागकाले आवसथ्याऽऽधानेऽधिकारः ॥२॥

वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य ॥३॥

बहवः पशवो यस्य स बहुपशुः तस्य बहुपशोः वैश्यस्य, गृहादसंस्कृतमग्निमानीय आधानं कुर्यात् ॥३॥

चातुष्प्राश्यपचनवत् सर्वम् ॥४॥

चतुर्भिः ऋत्विग्भिः (ब्रह्महोत्राध्वर्य्वाग्नीध्रैः प्राशितुं योग्यः ओदनः चातुष्प्राश्यः) चातुष्प्राश्यः पच्यते यस्मिन् कर्मणि तच्चातुष्प्राश्यपचनं श्रौताऽऽधानम् चातुष्प्राश्यपचनेन तुल्यं चातुष्प्राश्यपचनवत् । अस्मिन् आवसथ्याऽऽधाने सर्वं श्रौताधानेतिकर्तव्यतातिरिक्तं वसन्तादिकालविधानं श्रौताधानवत् ज्ञेयम् । एतेन वसन्तादि—ऋतुः, कृत्तिकादिनक्षत्रम्, अमावास्यादितिथिरूपःकालः, वपनं, दिवाभोजनम् अहतवासः परिधानं चेत्येतावत् श्रोताऽऽधानोक्तम् ववि‌ना लभ्यते न तु सर्वम् । सर्वस्यातिदेशे आवसथ्याधानमिति कण्डिकोक्तावसथ्याऽऽधानविधेर्वैयर्थ्यापातात् ॥४॥

अरणिप्रदानमेके ॥५॥

अरणिः[1] प्रदानं कारणं यस्य सोऽरणिप्रदानः तमरणिप्रदानम् । अरणिजन्यमग्निमेके आचार्या इच्छन्ति ॥५॥ कुतः—

(१) "अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ।
तस्य या प्राङ्मुखी शाखा, उदीची चोर्ध्वगापि वा ॥
अरणिस्तन्मयी ज्ञेया तन्मय्येवोत्तराऽरणिः ।
सारवद्दारवं चात्र मोविली च प्रशस्यते ॥
संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते ।
अलाभे त्वशमीगर्भामाहरेदविलम्बितः ॥
चतुर्विंशाङ्गुलैर्दीर्घा विस्तरेण षडङ्गुला ।
चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता ॥
अष्टाङ्गुलः प्रमन्थः स्याचात्रं स्याद्द्वादशाङ्गुलम् ।
श्रोविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चमहायज्ञा इति श्रुतेः ॥६॥

"अहरहः पञ्च महायज्ञाः" इति श्रुत्या पञ्चमहायज्ञानामनुष्ठानं श्रौतेऽग्नौ प्राप्नोति,

"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि।
पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही" ॥

इति स्मृतिबलात् आवसथ्येऽग्नौ तेऽनुष्ठीयन्ते। श्रुत्युक्तानां कर्मणां श्रौते, स्मृत्युक्तानां कर्मणां च स्मार्तेऽनुष्ठानमिति समस्त नियमः। अतोऽत्र पञ्चमहायज्ञानां कुतो न श्रौतेऽग्नावनुष्ठानमिति चेत्? श्रुतौ तेषां पाठमात्रस्य स्मृत्या "कुर्वीत" इति विधियोगेन बलवत्वात् स्मार्ताग्नावेवानुष्ठानम्। अनेनैवाऽभिप्रायेण आवसथ्याऽऽधानेऽपि आरण्योऽग्निः स्वीकर्तव्य इति एकेषां मतम्।

अग्न्याधेयदेवताभ्यः स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागविष्ट्वाऽऽज्याहुतीर्जुहोति। [1]त्वन्नो अग्ने-[2]सत्वन्नोऽअग्न-[3]इमम्मे व्वरुण-[4]तत्वायामि-[5]ये ते शतम्-[6]अयाश्चाग्न-[7]उदुत्तमं-[8]भवतन्न इत्यष्टौ पुरस्तात् ॥७॥

अग्न्याधेयस्य-श्रौताधानस्य देवताः (अग्निः पवमानः, अग्निः पावकः, अग्निः शुचिः, अदितिश्चेति चतस्रः) ताभ्यः अग्न्याधेयदेवताभ्यः स्थालीपाकमोदनं श्रपयित्वा-उक्तप्रकारेण पक्त्वा आज्यभागौ-आज्यभागसंज्ञकौ अग्नीषोमदेवताकौ इष्ट्वा हुत्वा "त्वन्नोऽअग्न" इत्यादिभिः प्रतीकोपात्तैः अष्टभिर्मन्त्रैः अष्टौ आज्येन आहुतीर्जुहोति। अयं चाष्टर्चहोमः अग्न्याधेयदेवताहोमात् पुरस्तात् पूर्वं कर्तव्यः ॥७॥

गोवालैः शणसन्मिश्रैः त्रिवृद्वृत्तमनंशुकम् ॥
व्यामप्रमाणं नेत्रं स्यात्तेन मथ्यो हुताशनः ॥

मन्थनदेशश्च—

मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाऽङ्गुलम्।
अन्तरा देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥
मूलादेकाङ्गुलं त्यक्त्वा अग्रात्सार्धाङ्गुलद्वयम्।
उत्तरार्धं पूर्ववत्।

(१) (अ. २१, २) (२) २१, (३) २१, १, (४) १७, ४९ (५) (का. श्रौ. सू.) २५, १, ११ (६) (का. श्रौ. सू) (२५, १, ११) (७) अ. १२, १२ (८) ५, ४।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति ॥८॥

अग्न्याधेयदेवताभ्यः पूर्वोक्ताभ्यः [1]चतसृभ्यः स्थालीपाकस्य स्थालीपाकेन हुत्वा, यथा स्थालीपाकात् पूर्वमष्टर्चहोमः कृतः एवम् अग्न्याधेयदेवताभ्यो हुत्वा उपरिष्टादनन्तरमपि अष्टर्गिभर्जुहोति ॥ ८ ॥

स्विष्टकृते च ॥९॥

ततः स्विष्टकृतेऽग्नये च स्थालीपाकेन जुहोति ॥९॥

"अयास्यग्नेर्वषट्कृतं[2] यत्कर्मणाऽत्यरीरिचं देवा गातुविद" इति।१०।

ततः[3] "अयास्यग्नेरिति" मन्त्रेण स्वाहान्तेन एकामाज्याहुतिं जुहुयात् ॥१०॥

बर्हिर्हुत्वा प्राश्नाति ॥११॥

परिस्तरणबर्हिः[4] हस्तेन हुत्वा प्रोक्षणीपात्रस्थापितं होमशेषद्रव्यं प्राश्नाति भक्षयतीत्यर्थः ॥११॥

---

(१) अत्र चतुर्दश नित्या आहुतयः, चतस्रः स्थालीपाकाहुतयः, स्थालीपाकहोमस्य आदावन्ते च अष्टावष्टावाज्याहुतयः, एका अयास्यग्नेरिति, एवं पञ्चत्रिंशदाहुतयः स्मार्ताऽऽधाने भवन्ति ।

(२) गौतम ऋषिः, गायत्री छन्दः, गातुविदो देवा देवता, आज्यहोमे विनियोगः । हे गातुविदः ! गातुं यज्ञं विदन्तीति गातुविदः यज्ञवेत्तारो देवाः अग्नेः सम्बन्धि यद् वषट्कृतं हुतं, यत्—येन कर्मणा यजनविधिना कृत्वा अहमत्यरीरिचम्—अतिरिक्तं कृतवानस्मि, तेन कर्मणा प्रसन्नानां भवतां प्रसादादयासि अनश्वरमव्याहतमस्तु ॥

मन्त्रोऽयं शाखान्तरीयः, अत एव समग्रतया पठितः । सूत्रकाराणामयं नियमो यत् यामेकां शाखामवलम्ब्य तानि प्रवर्तन्ते तदा तत्रत्यान्मन्त्रान् प्रतीकमात्रं गृहीत्वा विनियुञ्जते । शाखान्तरस्थानां विनियोगप्रसङ्गे समग्रं मन्त्रं पठित्वैव विनियुञ्जते । एवमग्रेऽपि बोध्यम् ।

(३) अत्र द्रव्यस्याविहितत्वेऽपि आज्यमेव द्रव्यम् ।
"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः" ॥ इति वचनात् ।

(४) "बर्हिर्होमश्चात्रैव वचनान्नान्यकर्मसु" इति सर्वे भाष्यकाराः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो ब्राह्मणभोजनम् ॥१२॥

तत एकस्मै ब्राह्मणाय[1] भोजनं दद्यात् ॥१२॥

इति प्रथमस्य द्वितीया कण्डिका ॥२॥

षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति ॥१॥

षट् पुरुषा अर्घ्या अर्घार्हा अर्घयोग्या भवन्तीति शेषः ॥

के वे ? इत्याकाङ्क्षायामाह—

(१) आचार्यः—उपनयनपूर्वकं कृत्स्नवेदाध्यापकः ।

(२) ऋत्विक्—यो दक्षिणादिना परिक्रीतः श्रौतस्मार्तादीनि कर्माणि करोति ।

(३) वैवाह्यः—जामाता उपयमनार्थं वृतो वर इत्यर्थः ।

(४) राजा—दण्डप्रदानपूर्वकं प्रजापरिपालनेऽधिकृतोऽभिषेकादिगुणयुक्तः क्षत्रियः ।

---

(१) एकद्वित्रिबहूनां समासस्य तुल्यत्वात् एकस्मिन्नपि चरितार्थत्वादेकस्यैव भोजनम् । यत्र बहूनां भोजनं तत्र स्वयमेवोपदिशति । यथा—"सꣳस्थिते कर्मणि ब्राह्मणान् भोजयेत्" इति । (पा.गृ.कां. २ कं. १७ सू. १९) अत्र स्मृत्यन्तरोक्तं त्रयस्त्रिंशद्ब्राह्मणभोजनमपि भवति । तथाच यज्ञपार्श्वे—

"गर्भाधानादिसंस्कारे ब्राह्मणान् भोजयेद्दश ।
शतं विवाहसंस्कारे पञ्चाशन्मेखलाविधौ ॥
आवसथ्ये त्रयस्त्रिंशच्छ्रौताऽऽधाने शतात्परम् ।
अष्टकं भोजयेद् भक्त्या तत्तत्संस्कारसिद्धये ॥
सहस्रं भोजयेत् सोमे ब्राह्मणानां शतं पशौ ।
चातुर्मास्येषु चत्वारि शतं पञ्च सुराग्रहे ॥
अयुतं वाजपेये च ह्यश्वमेधे चतुर्गुणम्" ॥ इति

अत्रेयं व्यवस्था—यत्र ततो ब्राह्मणभोजनमिति सूत्रमस्ति तत्रैकं सूत्रोक्तं ब्राह्मणं पूर्वं भोजयित्वा परिशिष्टोक्तमपि ब्राह्मणभोजनमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५) **प्रियः**—प्रियशब्देन उत्कृष्टजातेः समानजातेर्वा ग्रहणम् ।

(६) **स्नातकः**—ब्रह्मचर्यात्समावृत्तः स्नातकः, तस्यार्चनमाचार्यकर्तृकं बोध्यम् ॥ १ ॥

प्रतिसम्वत्सरानर्हयेयुः ॥२॥

प्रतिसम्वत्सरं प्रत्यब्दं गृहे आगतानेतानाचार्यादीन् अर्हयेयुः अर्घेणार्चयेयुः न ततः प्रागित्यर्थः ॥२॥

यक्ष्यमाणास्त्वृत्विजः ॥३॥

यक्ष्यमाणाः—यज्ञं करिष्यन्तो यजमानाः तु पुनः ऋत्विजो याजकान् अर्चयेयुरिति अनुषङ्गः । न तेषां कृते प्रतिवर्षनियमः ॥३॥

आसनमाहार्याऽऽह "साधु भवानास्तामर्चयिष्यामो भवन्तमि"ति ॥४॥

आसनं—वारणवृक्षोद्भवं दारुमयं पीठादि, आहार्य निजभृत्यैरानाय्य आह ब्रवीत्यर्चकः । किं ब्रवीति तदाह—भवान् पूज्यः साधु सुखं यथा स्यात् तथा आस्ताम् अत्र तिष्ठतु उपविशत्वित्यर्थः । भवन्तं पूजनीयम् वयम् अर्चयिष्यामः पूजयिष्याम इति ॥४॥

आहरन्ति विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधि-मधुघृतमपिहितं कांस्ये कांस्येन ॥५॥

आहरन्ति आनयन्ति यजमानपुरुषाः, विष्टरम्[१] "पञ्चविंशतिदर्भ-तरुणमयं कूर्चम्", पद्यं पद्भ्यामाक्रमणीयं द्वितीयं विष्टरं, पादार्थमुदकं—पादप्रक्षालनार्थं ताम्रादिपात्रस्थं जलम्, अर्घं गन्धपुष्पाक्षताद्यन्वितं हिरण्यादि पात्रस्थमुदकम्, आचमनीयम्, आचमनार्थमुदकमेव । दधिमधुघृतमपिहितं-कांस्ये कांस्येन, एकस्मिन् कांस्यभाजने कृतं दधि मधु घृतम् अपरेण कांस्य-भाजनेनाच्छादितं मधुपर्कशब्देन उच्यते । आनयन्ति इति सर्वत्रानुषङ्गः ॥५॥

---

(१) पञ्चविंशतिदर्भैरधोमुखाग्रैर्वामावर्तेन यथा वेणी भवति तथाऽग्रे गुम्फितैरग्रे ग्रन्थियुतैर्विष्टरं सम्पादयेत् ।

परिशिष्टे— "पञ्चाशता भवेद् ब्रह्मा तदर्धेन तु विष्टरः ।
ऊर्ध्वकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः ॥
दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टरः ।
पञ्चविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषिता ॥" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि ॥६॥

अन्यः—पूज्यपूजकाभ्यामतिरिक्तो यजमानपुरुषो विष्टरादीनि—विष्टर आदिर्येषां तानि विष्टरादीनि द्रव्याणि, त्रिस्त्रिः प्राह—वारत्रयमनु ब्रूयात्, विष्टरो विष्टरो विष्टर इति। (एवमर्घादिद्रव्येषु बोध्यम्) ॥६॥

विष्टरं प्रति गृह्णाति ॥७॥

विष्टरं प्रति गृह्यतामित्याह अर्चक इति तदर्थः। (ग्रहणं तूष्णीम्) ॥७॥

"वर्ष्मोऽस्मि[1] समानानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाऽभिदासति" इत्यनेनाभ्युपविशतीति ॥८॥

ततोऽर्चयितुः सकाशाद्विष्टरं पञ्चविंशतिकुशात्मकं तूष्णीमेव प्रतिगृह्य

पञ्चाशदर्धं पञ्चविंशतिः। तावत्सङ्ख्यैर्दर्भैर्विष्टरो भवतीत्यर्थः। केशा अग्राणि निर्माणकाले ऊर्ध्वानि यस्य स ब्रह्मा। लम्बानि लम्बमानानि अधोमुखानि निर्माणकालेऽग्राणि यस्य स विष्टरः।

कुशाभावे तु—

"यज्ञवास्तुनि मुष्टौ च स्तम्बे दर्भवटौ तथा।
दर्भसङ्ख्या न विहिता विष्टरास्तरणेषु च" ॥
इति छन्दोगपरिशिष्टोक्तं ग्राह्यम्।

ग्रहणोपवेशनयोर्मध्ये पठितोऽपि मन्त्र इमं तमभितिष्ठामीति लिङ्गात् उपवेशने विनियुज्यते।

एतच्च पादप्रक्षालनोत्तरं द्रष्टव्यम्, तथा सति दृष्टार्थता स्यात् ॥

(१) अथर्वणोऽनुष्टुप् विष्टरो देवता उपवेशने विनियोगः—
समानानां समानजातीयानां मध्ये अहं श्रेष्ठो ज्येष्ठः अस्मि भवामि। उद्यताम्—उदयं प्रकाशं कुर्वतां ग्रहतारादीनां मध्ये सूर्य इव। किं च इमं विष्टरं तं पुरुषमुद्दिश्य विष्टरवद् बद्धमभिलक्षीकृत्य अभिभूय वा तिष्ठामि अधः कृत्वा उपर्युपविशामि। यः कश्चन मा माम् अभिदासति उपक्षीणं कर्तुमिच्छति।

अत्र संस्कारप्रदीपे—"विष्टरः प्रतिगृह्यतामित्येव वक्तव्यम्। अदत्तस्य दानाऽयोगात्। दानाभिलापकशब्दप्रयोगस्य युक्तत्वात्। एवम् अर्हणीयेनापि "विष्टरं प्रतिगृह्णामि" इति वक्तव्यम्, उक्तयुक्तेः। "विष्टरं तूष्णीं वर आदत्ते इति हरिहर-लिखनं वैदिकमन्त्राभावपरतयोन्नेयम्" इति यद्यप्युक्तमस्ति, तथापि हरिहरगदाधर-संस्कारभास्करादिनिबन्धेषु कुत्रापि "प्रतिगृह्यताम्" "प्रतिगृह्णामि" इत्यनुपलम्भात् उक्तशब्दद्वयमनुच्चार्यमेवेति दिक्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आसने निधाय "वर्ष्मोऽस्मि० सति" इत्यन्तेन मन्त्रेण अभ्युपविशति ॥८॥

पादयोरन्यं विष्टर आसीनाय ॥९॥

पादयोः चरणयोरधस्तात् निधानार्थं विष्टरे आसीनाय—उपविष्टायार्घ्याय अन्यं द्वितीयं विष्टरं दद्यादित्यर्थः ॥९॥

सव्यं पादं[1] प्रक्षाल्य दक्षिणं प्रक्षालयति ॥ १० ॥

ब्राह्मणश्चेद्दक्षिणं प्रथमम् ॥ ११ ॥

"विराजो[2] दोहोऽसि विराजो दोहमशीय ।
मयि पाद्यायै विराजो दोह" इति ॥ १२ ॥

ततोऽन्येन पुरुषेण पाद्यं पाद्यं पाद्यमिति त्रिरुक्तेऽर्चकेन प्रतिगृह्यतामित्युक्ते प्रतिगृह्णामि इति प्रतिगृह्यार्च्यः "विराजो० दोह" इति मन्त्रेण सव्यं पादं वामचरणं प्रक्षाल्य ततो दक्षपादं प्रक्षालयति प्रक्षालयेत् क्षत्रियादिः पूज्यश्चेत् ॥ ०॥११॥

चेद्यदि ब्राह्मणोऽर्च्यस्तदा दक्षिणपादं प्रक्षाल्य[1] ततो वामपादं प्रक्षालयेदित्यर्थः ॥ १२ ॥

अर्घं प्रतिगृह्य "त्याप स्थ युष्माभिः[3] सर्वान्कामानवाप्नवानी" ति ॥१३॥

(१) "योऽस्य पादौ प्रक्षालयति" "प्रक्षालयितारमुपस्पृश्य" (आप०गृ-५, १३, ६') इत्यनेन प्रक्षालनमन्यकर्तृकं प्रतिभाति ।

रेणुस्तु—"विराज इति मन्त्रेण तद् गृहीत्वोदकं वरः ।
पादौ प्रक्षालयेत्तूष्णीं स तेन स्वयमात्मनः ॥" इति ।
"सर्वेषु धर्मकार्येषु पत्नी दक्षिणतो भवेत् ।
अभिषेके विप्रपाद-क्षालने चैव वामतः ॥" इति

(२) प्रजापतिर्यजुरापः क्षालने विनियोगः—

हे उदक ! त्वं प्राणधारणादिगुणैः सर्वोपकारित्वेन विशेषेण राजत इति विराट् अन्नम् "अन्नं वै विराडि" ति श्रुतः तस्य विराजो दोहः परिणामो रसस्त्वमसि भवसि । हे उदक ! तं त्वां विराजो दोहमशीय अश्नुवै व्याप्नुयाम् । किं च मयि विषये या पाद्या पादयोः साध्वी सपर्या पूजा पाद्या, तस्यै तदर्थं विराजो दोहः मन्त्रसंस्कृतं जलं भवेति शेषः ।

(३) हे आपः ! यूयम् आप स्थ आप्तिहेतवो भवथ । युष्माभिः कृत्वा सर्वान् कामानभीष्टार्थान् अवाप्नवानि लभेयमिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽर्घोऽर्घोऽर्घ इत्यन्तेन त्रिरुक्ते यजमानदत्तमर्घम्[1] "आप० वानि" इत्यन्तेन मन्त्रेण प्रतिगृह्णाति स्वीकरोतीत्यर्थः ॥१३॥

निनयन्नभिमन्त्रयते—"समुद्रं[2] वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टाऽस्माकं वीरा मा परासेचि मत्पय" इति ॥१४॥

शिरसाऽभिवन्दितं प्रतिगृहीतमर्घं निनयन् भूमौ प्रवाहयन् "समु० मत्पय" इत्यन्तेन मन्त्रेण अभिमन्त्रयते न तु मन्त्रसमाप्तौ ॥१४॥

---

(१) "दातुरर्घ्योऽर्घमादाय तस्माच्छिरसि धारयेत्।
मन्त्रान्ते सर्वकामः स किञ्चित्पुष्पादिकं वरः ॥" इति

तथा—"गृहीत्वाऽर्घं वरस्तस्मात्पुष्पं दत्वा स्वमूर्धनि"।
"करयुग्मेन तं भूमौ मौलिपर्यन्तमानयेत्।
शनैरानम्येशदिशि तं मन्त्रेण समुत्सृजेत्॥" इति

अर्घ्यते अनेनेत्यर्घशब्देनाऽऽप एवोच्यन्ते "आप स्थ" इति मन्त्रलिङ्गादिति **कर्कादयः।**

गन्धपुष्पाक्षतकुशतिलशुभ्रसर्षपदधिदूर्वान्वितं सुवर्णादिपात्रस्थमुदकमिति **हरिहरः।**

"कुशचन्दनपुष्पाणि चाक्षतानुदकं तथा।
पयो दधि तथा रुक्ममष्टाऽङ्गोऽर्घः करग्रहे ॥" इति

"तण्डुलापः कुशाग्राणि क्षीरं दधि यवाऽक्षताः।
सिद्धार्थकाश्च पुष्पाणि अष्टाऽङ्गोऽर्घः प्रकीर्तितः ॥" इति च ।

"कांस्यपात्रं भवेद्विप्रे स्वर्णपात्रं तु भूमिपे।
रौप्यपात्रं भवेद्वैश्ये लौहपात्रं च शूद्रके ॥" इति संग्रहे ।

रेणुकारिकायाम्— "अमहीमयपात्रस्थ-मर्घं तस्मै प्रयच्छति ॥" इति
"पाद्यं तु पादयोर्दद्यादर्घं दद्याच्छिरोपरि"

इति वचनेन शिरस्यर्घदानप्रतीत्या शिरसैवार्घग्रहणं युक्तं, शिरसा ग्रहणं च हस्तेन, एतदभिप्रायकमेव "शिरसाऽभिवन्द्य शिरसि किञ्चिदक्षतादिकं दत्वा" इत्यादि लेखनं कुत्रचित्पद्धतिषु दृश्यते।

(२) आथर्वणोऽनुष्टुप् अपामभिमन्त्रणे विनियोगः—

हे आपः! वः युष्मान् समुद्रं प्रहिणोमि गमयामि। यूयं च स्वां योनिं मूलकारणं समुद्रमभिलक्षीकृत्य गच्छत। किं च युष्मत्प्रसादात् अस्माकं वीराः पुत्राः भ्रातरश्च अरिष्टाः अनुपहिंसिताः सन्त्विति शेषः। तथा मत् मत्तः सकाशात् पयः अर्घ्यादिजलं मा परासेचि अपगतं मास्तु सदैवाहं पूज्यो भवानीत्यर्थः। अरिष्टाऽस्माकमित्यत्र सन्धिरार्षः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचामति "आऽमाऽगन्यशसा[1] सᳬसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्" इति ॥१५॥

ततोऽभिमन्त्रणानन्तरम् आचमनीयमाचमनीयमाचमनीयमित्यन्येनोक्ते अर्चकेन दत्तमाचमनीयं प्रतिगृह्य "आमा० तनूनाम्" इत्यन्तेन मन्त्रेण आचामति सकृत्प्राश्नाति जलमिति शेषः ॥१५॥

मित्रस्य त्वेति मधुपर्कं प्रतीक्षते ॥१६॥

[2]मधुपर्को मधुपर्को मधुपर्क इत्यन्येनोक्ते प्रतिगृह्यतामित्यर्चकेनोक्ते "मित्रस्य त्वा" इति मन्त्रेण पूर्वमुद्घाटितम् अर्घयितुः करस्थं मधुपर्कं ईक्षते पश्यतीति विवेकः ॥ १६ ॥

देवस्य त्वेति प्रतिगृह्णाति ॥१७॥

अर्घयितुर्दत्तं मधुपर्कं दक्षकरेण प्रतिगृह्णाति "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि" इत्यनेन मन्त्रेण पूज्यः १७

सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति-"नमः [3]श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि" इति ॥१८॥

(१) परमेष्ठी, बृहती, आप, आचमने विनियोगः—
हे जलेश वरुण ! तं सेवमानं मा मां यशसा अमा सहभावम् आ अगन् आगमय। तथा वर्चसा ब्रह्मवर्चसेन संसृज मां संसृष्टं कुरु। किं च प्रजानां प्रियं श्रेष्ठं कुरु। पशूनां गवाश्वादीनामधिपतिं स्वामिनंकुरु । तथा तनूनाम् देहावयवानां अरिष्टम् अहिंसकं सुकर्मकरत्वेन सुखजनकं कुरु इति सर्वत्र सम्बन्धः।

(२) "कांस्यपात्रं भवेद्विप्रे स्वर्णपात्रं च भूमिपे।
रुक्मपात्रं भवेद्वैश्ये लौहपात्रं च पादजे" इति विशेषो **गदाधरटीकायाम्।**
"आज्यमेकपलं ग्राह्यं दध्नस्त्रिपलमेव च ।
मधुनः पलमेकं तु द्विपलं मधु कीर्तितम्" ॥ इति स्मृत्यन्तरे।
तथा —"सर्पिश्च पलमेकं तु द्विपलं मधु कीर्तितम् ।
पलमेकं दधि प्रोक्तं मधुपर्कविधौ बुधैः" ॥ इति च ।
"संशोधितं दधि मधु कांस्यपात्रे स्थितं घृतम् ।
कांस्येनान्येन सञ्छन्नं मधुपर्क इतीर्यते" ॥ इति च स्मृत्यन्तरे ।

(३) हे अग्ने ! ते तुभ्यं नमः । किं भूताय श्यावमास्यं यस्य तस्मै श्यावास्याय कपिशमुखाय । ते तव अन्नशने अन्नाशने अयत इत्यत्रं तस्याशने अदनीये मधुपर्के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं मधुपर्कं सव्ये पाणौ कृत्वा वामे करे निधाय दक्षिणस्य सव्येतरहस्तस्य अनामिकया अनामिकाङ्गुल्या त्रिस्त्रिवारं प्रयौति प्रदक्षिणक्रमेण त्रिवारमालोडयतीति भावः ॥१८॥

अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति ॥१९॥

अनामिका च अङ्गुष्ठं चेत्यनामिकाङ्गुष्ठं तेन अनामिकाङ्गुष्ठेन च त्रिस्त्रिवारं निरुक्षयति[1] मधुपर्कैकदेशं पात्रतो बहिः प्रक्षिपतीत्यर्थः ॥१९॥

तस्य त्रिः प्राश्नाति "यन्मधुनो [2]मधव्यं परम७ँ रूपमन्नाद्यम् । तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि" इति ॥२०॥

तस्य मधुपर्कस्यैकदेशमादाय "यन्मधु० सानि" इत्यन्तेन मन्त्रेण त्रिः[3]प्राश्नाति वारत्रयं भक्षयति मधुपर्कम् । प्रतिप्राशनं मन्त्रावृत्तिः ॥२०॥

यद् द्रव्यमाविद्धं संश्लिष्टमनदनीयं तत् निष्क्रन्तामि निरस्यामीत्यर्थः । अन्नशन इत्यत्र शकन्ध्वादित्वात्पररूपम् ।

(१) "दुग्धे तु रोमबाहुल्यं घृतमध्ये च मक्षिका ।
तद्दोषपरिहारार्थं त्रिर्निरुक्षणमुच्यते" ॥ इति **गदाधरटीकायाम् ।**

(२) हे देवाः ! मधुनो मकरन्दस्य यन्मधव्यं मधुनि साधु परममुत्कृष्टं रूपयति प्रकाशयति देहसङ्घातमिति रूपम् । अन्नाद्यं व्रीह्यादिवत्प्राणधारकमन्नोपादानकं च । तेन सर्वरूपोपपन्नेन रसेनोक्तविशेषणविशिष्टेनाहं परमः सर्वेभ्यो गुणाधिकः मधव्यो मधुपर्कार्हः अन्नादः सदन्नभोक्ता च असानि भवानि ।

(३) "प्रतिगृह्यैव राजा स्थपतिर्वा पुरोहिताय" (आप० गृ० ५, १३, १४) इति वचनात् राजा मधुपर्कमादाय प्राशनमकृत्वा पुरोहिताय दद्यात् । पुरोहितस्तं प्राश्नीयात् इति ॥

मधुपर्कप्राशने मध्ये शौचार्थमाचमनं न कर्तव्यम्, किन्तु उच्छिष्ट एव द्वितीयं तृतीयं च प्राशनं कुर्यात् प्राणाग्निहोत्रवत्, सोमभक्षणवच्च । तथा च गृह्यासंग्रहः—"मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च ।
अनुच्छिष्टो भवेद् विप्रो यथा वेदविदो विदुः" ॥ इति

अङ्गिराः— "ताम्बूलेक्षुफले चैव भुक्तस्नेहानुलेपने ।
मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत्" ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मधुमतीभिर्वा प्रत्यृचम् ॥२१॥

वा–अथवा "मधुव्वाता ऽऋतायते" इति तृचेन प्रत्यृचं प्राश्नाति ।२१।

मधुपर्कशेषप्रतिपत्तिमाह–

पुत्रायान्तेवासिने वोत्तरतऽ आसीनायोच्छिष्टं दद्यात् ॥२२॥

पुत्राय–सूनवे अन्तेवासिने–उपनयनप्रभृति छात्रत्वेन आचार्यगृहनिवासिने शिष्याय वा, किं भूताय-उत्तरत आसोनाय, उच्छिष्टं प्राशितावशिष्टं मधुपर्कं दद्यात् प्रयच्छेत् ॥२२॥

सर्वं वा प्राश्नीयात् ॥२३॥

वा-अथवा सर्वं प्राशितशेषं मधुपर्कं स्वयमेव प्राश्नीयात्–भक्षयेत्॥२३॥

प्राग्वाऽसञ्चरे निनयेत् ॥२४॥

वा-अथवा प्राक्-प्राच्यां दिशि असञ्चरे जनसञ्चाररहिते देशे निनयेत् परित्यजेदित्यर्थः ॥२४॥

आचम्य प्राणान्त्संमृशति—"वाङ् म आस्ये, नसोः[1] प्राणोऽ,क्ष्णोश्चक्षुः, कर्णयोः श्रोत्रं, बाह्वोर्बलमूर्वोरोजो, ऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह" इति ॥२५॥

आचम्य प्राणान् प्राणायतनानि मुखादीनि "वाङ् म आस्य" इत्यादिभिर्मन्त्रैः प्रतिमन्त्रं यथालिङ्गं सम्मृशति हस्तेन स्पृशति । अत्र सर्वत्र साकाङ्क्षत्वात् 'अस्तु' इत्यध्याह्रियते। 'मे इति' पदं सर्वत्र अनुषज्यते। तथा च वाङ् म आस्ये अस्तु, नसोर्मे प्राणः अस्तु. इत्यैवमादिर्मन्त्रप्रयोगः । अरिष्टानि इत्यत्र 'सन्तु' इत्यध्याहारः श्रुतपदानयनमनुषङ्गः । अश्रुतपदानयनम् अध्याहारः ॥२५॥

"न सोमेनोच्छिष्टा भवन्ति" इति लघुहारीतवचनादन्तेऽपि सोमपाने नाचमनम् ।

(१) प्रजापतिर्यजूंषि लिङ्गोक्तदैवतानि गात्रालम्भे विनियोगः । मन्त्रार्थः— ने मम वाक् वागिन्द्रियं आस्ये अस्तु । तथा नसोर्नासिकयोः गोलकयोः प्राणः प्राणवायुः अस्तु । अक्षणोर्नेत्रगोलकयोश्चक्षुरिन्द्रियमस्तु । कर्णयोः श्रोत्रं श्रवणेन्द्रियमप्यस्तु । बाह्वोर्बलं कर्मशक्तिरस्त । ऊर्वोरोजः गमनशक्तिरस्तु । तन्वा अवयविना सह मेऽङ्गानि अनुक्तानि च अरिष्टानि अहिंसितानि सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह ॥२६॥

आचान्तमुदकं येनासौ आचान्तोदकस्तस्मै अर्घ्याय शासं-खड्गम् आदाय-गृहीत्वा गौर्गौर्गौरिति वारत्रयं प्राह अर्चकः। आचान्तोदकायेति तादर्थ्ये चतुर्थी ॥ २६ ॥

प्रत्याह "माता [1]रुद्राणां दुहिता वसूना२ स्वसाऽऽदित्यानाममृतस्य नाभिः। प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट। मम चाऽमुष्य च पाप्मान२ँ हनोमि" इति यद्यालभेत ॥२७॥

ततोऽर्घ्यः "मातेत्यादि वधिष्टे" त्यन्तं पठित्वा मम चामुष्य शर्मणो यजमानस्य च पाप्मानं हनोमि इति पठति, यदि आलभेत गाम्, ॥२७॥

अथ यद्युत्सिसृक्षेन्मम चाऽमुष्य च पाप्मा हत ॐ उत्सृजत तृणान्यत्त्विति ब्रूयात् ॥२८॥

अथानन्तरं यद्यर्घ्यो गामुत्सिसृक्षेत्-उत्स्रष्टुमिच्छेत्तदा "माता रुद्राणामित्युक्त्वा मम च अमुष्य च पाप्मा हतः "ॐ उत्सृजत[2] तृणान्यत्त्व"

(१) ब्रह्मा त्रिष्टुप् गौः अभिमन्त्रणे विनियोगः—

हे पूजकाः ! यत इयं गौः रुद्राणां माता जननी, वसूनां दुहिता कन्या, आदित्यानां स्वसा भगिनी, अमृतस्य पीयूषस्याज्यस्य च नाभिराश्रयः कारणम्, अतो हेतोः चिकितुषे चेतनावते जनाय अहमेवं प्रवोचं प्रब्रवीमि, किमित्यत आह—अनागाम्-अनपराधाम् अदितिम् अखण्डनीयामिमां गां मा वधिष्ट वधं मा कुरुत। तर्हि कथं सन्तोष इत्यत आह-मम च अमुष्य यजमानस्य च गोस्थाने पाप्मानं हनोमि हन्मि।

(२) "विधाय वाऽपि गां कौशीं विधिं तत्र समाप्य च।
गामुद्धृत्य च गां कौशीमैशान्यां तान् कुशान् त्यजेत्" इति गदा. टी.

अत्र बहुषु अर्वाचीनेषु पुस्तकेषु "तृणं छिन्द्यात्" इति पाठो दृश्यते। अत्र मूलं नोपलभ्यते, तदित्थमिह तर्कः। पाप्मा हत इत्युच्यते तत्र तद्धननमनुभूतम्। तस्माद्यथा विष्टरे वैरंध्यासं कृत्वा तदधःकरणमेव वैरंधःकरणं, तथेहापि तृणे एव पापाध्यासं कृत्वा तच्छेदनमेव पापहननमिति प्रदर्शनाभिप्रायेण तथाऽऽचरणमिति **संस्कारदीपके** हर्षनाथझाकृते।

यज्ञविवाहयोरुत्सर्गः कार्यं इत्याह **आपस्तम्बः**—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति ब्रूयात्। अत्रापि अमुष्य स्थाने अर्चयितुर्नामनिर्देशः ॥२८॥

एवं गवालम्भस्य सर्वत्र विकल्पे प्राप्ते क्वचिन्नियमयति—

न त्वेवामांऽसोऽर्घः स्यात् ॥२९॥

तुशब्दः पक्षं व्यावर्तयति। अमांसः मांसरहितः अर्घो न स्यात् नैव भवेत् ॥२९॥

अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात् ॥३०॥

अधियज्ञं यज्ञे, अधिविवाहं विवाहे कुरुत-गवालम्भं विदधत इति पाप्मानं हनोमि इत्यस्यान्ते ब्रूयात् वदेत् ॥३०॥

यद्यप्यसकृत्सम्वत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः ॥३१॥

यद्यपि सम्वत्सरस्य मध्ये असकृत् भूयो भूयः सोमेन यजेत तथापि एनं यजमानं कृतार्घ्या एव ऋत्विजो याजयेयुः नाकृतार्घ्याः, कुतः ? श्रुतेः, सूत्रेणैतेनेदं सूचितं यत् सोमयागार्थमेव वृता ऋत्विजोऽर्घ्याः नेतरयागायेति ॥ ३१ ॥

इति प्रथमस्य तृतीया कण्डिका ॥३॥

अग्निसाध्यानि कियन्ति कर्माणीत्याह—

चत्वारः पाकयज्ञा[1] हुतोऽहुतः प्रहुतः प्राशित इति ॥ १ ॥

पाकयज्ञा इति कर्मणां नामधेयानि। पच्यते श्रप्यते ओदनादिकमस्मिन्निति पाको गृह्याऽग्निः। तस्मिन् पाके नान्यत्रेति भावः। पाके यज्ञाः पाकयज्ञाः। ते—चतुष्प्रकारा भवन्ति। के ते ? हुत इत्यादि। हुतो होममात्रम्, यथा सायं प्रातर्होमः।

अहुतो यत्र न हूयते, यथा स्रस्तराऽऽरोहणम्। (स्रस्तराऽऽरोहणं नाम आवसथ्याग्निमतो मार्गशीर्ष्यां पौर्णमास्यां क्रियमाणः कर्मविशेषः। तत्र हि आवसथ्याग्नेः पश्चात् स्रस्तरं कुशसमूहम् आस्तीर्य, तत्र दक्षिणो-

"ऋष्युद्दिष्टं कलौ नैव पापं गोहत्यया समम्।
अतो विवाहे यज्ञे च गामानीय समुत्सृजेत्" इति।

(१) त्रयः पाकयज्ञा इत्याश्वलायनः (१, १, २)
लौकिकानां पाकयज्ञशब्दः इत्यापस्तम्बः (१, २, ६)।
एकाग्निसाध्याः पाकयज्ञा इत्यपरे। पाकयज्ञाः स्मार्तयज्ञा इति देवभाष्ये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तरक्रमेण पतिः जाया पुत्राश्च स्वपन्ति उत्तिष्ठन्ति च त्रिस्त्रिः इत्यादिको विधिर्भवति नान्यद्धोमादिकम्) (पा० गृ० का० ३ कं० २) ।

प्रहुतो यत्र हूयते बलिहरणं च, यथा पक्षादिः । (पक्षादिर्नाम—आवसथ्याग्निमतः प्रतिपदि प्रतिपदि क्रियमाणं कर्म)।

प्राशितो यत्र प्राश्यत एव न होमो न बलिहरणम् । 'यथा—सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान् भोजयेत्" (कां० ३, कं० १०) । कर्मेदं वृषोत्सर्गान्ते स्वतन्त्रतया केवलब्राह्मणभोजनात्मकं विहितम् ॥ १ ॥

पञ्चसु बहिः शालायां विवाहे चूड़ाकरण उपनयने केशान्ते सीमन्तोन्नयन इति ॥ २ ॥

विवाहादिषु पञ्चसु संस्कारकर्मसु बहिः बाह्यः गृह्यः लौकिकोऽग्निर्भवति । शालायां मण्डपे कर्म कर्तव्यम् ।

यद्वा—बहिःशालायामित्येकं पदम् । गृहाद् बहिर्बाह्या शाला तस्यां बहिः शालायां मण्डपे इति यावत् । अत्राऽप्यग्निर्लौकिक एव, तेन आवसथ्याग्निमतः सर्वं शान्तिकं पौष्टिकं विवाहसीमन्तोन्नयनादिकम् अग्निमतो द्वितीयविवाहश्च लौकिकाग्नावेव भवति ॥ २ ॥

उपलिप्त उद्धृताऽवोक्षितेऽग्निमुपसमाधाय ॥ ३ ॥

अस्यार्थः (१, १, सू० २–५) उक्तः ॥ ३ ॥

निर्मन्थ्यमेके विवाहे ॥ ४ ॥

एके आचार्याः विवाहे—पाणिग्रहणे निर्मन्थ्यमरणिमन्थनजन्यम् अग्निमिच्छन्ति । अन्ये तु लौकिकाग्निमेवेच्छन्ति ॥ ४ ॥

उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात् ॥ ५ ॥

उदगयने उत्तरायणे आपूर्यमाणपक्षे शुक्लपक्षे पुण्याहे ज्योतिःशास्त्रोक्ते शुभे दिने कुमार्याः अक्षतयोन्याः कन्यायाः वक्ष्यमाणेन विधिना पाणिं गृह्णीयात् ॥ ५ ॥

त्रिषु त्रिषूत्तरादिषु ॥ ६ ॥

स्वातौ मृगशिरसि रोहिण्यां वा ॥ ७ ॥

उत्तरा आदिर्येषां तानि उत्तरादीनि तेषु उत्तरादिषु त्रिषु त्रिषु । अर्थात्—उत्तरफल्गुन्योर्हस्ते चित्रायां च । उत्तराषाढासु च श्रवणे धनिष्ठासु च । उत्तरप्रोष्ठपदासु रेवत्यामश्विन्योश्च । एषु नक्षत्रेषु विवाहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति ॥ ६।७ ॥

तिस्रो ब्राह्मणस्य वर्णाऽऽनुपूर्व्येण ॥ ८ ॥

ब्राह्मणस्य वर्णानुपूर्व्येण वर्णक्रमेण तिस्रो ब्राह्मणी-क्षत्रिया-वैश्या विवाह्या भवन्ति ॥ ८ ॥

द्वे राजन्यस्य ॥ ९ ॥

द्वे क्षत्रिया वैश्ये राजन्यस्य क्षत्रियस्य विवाह्ये भवतः ॥ ९ ॥

एका वैश्यस्य ॥ १० ॥

एका वैश्या एव वैश्यस्य विवाह्या भवति ॥ १० ॥

सर्वेषाꣳ शूद्रामप्येके मन्त्रवर्जम् ॥ ११ ॥

सर्वेषां ब्राह्मणक्षत्रियविशां शूद्रामप्येके विवाह्यामिच्छन्ति । तत्र विशेषः—मन्त्रवर्जम्—मन्त्ररहितं यथा भवति तथा विवाहः कर्त्तव्यः । अयं चासवर्णविवाहः कलौ निषिद्धः ॥ ११ ॥

अथैनां वासः परिधापयति "जरां[1] गच्छ परिधत्स्व वासो भवाऽऽकृष्टीनामभिशस्तिपावा । शतं च जीव शरदः, सुवर्चा रयिं च पुत्राननु संव्ययस्वाऽऽयुष्मतीदं परिधत्स्व वास" इति ॥१२॥

अथाग्निस्थापनानन्तरम् एनां कुमारीम् अहतं वासः[2] परिधापयति परिहितं कारयति "जरां०वास" इत्यन्तेन मन्त्रेण ॥ १२ ॥

(१) प्रजापतिस्त्रिष्टुप् तन्तुदेव्यः परिधापने वि०—

हे कन्ये! त्वं जरां निर्दुष्टवृद्धत्वं मया सह गच्छ प्राप्नुहि। वासश्च मया सम्पादितं परिधेहि। आकृष्यन्ते कामादिभिरित्याकृष्टयो मनुष्याः। तेषामाकृष्टीनाम् अभिशस्ति पावा, अभिशस्तेः निन्दायाः पाति रक्षतीत्यभिशस्तिपावा। आतो मनिन्क्वनिब्वनिपश्चेति वनिप्। शतं च शरदो वर्षाणि जीव प्राणिहि। सुवर्चाः तेजस्विनी भूत्वा रयिं धनं पुत्रांश्च अनु पश्चात् संव्ययस्व उत्पाद्य राशिं कुरु। हे आयुष्मति! इदं वासः परिधत्स्व परिधेहि।

(२) अत्र वासःपरिधानादि कन्यादानान्तं कर्म क्वचित्पद्धतिषु गृहमध्ये उक्तं क्वचिन्मण्डपे, तथापि कन्यादानं मण्डप एव कर्तव्यम्, प्रधानस्य कन्यादानस्य मण्डप एव करणस्य युक्तत्वात्। अन्यथा तन्निर्मितेः स्वकर्तृकप्रधानकर्मण्यसम्बन्ध एव स्यादिति युक्तं चेद् ग्राह्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोत्तरीयम् "या अकृन्तन्[1] वयन्याऽ अतन्वत। याश्च देवीस्तन्तूनभितो ततन्थ। तास्त्वा देवीर्जरसे संव्ययस्वाऽऽयुष्मतीदं परिधत्स्व वासः" इति ॥ १३ ॥

अथ वस्त्रपरिधानानन्तरम् [2] उत्तरीयं वस्त्रं परिधापयति "या अकृ० वास" इत्यन्तेन मन्त्रेण वरः ॥ १३ ॥

अथैनौ समञ्जयति "समञ्जन्तु[3] विश्वेदेवाः समापो हृदयानि नौ ।

(१) प्रजापतिर्गायत्री विधात्र्यो वस्त्रधारणे वि० —

या देवीः देव्यः इदं वासः अकृन्तन् कर्तितवत्यः। या अवयन् वीतवत्यः ओतवत्य इत्यर्थः। या तन्तून् सूत्राणि अतन्वत प्रोतवत्यः तिर्यक् तन्तून् विस्तारितवत्यः। चकारात् याः ओतान् प्रोतांश्च तन्तून् अभितः उभयपार्श्वयोरपि ततन्थ तेनुः तुरीवेमादिव्यापारेण ग्रथितवत्यः । ताः तत्तत्सामर्थ्यदात्र्यो देव्यः रूपवदिदं वासः त्वा त्वां जरसे दीर्घकालनिर्दुष्टजीवनाय संव्ययस्व परिधापयन्तु। अतो हेतोः हे आयुष्मति ! इदं वासः परिधत्स्व उत्तरीयत्वेन स्वीकुरु॥ अभितो ततन्थेत्यत्र उत्वं छान्दसम् ।

(२) "आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः" (३,२७)

इति मनुना स्वदत्तवासोयुक्तायाः कन्यायाः दानविधानाद्वासो दानं कर्तव्यम्। एवं वरायापि वासोदानं पूजार्थमर्थाच्सिद्धम्। अत एव कुत्रचित् पद्धतिषु—"अद्येहामुकशर्माऽहं कन्यादानकर्मणः पूर्वाङ्गत्वेन वराय वस्त्रचतुष्टयं सम्प्रददे" इति सङ्कल्पवाक्यमप्युल्लिखितमस्ति ।

वासश्च शुक्लं रक्तं पीतं वा कुमार्या धार्यं शुक्लं वरेणेति—

मात्स्ये—धारयेदथ रक्तानि नारी चेत्पतिसंयुता ॥
विधवा नैव रक्तानि कुमारी शुक्लवाससी" इति
स्मृतितत्वे ।

"आच्छाद्य रक्तवासोभ्यां कन्यां शुक्लवासोभ्यां वरमिति" । एवं देशाचारानुरोधेन पीतवस्त्रायपि धारयितुं शक्यत एवेति ।

(३) अथर्वणोऽनुष्टुप् लिङ्गोक्ता देवता मैत्रीकरणे वि०—

हे कन्यके ! नौ आवयोः हृदयानि मनांसि तन्निष्ठव्यापारान् संकल्पविकल्पात्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं मातरिश्वा सं धाता समु द्रेष्ट्री दधातु नौ" इति ॥१४॥

अथ वस्त्रपरिधानोत्तरं कन्यापिता "युवां परस्परं [1]समञ्जेथाम्" इति प्रैषेण एनौ—वधूवरौ समञ्जयति सम्मुखौ करोति ॥ १४ ॥

पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति "यदैपि [2]मनसा दूरं दिशोऽनुपवमानो वा। हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसौ" इति ॥ १५ ॥

पित्रा-जनकेन पितुरभावे पितामहादिना वा प्रत्तां प्रदत्तां कन्यामादाय दानविधिना प्रतिगृह्य[3] गृहीत्वा-करं धृत्वा "यदै० असौ०" इत्यन्तेन म·

कान् विश्वे देवाः सम्यग्भूता आपश्च समञ्जन्तु गुणातिशयाधानेन संस्कुर्वन्तु। तथा सम्यग्भूतो मातरिश्वा अनुकूलो वायुः तथा अनुकूलः प्रजापतिः तथा देष्ट्री धर्मोपदेष्ट्री देवता आवयोर्हृदयानि सन्दधातु। उ अप्यर्थे।

(१) अत्र यद्यपि अनेकेषु पुस्तकेषु "समञ्जेथाम्" इत्येव पाठो दृश्यते, तथापि तत्र आत्मनेपदं चिन्त्यम्। समञ्जयेथामिति तु चौरादिकस्य अजिधातोः ण्यर्थणिजन्तस्य रूपम्। तत्र णिचश्चेति आत्मनेपदमुपपद्यते। अथवा समञ्जेथाम् इति कर्मलोडन्तं कल्प्यम्।

(२) आथर्वणोऽनुष्टुप् पवमानो देवता निष्क्रमणे वि०—

हे कन्यके! त्वं यदा मनसा चित्तेन दूरं देशं दिशः ककुभः अनुलक्षीकृत्य एषि गच्छसि, तदा पवमानो वायुः, हिरण्यपर्णः सुवर्णपक्षः, विकर्णाया अपत्यं पुमान् वैकर्णः स गरुत्मान् गरुडः त्वा त्वाम् मन्मनसां मद्गतचित्तां करोतु ममायत्तां मय्यनुरागिणीं विदधातु। असौ इति संबुद्ध्यन्त कन्यानाम ग्राह्यम्।

(३) अप्रतिग्रहस्यापि कन्याद्रव्यस्य प्रतिग्रहविधिना आदानं प्रतिग्रहो यथा स्यादित्येतदर्थं गृहीत्वा, आदायेत्युभयग्रहणम्।

ननु? कन्यां दद्यात्कन्यां प्रतिगृह्णीयादिति स्मरणात् कथमप्रतिग्रहयोग्यं कन्याद्रव्यमित्युच्यते? सत्यम्। उच्यते-स्वत्वत्यागपूर्वकं हि परस्वत्वापादानं दानम्। न च कन्या कथञ्चिदप्यस्वकन्या कर्तुं शक्यते, नापि परस्य कन्या भवति, विवाहोत्तरमपि ममेयं कन्या इत्यभिधानात्। एवं चात्र गौणो ददातिरिति।

रेणुस्तु—अप्रतिग्रहयोग्यस्य प्रतिग्रहविधानतः।
क्षत्रियादेर्यथा दानं स्यादादायेति सूत्रितमिति" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्त्रेण पितुरङ्कात् निष्क्रामति[४] स्वसमीपमानयति स्वदक्षिणत उपवेशयतीति यावत् ॥ १५ ॥

अथैनौ [१]समीक्षयति "अघोरचक्षुर[२]पतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे । सोमः प्रथमो विविदे गन्धर्वो विविदऽ उत्तरः। तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः। सोमोऽददद् गन्धर्वाय गन्धर्वोऽददद‌ग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो

(४) "कृत्वा सदक्षिणं कुम्भं चूतस्य प्रसवान्वितम् ।
वारिपूर्णं द्विजोऽन्योऽपि निष्क्रामेदनु दम्पती ॥
सोऽग्रेरुत्तरश्चाऽऽस्ते वाग्यतो दक्षिणेऽथवा" ॥ इति

(१) अत्रयवरा ईक्षणं समीक्षणमित्यनाकुला। वध्वा दृष्टौ स्वदृष्टिनिपातनं समीक्षणमिति तात्पर्य-व्याख्या। (आप. गृ. २, ४, ४) (२) चतुर्णां मन्त्राणां प्रजापतिर्द्वितीयस्यानुष्टुप् शेषाणां त्रिष्टुप् कुमारी समीक्षणे वि० —

हे कन्ये ! त्वम् अघोरचक्षुः सौम्यदृष्टिः अपापदृष्टिर्वा एधि भव। न घोरे अघोरे। अघोरे सौम्ये चक्षुषी यस्याः सा अघोरचक्षुः। तथा अपतिघ्नी अकार्यकरणेन पत्यर्थघातिनी मा भव। न पतिं हन्ति इत्यपतिघ्नी। तथा पशुभ्यः पशुवदाश्रितेभ्यः शिवा हितैषिणी च भव। सुष्ठु मनो यस्याः सा सुमनाः प्रसन्नचित्ता भव। सुवर्चाः सुप्रभावयुक्ता भव। वीरान् सूते इति वीरसूः सत्पुत्रजननी भव। देवकामा देवानग्न्यादीन् कामयते तादृशी, भव। स्योनं सुखं विद्यते यस्याः सा स्योना सुखवती भवानोऽस्माकं शं सुखहेतुर्भव। तथा द्विपदे मनुष्यवर्गाय चतुष्पदे पशुवर्गाय शं सुखहेतुर्भव।

हे कन्ये ! सोमश्चन्द्रः ते तव प्रथम आद्यः पतिः त्वां विविदे जन्मदिने लब्धवान्। ततः सार्धवर्षद्वयानन्तरं गन्धर्वः सूर्यः विविदे तव द्वितीयोऽयम् उत्तरः पतिः। ततोऽग्निरपि तावता कालेन विविदे अतोऽयं तव तृतीयः पतिः।

यथाहुः—"पूर्वं स्त्रियः स्युर्भुक्ताश्च सोमगन्धर्ववह्निभिः" इति ॥ तथा ते तव यावज्जीवं भोगाय तुरीयश्चतुर्थः मनुष्यजाः मानुषः अहमेवेत्यर्थः पतिः।

किमिदानीं चतुर्णामपीयं पत्नी नेत्याह-सोमश्चन्द्रः त्रिंशन्मासान् भुक्त्वा गन्धर्वाय सूर्याय अददद् ददौ। सोऽपि तावत्कालं भुक्त्वाऽग्नयेऽददत्। स चाग्निः मह्यमित्यददात् दत्तवान्। न केवलमिमां, किन्तु भाविनः पुत्रान् रयिं धनं च चाद्दर्मादि च अदादिति सम्बध्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽइमाम्। सा[A] नः पूषा शिवतमामेरय सा नऽ ऊरूऽ उशती विहर। यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा वहवो निविष्ट्या" इति ॥ १६ ॥

अथ निष्क्रमणोत्तरम् एनौ वधूवरौ "परस्परं समीक्षेथाम्" इति प्रैषेण "अघोर० निविष्ट्यै च" इत्यन्तेन मन्त्रेण समीक्षयति—समीक्षणं कारयति कन्यापिता ॥१६॥

इति प्रथमस्य चतुर्थी कण्डिका ॥ ४ ॥

प्रदक्षिणमग्निं पर्याणीयैके ॥१॥

एक आचार्या अग्निं प्रदक्षिणं पर्याणीय परिक्रम्य अग्निं प्रदक्षिणीकृत्य वासः परिधानं समञ्जनं समीक्षणं च मन्यन्ते। एके न मन्यन्ते, अतश्च विकल्पः ॥१॥

पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशति[1] ॥२॥

समीक्षणानन्तरमग्निं प्रदक्षिणीकृत्य अग्नेः पश्चिमतः प्राङ्मुख उपविशति वरः। वरस्य दक्षिणतो वधूः किं कृत्वा स्थापितां तेजनीं तृणपूलिकां कटं तृणमयं स्रस्तरं वा दक्षिणपादेन प्रवृत्य प्रक्रम्य आक्रम्य ॥२॥

अत्र वैवाहिकहोमप्रसङ्गेन सर्वकर्मसाधारणीं परिभाषामाह—

अन्वारब्धऽ आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतन्नित्यꣳ सर्वत्र ॥३॥

[A] या सर्वलोकसाक्षिणी पूषा देवतां सा इमां शिवतमां कल्याणगुणशीलां कृत्वा नः अस्मान् प्रति ऐरय ईरयतु। आटोऽदर्शनं विभक्तेरदर्शनं च छान्दसम्। अस्मासु अनुरक्तां करोत्वित्यर्थः। साऽत्र अस्मत्तः सुखं पुत्रांश्च कामयमाना ऊरू सक्थिनी जानुनोरूर्ध्वभागदण्डौ विहर विहरताम् वितृणोतु प्रसारयत्वित्यर्थः। प्रयोजनमाह—यस्यां स्त्रीयोनौ उशन्तः सुखमिच्छन्तः शेपं शिश्नम् इन्द्रियं प्रहराम प्रवेशयाम वयम्। 'उ एवार्थे' यस्यामेव त्वयि वहवः कामाः धर्मपुत्ररतिसुखरूपाः निविष्ट्यै अग्निहोत्राद्युपासनयाऽन्तःकरणशुद्धिद्वारा सायुज्यमुक्तये भविष्यन्ति पुत्रस्य पितृऋणापाकरणार्थत्वेन भार्यारतिसुखस्य विषयान्तरवैमुख्यकरणार्थत्वेन च सायुज्योपयोगित्वं बोध्यम् ॥

(१) "दक्षिणतः पतिं भार्योपविशति" (हि० के० गृ० १, ५, ५,)

४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वारब्धः ब्रह्मणा कुशेन दक्षिणवाहौ स्पृष्टो वर. प्रजापतये स्वाहा, इन्द्राय स्वाहा, इत्याघारौ, अग्नये स्वाहा, सोमाय स्वाहा, इत्याज्यभागौ, ॐ भूः स्वाहा, ॐ भुवः स्वाहा, ॐ स्वः स्वाहा, इति महाव्याहृतयः ॐ त्वन्नो अग्ने, सत्वन्नो अग्ने, अयाश्चाग्ने, ये ते शतम्, उदुत्तमम्, इति सर्वप्रायश्चित्तम्' ॐ प्रजापतये स्वाहा, इति प्राजापत्यम्, ॐ अग्नये स्विष्टकृते स्वाहा, इति स्विष्टकृत् इत्याहुतिचतुर्दशकं सर्वत्र हवनमात्रे नित्यम् अवश्यं भवति ॥ ३ ॥

प्राङ् महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः ॥४॥

यदि आज्यात्सकाशादन्यदपि चरुप्रभृति हविर्भवति तदा महाव्याहृतिभ्यः प्राक् पूर्वं स्विष्टकृद्धोमो भवति। अर्थात् केवलाज्यहोमे आघारावाज्यभागौ हुत्वा आज्येन प्रधानं च हुत्वा, ततो महाव्याहृत्यादिहोमं कृत्वा अन्ते स्विष्टकृद् भवति। आज्यातिरिक्तहौम्यद्रव्ये तु आघारावाज्यभागौ हुत्वा द्रव्यान्तरेण प्रधानं हुत्वा ततः स्विष्टकृद्होमस्ततो भूराद्या नवाहुतय इति क्रमः ॥ ४ ॥

विवाहे होमे क्रमविशेषमाह-

सर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानं विवाहे ॥५॥

विवाहे विवाहकर्मणि सर्वप्रायश्चित्तप्राजापत्यान्तरम् एतदावापस्थानं कर्तव्यम्। "त्वन्नो अग्ने०" "स त्वन्नो अग्ने०" "अयाश्चाग्ने०" "ये ते शतम्०" "उदुत्तमम्०" इत्याहुतिपञ्चकं सर्वप्रायश्चित्तमित्युच्यते। प्राजापत्यः प्राजापत्याहुतिः। सर्वप्रायश्चित्तं च प्राजापत्यश्च सर्वप्रायश्चित्तप्राजापत्यौ, सर्वप्रायश्चित्तप्राजापत्ययोरन्तरमन्तरालं सर्वप्रायश्चित्तप्राजापत्यान्तरं विवाहे एतदावापस्थानं कर्तव्यम्। एतासां वैवाहिकानामाहुतीनाम् आवापस्थानं समावेशः एतदावापस्थानम्। आवापश्च अन्यत्र विहितस्य होमजपादेः कर्मणः कर्मान्तरे प्रक्षेपः। आवापस्य 'आगन्तूनामन्ते निवेश' इति न्यायेन अन्ते निवेशः प्राप्तः, तन्निवृत्त्यर्थमेतद्वचनम्। अर्थात् विवाहे द्रव्यान्तरे लाजद्रव्ये सत्यपि न पूर्वोक्तो होमक्रमः किन्तु आघारौ आज्यभागौ महाव्याहृतीः सर्वप्रायश्चित्तं च हुत्वा सर्वं वैवाहिकं होमं समाप्य ततः प्राजापत्यः ततः स्विष्टकृदिति क्रमः ॥५॥

राष्ट्रभृत[1] इच्छन्। जयाभ्यातानांश्च जानन् येन कर्मणेत्सें-

(१) ऋताषाडृतधामा इत्याद्या द्वादश होमा राष्ट्रभृत इत्युच्यन्ते। तत्र ऋता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दितिं वचनात् ॥ ६ ॥ (तै० सं० ३, ४, ४,)

विवाहे विवाहहोमकर्मणि राष्ट्रभृतः राष्ट्रभृत्संज्ञकाः आहुतीः आवपेदित्यध्याहारः । अत्र जानन् शब्दो विकल्पार्थः । किं कुर्वन् इच्छन् राष्ट्रभृज्जयाभ्यातानानां होमफलं कामयन् । जयाश्च अभ्यातानाश्चेति जयाभ्यातानास्तान् तथोक्तांश्चावपेत् । इच्छया जुहोतीति कुत इति चेत् ! येन कर्मणा ऋद्धिमिच्छेत्, तत्र जयान् जुहोतीति वचनं भवति । अतश्चान्यत्रापि ऋद्धिमिच्छता जयाहोमः कार्य इति ॥६॥

अतः परं जयादिहोमानां मन्त्रानाह—

"चित्तं[१] च, चित्तिश्चा, कूतं चा, ऽऽकूतिश्च, विज्ञातं च, विज्ञातिश्च, मनश्च, शक्वरीश्च, दर्शश्च, पौर्णमासश्च, बृहच्च,

पाडित्यादि-मन्त्रषट्कमेव द्विधा विभज्य द्वादशतामापन्नम् ।

तथा च **कात्यायनः**—

"द्वादशगृहीतं विग्राहं जुहोत्यृताषाडिति प्रतिस्वाहाकारठं० राष्ट्रभृतो वाट्कारान्तः पूर्वः पूर्वो मन्त्रः" (इति १८ ।)

अस्यार्थः—"आज्याद्-द्वादशगृहीतं गृहीत्वा ऋतेत्यादि द्वादशमन्त्रैः प्रतिस्वाहाकारठं० राष्ट्रभृत्संज्ञा द्वादश आहुतीर्जुहोति । व्यतिषक्तेषु द्वादशमन्त्रेषु पूर्वः पूर्वो मन्त्रः स्वाहा व्वाडित्यन्तं उत्तरस्ताभ्यः स्वाहेत्यन्तः । ततो मन्त्रे यानि पुंल्लिङ्गानि स न इदं ब्रह्मेत्यादीनि तानि व्यवहितपठितान्यपकृष्य पठित्वा पूर्वो मन्त्रः सम्पाद्यः । यानि च स्त्रीलिङ्गानि तान्युत्कृष्य उत्तरो मन्त्रः सम्पाद्यः ।

अयमर्थः **शतपथेऽपि प्रतिपादितः** । तेन ऋता० गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा व्वाडित्येको मन्त्रः । ऋता० गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहेति द्वितीयः ।

(१) अत्र **कर्कः**—चित्तं च चित्तिश्चेत्यत्र केचिच्चतुर्थ्यन्तेन प्रयोगमिच्छन्ति । तदयुक्तम्—न ह्येतानि देवतापदानि किन्तर्हि मन्त्रा एव । मन्त्राणां च यथाऽऽम्नातानामेव प्रयोग इष्यत इति ।

"चित्तं च चित्तिश्च पुरस्तात् स्विष्टकृते जुहोति चित्ताय स्वाहा चित्त्यै स्वाहेत्येके समामनन्ति प्रजापतिर्जयानिति त्रयोदशीम्" (आप० श्रौ० सू० २०, १, ३,) इति शाखान्तरीयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथन्तरं च । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा" इति ॥७॥

अग्निर्भूतानामधिपतिः स माऽवत्व^B^,त्विन्द्रो ज्येष्ठानाम्, यमः पृथिव्या, वायुरन्तरिक्षस्य, सूर्यो दिव, श्चन्द्रमा नक्षत्राणां, बृहस्पतिर्ब्रह्मणो, मित्रः सत्यानां, वरुणोऽपाᳬ समुद्रः स्रोत्याना-

(*A*) परमेष्ठी यजूंषि लिङ्गोक्ता देवता होमे विनियोगः—

प्रजापतिः परमेश्वरः यथा इन्द्राय जयान् प्रायच्छत् तथा चित्तादि च मह्यमपि प्रयच्छतु इति क्रियां विपरिणम्योत्तरत्र सम्बन्धः । तस्मै च सुहुतमस्तु । तत्र चित्तं ज्ञानाधारो हृदयं, चित्तिस्तत्रत्या चेतना । आकूतं चाभिमतम्, आकूतिश्चाभिमानः । यद्वा चित्तं ज्ञानेन्द्रियं जातावेकवचनं, चित्तिस्तद्देवता । आकूतं कर्मेन्द्रियम्, आकूतिस्तद्देवता । विज्ञातं शिल्पादिज्ञानमपरोक्षम्, विज्ञातिस्तद्देवता । मनः प्रसिद्धम्, शक्वरी शक्र्यः तच्छक्तयः, दर्शपूर्णमासौ तद्देवते, बृहद्रथन्तरे सामनी, तद्देवते वा । सर्वत्र प्रथममन्त्रोक्तवाक्यार्थः सम्बध्यते । प्रजापतिः परमेश्वरः जयन्ति शत्रूनिति जयाः तान् जयान् मन्त्रान् इन्द्राय प्रायच्छत् ददौ । कस्मै प्रयोजनाय वृष्णे मनोरथवर्षणाय । इन्द्रविशेषणं वा वृष्णे इति । ततः स इन्द्रः पृतनाजयेषु असुरसेनाविजयाख्यकर्मसु उग्रः प्रचण्डो बभूव । किञ्च ततस्तस्मै इन्द्राय विशः प्रजाः समनमन्त सम्यङ् नेमुः । इ इवार्थे, स चेन्द्रः हव्यः हवनीयः इज्यो बभूव । स्वाहा तस्मै सुहुतमस्तु ।

(*B*) एषां प्रजापतिः पङ्क्तिर्लिङ्गोक्ता देवता अभ्यातान[1]होमे विनियोगः—

अग्निः प्रजापतिः भूतानां स्थावरादीनामधिपतिः ईशः स मा माम् अवतु पातु । अस्मिन् ब्रह्मणि ब्रह्मकर्मणि होमादौ, पुनः अस्मिन् क्षत्रे क्षत्रकर्मणि प्रजापालनादौ, पुनः अस्यामाशिषि ब्राह्मणैः सम्पादिते इष्टाशंसने पुत्रादिसुखकामनायां वा, अस्यां कन्यायाम् पुरोधायाम् पुरःस्थितायाम्, अस्मिन् कर्मणि विवाहे, अस्यां देवहूत्यां देवताह्वाने देवतोद्देशेन होमे वा, स्वाहा सुहुतमस्तु । अयं च वाक्यार्थ उपरिष्टादपि सप्तदशसु मन्त्रेषु सम्बध्यते । शेषं स्पष्टम् ।

(१) यद्देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानस्याभ्यातानत्वमिति श्रुतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रार्थ० साम्राज्यानामधिपति तन्माऽवतु, सोम ओषधीनाᳬं सविता, प्रसवाना,ᳬं रुद्रः पशूनां, त्वष्टा रूपाणां, विष्णुः पर्वतानां, मरुतो गणानामधिपतयस्ते माऽवन्तु, पितरः पितामहाः परेऽवरे ततास्ततामहाः। इह माऽवन्त्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳬं स्वाहा" इति—सर्वत्रानुषजति ॥८॥

"अग्निर्भूतानाम्" इत्यादिषु "पितामहाः" इत्यन्तेष्वष्टादशसु मन्त्रेषु प्रतिमन्त्रं यथालिङ्गं यथावचनं स माऽवत्वित्यादि-देवहूत्याँ स्वाहेत्यन्तं वाक्यैकदेशमनुषजति संयुनक्ति॥ ८॥

अग्निरैतु प्रथमो देवतानाᳬं *A* सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्। तदयर्ठ० राजा वरुणोऽनुमन्यतां यथेयᳬं स्त्री पौत्रमघं न रोदात् स्वाहा॥

इमामग्निस्त्रायतां गार्हपत्यः *B* प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि विबुध्यतामियᳬं स्वाहा॥

[*A*] चतुर्णां प्रजापतिस्त्रिष्टुप् लिङ्गोक्ता देवता होमे विनियोगः—

अग्निः ऐतु आगच्छतु, किं भूतः देवतानां यज्ञभुजां प्रथमः आद्यः प्रधानत्वात्। स चाग्निः अस्यै अस्याः कन्यायाः प्रजां भाविपुत्रादिरूपां मुञ्चतु मोचयतु मृत्युपाशात्। यद्वा मृत्युपाशात् अग्निः अस्यै कन्यायै प्रजां मुञ्चतु ददातु। तच्च प्रजामोचनं राजा वरुणोऽनुमन्यताम् अनुजानातु, यथा येनानुज्ञानेन प्रकारान्तरेण वा इयं कन्या पौत्रं पुत्रभवमघं दुःखं न रोदात् शोकं प्राप्य न रोदिष्यति कदाचिदपि अपत्यवियोगो माभूदित्यर्थः।

(*B*) इमां कन्यां गार्हपत्योऽग्निस्त्रायतां गार्हपत्याभिधो भाव्यग्निः पालयतु इमां पत्नीमग्निहोत्रिणीं कृत्वा रक्षतु। अस्यै अस्याः कन्यायाः प्रजां दीर्घमायुः निर्दुष्टबहुकालजीवनं नयतु प्रापयतु। इयं चाशून्योपस्था सफलप्रसवा, यद्वा नित्यं भर्तृसङ्गतोत्सङ्गा अस्तु भवतु, एवं जीवतां दीर्घायुषां माता चास्तु-जीवपुत्रा भवत्वित्यर्थः। किञ्च पौत्रं पुत्रसम्बन्धजमानन्दं सुखम् अभि अधिगम्य, आभिमुख्येन सर्वभावेन वा प्राप्य विविधं बुध्यतां जानातु सर्वज्ञाऽस्त्वित्यर्थः। यद्वा पौत्रमानन्दं विशिष्टतया बुध्यतां निद्रासुखापेक्षां त्यक्त्वा जागर्तु इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्ति नो अग्ने दिव आ पृथिव्या विश्वानि (C) धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा ॥

सुगन्नु पन्थाम्प्रदिशन्न एहि (D) ज्योतिष्मद्ध्येह्यजरन्न आयुः । अपैतु मृत्युरमृतम्मऽ आगाद्व वस्वतो नो ऽभयङ् कृणोतु स्वाहा" इति ॥९॥

परम्मृत्यविति च । एके प्राशनान्ते ॥१०॥

चकारादाहुतिं जुहोति "परम्मृत्यविति" मन्त्रेण । मन्त्रस्य पित्र्यत्वा-दुदकस्पर्शः । एके आचार्याः संस्रवप्राशनान्ते इमामाहुतिमिच्छन्ति । तस्मिन् पक्षे परम्मृत्यविति होमान्ते पुनरेतस्य संस्रवप्राशनम् ॥१०॥

इति प्रथमस्य पञ्चमो कण्डिका ॥५॥

(C) हे अग्ने, यजन्तं त्रायत इति यजत्रः तत्सम्बुद्धौ हे यजत्र, ! दिव आ स्वर्गं, लोकमभिव्याप्य आ पृथिव्याः पृथिवीमभिव्याप्य च नोऽस्माकं विश्वानि सर्वाणि कर्माणि अयथा अन्यथा कृतानि कर्माणि स्वस्ति संपूर्णानि यथा स्युः तथा धेहि अनुकूलानि कृत्वा स्थापय । यत्र महि महिमा तदस्मासु धेहि स्थापय । किञ्च अस्यां पृथिव्यां जातं यद् द्रविणं वसु, चित्रं नानारूपं स्वर्णरत्नादिभेदेन, प्रशस्तं प्रशस्यं श्रेष्ठं यच्च दिवि स्वर्गे जातं तदप्यस्मासु धेहि ।

(D) हे अग्ने नोऽस्मान् एहि आगच्छ । अस्मद्गृहानागत्य नोऽस्माकं सुगं सुखमतिगम्यं पन्थाम् पन्थानम् अर्चिरादिमार्गम् प्रदिशन् उपदिशन् सम्पादयन्निति यावत् आयुः निर्दुष्टजीवनं धेहि । कथं भूतमायुः, अजरं जरारोगादिपराभवरहितम् । अजरमित्यग्निविशेषणं वा विभक्तिव्यत्ययेन । पुनः कथम्भूतं तं, ज्योतिष्मत् प्रकाशम् । तत्प्रतिबन्धको मृत्युरपि नोऽस्माकं भवत्प्रसादादपैतु अपगच्छतु अमृतमानन्दश्च नोऽस्मान् आगात् आगच्छतु । वैवस्वतो यमश्च नोऽस्माकम् अभयं त्वत्सम्बन्धेन पापाभावाद् दुःखहेतुभयाभावं कृणोतु करोतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावा वपति ॥१॥ ताञ्जुहोति सर्ठ०हतेन तिष्ठती—

"अर्यमणं देवं कन्याऽ अग्निमयक्षत। स नोऽ अर्यमा (A) देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ॥

इयं नार्युपब्रूते लाजानावपन्तिका। (B) आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥

इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं (T) तव। मम तुभ्य च संवननं तदग्निरनुमन्यतामियꣳ स्वाहा" इति ॥२॥

कुमार्याः कन्याया भ्राता शमीपलाशमिश्रान् शमीपत्रयुक्तान् लाजान्[1] भृष्टान व्रीहीन् अञ्जलिना स्वकीयेन वध्वा अञ्जलौ आवपति.

(A) त्रयाणामाथर्वणोऽनुष्टुप् अग्निर्लाजहोमे विनियोगः—

कन्याः किल अर्यमणं सूर्यं देवम् अग्निं च वरलाभाय अयक्षत अयजन् पूजितवत्यः। **यज देवपूजायाम्**। स चार्यमा देवः इदानीम् मया इष्टः सन् नोऽस्मान् इतः पितृकुलात् प्रमुञ्चतु। **छन्दसि व्यवहिताश्चेति** क्रियासम्बन्धः। प्रमोचयतु भिन्नगोत्रां करोतु। पतेः पत्युः कुलात् मा प्रमुञ्चतु।

(B) इयं नारी वधूर्मद्रूपा उप पत्युः समीपे ब्रूते लाजानावपन्तिका सती। किमित्यत आह—मे पतिः आयुष्मानस्तु। मम ज्ञातय एधन्तां वर्धन्ताम् इति। **एध वृद्धौ**।–

(T) किञ्च हे पते! तव समृद्धिकरण समृद्धिहेतूनिमान् लाजानग्नौ आवपामि समृद्धिकरणमिति वा क्रियाविशेषणम्। अतो हेतोः अयमग्निः मम तुभ्य तव च "**मलोपश्छान्दसः**" संवननं संभजनम् अन्योऽन्यमनुरागलक्षणम्। **वन सम्भक्तौ** ल्युट्, **युवोरनाकौ** वित्यनादेशः। अनुमन्यताम् अनुमोदतु। न केवलमग्निः किन्तु इयं स्वाहा अग्निभार्याऽपि। अत्र स्वाहा शब्दस्यावृत्तिर्ज्ञेया। तेन होमार्थताऽपि।

(१) मैत्रायणीपरिशिष्टे—

"अङ्गुल्यग्रैर्न होतव्यं तथैवाञ्जलिभेदतः।
अञ्जलेर्वामपार्श्वेन लाजहोमो विधीयते" ॥
"वामभागस्तु नारीणां देवभाग इति स्मृतः" इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रक्षिपति। सा च तानञ्जलिस्थान् लाजान् तिष्ठती-[1] तिष्ठन्ती ऊर्ध्वा सतीति यावत्। नुमभाव आर्षः।

संहतेन संमिलितेन अञ्जलिना जुहोति विवाहाग्नौ प्रक्षिपति। अर्यमणमित्यादिभिर्मन्त्रैः। तत्र अर्यमणमिति प्रथमेन मन्त्रेण प्रथमं भागम्, इयमिति द्वितीयेन द्वितीयम्, इमानिति तृतीयेन तृतीयम्।

अत्र गोभिलगृह्ये विशेषः—

"अनुपृष्ठं पतिः परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते वध्वञ्जलिं गृहीत्वा" इति। वध्वाः पृष्ठं लक्षीकृत्य वध्वाः पृष्ठतः पश्चिमया दिशा पतिः परिक्रम्य वध्वा दक्षिणतः उदङ्मुखोऽव तिष्ठते ऊर्ध्वस्तिष्ठति, अवपूर्वक-स्थाधातोरूर्ध्वस्थित्यर्थकत्वात्। वध्वञ्जलिं गृहीत्वेत्यत्र स्वेन अञ्जलिना इति भट्टनारायणादयो व्याचख्युः। रघुनन्दनस्तु वध्वञ्जलिं दक्षिणेन पाणिना गृहीत्वा इति व्याचख्यौ ॥ १ । २ । ३ ॥

अथास्यै दक्षिण७ं हस्तं गृह्णाति साङ्गुष्ठम्—

"गृभ्णा[2]मि ते सौभगत्वाय हस्तं मया पत्या [D]जरदष्टिर्य-

अथ लाजहोमानन्तरम् अस्यै अस्याः कन्यायाः "षष्ठ्यर्थे चतुर्थी" दक्षिणं हस्तं साङ्गुष्ठम् अङ्गुष्ठेन सहितं "गृभ्णामि ते० शतम्" इत्यन्तं मन्त्रं पठित्वा गृह्णाति स्वदक्षिणहस्तेन आदत्ते ॥

"आज्यप्लुतान् शमीमिश्रान् भ्रातृदत्तांस्तु स्वाञ्जलौ।
सवराञ्जलिना तेन हुनेद्वह्नौ स्थिता वधूः ॥
लाजहोमं समिद्धोमं मूर्ध्नि होमं तथैव च।
पूर्णाहुतिं वसोर्धारां तिष्ठतैव हि कारयेत् ॥" इति

(१) "तिष्ठन्ती तिष्ठता पत्या गृहीताऽञ्जलिरेव सा।
अञ्जलिस्थान् त्रिधा कृत्वा प्राङ्मुखी प्रतिमन्त्रतः ॥"
इति कारिका

(२) "साङ्गुष्ठं हस्तमुत्तानं गृह्णात्यस्याः पतिस्ततः" इति कारिका॥ "अथास्यै दक्षिणेन नीचा हस्तेन दक्षिणमुत्तानं हस्तं गृह्णीयात्" (आ०१० गृ० २, ४, ११)

(D) याज्ञवल्क्यत्रिष्टुप् हस्तग्रहणे विनियोगः—

हे कन्ये! ते तव साङ्गुष्ठं करं हस्तं गृभ्णामि गृह्णामि। यथा येन गृहीतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाऽऽसः। भगोऽअर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः"। (ऋ० ८, ८५, ३६) अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमो ऽअहम्। सामाऽहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वम्। तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून्। ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्" इति ॥३६॥

इति प्रथमस्य षष्ठी कण्डिका ॥ ६ ॥

अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेन--

"आरोहेममश्मानमश्मेव त्वं स्थिरा भव।

हस्तेन मया पत्या भर्त्रा सह जरदष्टिः जरच्छरीरा बहुवर्षाऽऽयुष्मती आसः भवसीत्यर्थे निपातः। भगादयस्त्रयो देवाः त्वा त्वाम् मह्यमदुः दत्तवन्तः। किमर्थम् गार्हपत्याय गृहस्वामिनीत्वाय गार्हपत्यं सेवितुं वा। किं च सौभगत्वाय सुभगानां समूहः सौभगं तस्य भावः सौभगत्वम् तस्मै तदर्थम् निरतिशयाऽऽनन्दप्राप्तये इत्यर्थः। किं भूतां त्वाम् पुरन्धिः **'पुरन्धि द्वितीयार्थे प्रथमा'** श्रेष्ठा सुरूपवती वा। हे कन्ये! यत अमो विष्णुः रुद्रः ब्रह्मा वाऽहमस्मि, अमति सर्वत्र गच्छति सर्वं जानाति वेति, न मिनोति हिनस्तीति वा अमः, तथा सौति सुवति सूते वा विश्वमिति सा लक्ष्मीस्त्वमसि। किं च सा देवत्रयीरूपा त्वमसि। अमो देवत्रयरूपोऽहमस्मीत्यर्थः॥ किं च अहं सामाऽस्मि त्वं ऋगसि, अहं द्यौरस्मि त्वं पृथिव्यसि। एहि आगच्छ। तौ आवां विवहावहै विवाहं करवावहै। सह संयुक्तौ भूत्वा रेतः पुत्रदेहरूपं दधावहै धारयाव। ततः प्रजां स्त्रीरूपां सन्ततिं प्रजनयावहै उत्पादयाव। पुत्रान् पुत्रपौत्रादीन् बहून् विन्द्यावहै लभावहै। ते च पुत्रा जरदष्टयः जरच्छरीरा भवन्तु। आवामपि सम्प्रियौ सुप्रीतौ अन्योन्यप्रेमशालिनौ रोचिष्णू सुदीप्तौ सुमनस्यमानौ शोभनमनोवृत्तिं कुर्वाणौ सुमनसो भावः सौमनस्यं तत्कुर्वाणाविति भावः। वयं च पुत्रादिसहिताः शतं शरदो वर्षाणि पश्येम रूपग्रहणसमर्था भवेम। तथा शतं शरदो जीवेम निरुपद्रवं प्राणान्धारयाम। तथैव शतं शरदः शृणुयाम निर्दुष्टं शब्दग्रहणसमर्थम् अस्माकं श्रवणेन्द्रियम् अस्त्वित्यर्थः।

५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभितिष्ठ पृतन्यतोऽववाधस्व (A) पृतनायतः" इति ॥ १ ॥
अथ गाथां गायति—
"सरस्वति प्रेदमव सुभगे वाजिनीवती । यां त्वा विश्व[B]स्य भूतस्य प्रजायामस्याग्रतः । यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत् । तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः" इति ॥२॥

अथ दक्षिणकरग्रहणानन्तरम् एनां वधूम् अग्नेरुत्तरतो वर्तमानमश्मानं दृषदं दक्षिणपादेन दक्षचरणेन[1] "आरोहेम० पृतनायत" इत्यन्तेन मनुना आरोहयति आरोहणं कारयति वरः ॥१॥

अथ कुमार्याः दृषदि दक्षपादे निहित एव "सर० यशः" इमां मन्त्ररूपां गाथां गायति वर इति शेषः ॥२॥

---

(१) कुमार्या दक्षिणपादं हस्तेन गृहीत्वा अश्मन उपरि वरः करोति—
"गत्वोभावुत्तरेणाग्निं तस्याः सव्येतरं करम् ।
सव्येनादाय हस्तेन वधूपादं तु दक्षिणम्" इति कारिकायाम् ॥

(A) अथर्वणोऽनुष्टुप् वधूर्देवता अश्मारोहणे विनियोगः ।

हे कन्ये ! इमं पुरोवर्तिनमश्मानं दृषदम् आरोह आक्रम अधितिष्ठेत्यर्थः । आरोहणेन संस्कृता त्वम् अश्मेव प्रस्तरवत् स्थिरा दृढा भव । किं च अभि अधिकृत्य आक्रम तिष्ठ । कान् पृतनां संग्राममिच्छन्ति पृतन्यन्ति त एव पृतन्यतः तान् पृतनायतः कलहकारिण इत्यर्थः । ततश्च पृतनाभिः सेनाभिर्यतन्ते इति पृतनायतः तान् पृतनायतः अव अवाचीनान् कृत्वा बाधस्व भग्नोद्यमान् कुर्वित्यर्थः ॥

(B) विश्वावसुरनुष्टुप् सरस्वती देवता गाने विनियोगः—

हे सरस्वति वाग्देवते ! सुभगे कल्याणि ! वाजिनीवती वाजः अन्नं तदस्ति अस्यामिति वाजिनीवती अन्नवती । यद्वा वाजाः पक्षाः सन्ति अस्या इति वाजिनी हंसी तद्वती इदं युग्मं कर्म च प्राव प्राकृष्टतया रक्ष । त्वा त्वामस्य विश्वस्य भूतस्य जातस्य पृथिव्यादेर्वा प्रजायां प्रकृष्टां जनित्रीमाहुः । किम्भूताम् अग्रतः प्रथमाम् । तदेव प्रपञ्चयति—यस्यां प्रकृतिरूपायां त्वयीदं सर्वं विश्वं तथाभूतं पृथिव्यादि सर्वं जगत् अस्तं गच्छत् आस प्रलये लीनमित्यर्थः । पुनः सृष्ट्यादौ च यस्याः सकाशात्समभवत् जातम् । तस्याः सरस्वत्याः सम्बन्धिनीं तां गाथां गुणप्रभावस्तुतिप्रकाशिकाम् अद्य गास्यामि । या श्रुता सती स्त्रीणामुत्तमं श्रेष्ठं यशः कीर्तिं ददाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ परिक्रामतः—
"तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतु ना सह । (C)
पुनः पतिभ्यो जायां दाऽग्ने प्रजया सहेति" ॥३॥
एवं द्विरपरं लाजादि ॥४॥ चतुर्थठं० शूर्पकुष्ठया सर्वांल्लाजानावपति भगाय स्वाहेति ॥५॥ त्रिः परिणीतां प्राजापत्यठं० हुत्वा ॥६॥७॥

अथ धृतकरावेव वरवध्वौ परिक्रामतः अग्नेः परिक्रमणं कुरुतः "तुभ्यम० सह" अनया ऋचा ॥३॥

एवमुक्तविधिना द्विः द्विवारम् अपरं पुनरपि लाजादि "कुमार्या भ्राता० इत्यारभ्य अथ परिक्रामतः०" इत्यन्तं यावत् कर्म भवति । अत्र पाणिग्रहणादि परिक्रमणान्तेषु कर्मसु वरकर्तृक एव मन्त्रपाठ इति ध्येयम् ॥४॥

तृतीयप्रक्रमान्ते कुमार्या भ्राता शूर्पकुष्ठया शूर्पकोणेन सर्वान् यावत् शूर्पेऽवशिष्टान् लाजान् कुमार्या अञ्जलौ आवपति तान् कुमारी 'भगाय स्वाहा' इति मन्त्रेण जुहोति अग्नौ प्रक्षिपतीत्यर्थः ॥५॥

त्रिः परिणीतां त्रिवारं कृतपरिक्रमां सतीं कुमारीं प्राजापत्यं प्रजापतिदेवताकं हुत्वा होमं विधायेत्यर्थः ॥ अत्र सूत्रे त्रिर्ग्रहणमि[1]तरथाऽऽवृत्तिनिषे-

---

(C) अथर्वणोऽनुष्टुप् अग्निर्देवता अग्निपरिक्रमणे त्रिनियोगः—

हे अग्ने ! तुभ्यं त्वदर्थमेव सोमादयः अग्रे पूर्वं जन्मदिनादारभ्य पर्यवहन् परिगृहीतवन्तः । ततः सूर्यां सूर्यसम्बन्धिनीं भार्यामिमां भवान् वहतु । किं भूतः ना पुरुषः परमपुरुषार्थहेतुः । तां जायां जायात्वेन पुनः पश्चात् स्वभोगानन्तरं प्रजया पुत्रैः सह मह्यं दाः देहीत्यर्थः । **अत्र सन्धिः छान्दसः ।**

(१) इतरथाऽऽवृत्तिश्च—दैवेषु कर्मसु प्रादक्षिण्येन कर्माऽनुष्ठाय तत्कर्माऽवसाने अप्रादक्षिण्येन प्रतिनिवर्तितव्यम् ।
एवं पित्र्येषु कर्मसु अप्रादक्षिण्येन कर्मानुष्ठाय पुनः प्रादक्षिण्येन प्रतिनिवर्तितव्यम् ।
तद्यथा—
परिस्तरणादौ प्रादक्षिण्येन हस्तेन परिस्तरणे कृते यत्र परिस्तरणं समाप्तम् तत्स्थानात् परिस्तरणाऽऽरम्भस्थानम्प्रति अप्रादक्षिण्येनैव हस्तस्याऽऽनयनामित्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धार्थम् । समाचारादत्र[1] वधूवरौ तूष्णीं चतुर्थं परिक्रमणं कुरुत इति वासुदेवहरिहराद्याचार्याः ॥ ६ ॥

इति प्रथमस्य सप्तमी कण्डिका ॥७॥

अथैनामुदीची ठं० सप्त पदानि प्रक्रामयति "(A)एकमिषे, द्वेऽ-ऊर्जे,त्रीणि रायस्पोषाय, चत्वारि मायोभवाय, पञ्च पशुभ्यः, षड् ऋतुभ्यः, सखे सप्तपदा भव सा मामनुव्रता भव" "विष्णुस्त्वा नयतु" इति सर्वत्रानुषजति ॥१॥

अथ प्राजापत्यहोमानन्तरम् एनां वधूम् उदीचीम् उदङ्मुखीम् सप्त पदानि प्रक्रामयति सप्त प्रक्रमान् दक्षिणपादेन कारयति, उत्तरोत्तरं वरः कारितत्वात् "सप्त पदानि प्रक्रमस्व" इत्यध्येषणेति केचित् । कुमार्या दक्षिणपादं गृहीत्वाऽग्रेऽग्रे स्थापयतीत्यन्ये ।

"विष्णुस्त्वा नयतु" इति सर्वत्र षड्मन्त्रेषु अनुषङ्गः न तु सप्तमे मन्त्रे, तुल्ययोगित्वात्साकाङ्क्षत्वाच्च पूर्वमन्त्राणाम् इति कर्काचार्याः । अन्येषां भाष्यकाराणां पद्धतिकाराणां च मते सर्वमन्त्रेष्वनुषङ्गः ॥ १ ॥

---

(१) अत्र परिक्रमणत्रयं मन्त्रेण, चतुर्थं तूष्णीम् समाचारात् । परिक्रमणत्रये अग्रे वधूः पश्चाद्वरः, चतुर्थे तु अग्रे वरः पश्चाद्वधूः,इति च क्वाचित्क सम्प्रदायः ।

अत्र परिक्रमणत्रये वरवध्वोः ब्रह्माग्न्योरन्तरा गमनम्, चतुर्थे तु नान्तरा गमनम् । किन्तु पूज्यत्वबुद्धया सर्वेषां मण्डपस्थानां ब्रह्मादीनां प्रदक्षिणीकरणम् । "हविष्पात्रस्वाम्यृत्विजां पूर्वं पूर्वमन्तरम्" (का० श्रौ०) इति न्यायस्तु विधिबोधिते परिक्रमणत्रये एव प्रवर्तते न चतुर्थे ।

अत एव "अत्र समाचारात् चतुर्थं परिक्रमणं कुर्वन्तौ वधूवरौ ब्रह्माग्न्योर्मध्ये च गच्छेताम्" इति हरिहरमिश्रैः चतुर्थपरिक्रमणे एव वरवध्वोरन्तरा गमनम् निषिद्धम् न परिक्रमणत्रये । एवं च गदाधरदीक्षितैः यत् परिक्रमणत्रयाऽभिप्रायेण हरिहरोक्तोऽन्तरागमननिषेध इत्युक्तम् तदसमीचीनमिति ।

(A) सर्वत्र प्रजापतिर्यजुर्लिङ्गोक्ता देवता परिक्रमणे विनियोगः—

हे कन्ये ! एकं प्रथमं पदं इषे अन्नार्थम् विष्णुः त्वा त्वाम् नयतु । ऊर्ज्जे रसाय द्वे पदे द्वितीयं पदं विष्णुः त्वा त्वां नयतु । एवमुत्तरत्र योज्यम् ।

रायस्पोषाय धनपुष्ट्यै । मयोभवस्य भावो मायोभवं तस्मै मायोभवाय "मय इति सुखनाम" सुखार्थं, पशुभ्यः पशुलाभार्थं, ऋतुभ्यः ऋतुजन्यार्थभोगार्थं हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्क्रमणप्रभृत्युदकुम्भꣳ स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवत्युत्तरत एकेषाम् ॥२॥

निष्क्रमणप्रभृति "पित्रा प्रत्तामादाय निष्क्रामती"त्यादित आरभ्य कश्चित्पुरुषो जलपूर्णं कलशं स्कन्धे निधाय वधूवरयोः पृष्ठत आगत्याऽग्नेर्दक्षिणस्यां दिशि मौनी स्थित आस्ते,केषांचिन्मते उत्तरतः स्थित आस्ते॥२॥

तत एनां मूर्द्धन्यभिषिञ्चति—

"आपः शिवाः[A] शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्" इति आपो हिष्ठेति च तिसृभिः ॥३॥

ततः तस्मात्स्कन्धस्थितात् उदकुम्भात् आचारात् आम्रादिपल्लवसहितेन हस्तेन जलमादाय एनां वधूं मूर्द्धनि शिरसि वरः "आपः शिवाः ०भेषजम्" इत्यन्तेन । मन्त्रेणाऽभिषिञ्चति । पुनस्तथैवोदकमाहृत्य "आपो हि ष्ठा इत्यादिभिः "आपो जनयथा च न" इत्यन्ताभिस्तिसृभिर्ऋग्भिश्चाऽभिषिञ्चति ॥ ३ ॥

अथैनार्ꣳ० सूर्यमुदीक्षयति तच्चक्षुरिति ॥४॥

अथाऽभिषेकादुपरि 'सूर्यमुदीक्षस्वेति'प्रैषेण सूर्यम् एनां वधूं वरःउदीक्षयति सूर्यनिरीक्षणं कारयतीत्यर्थः । सा च वरप्रेषिता सती 'तच्चक्षुरिति' मन्त्रेण स्वयं पठितेन सूर्यं निरीक्षते । एतच्च दिवा विवाहपक्षे इति रेणुदीक्षितहरिहरौ । सूर्याऽवेक्षणान्यथानुपपत्त्या 'अस्त मिते ध्रुवं दर्शयति' इत्यत्रास्तमितग्रहणाच्च पारस्करगृह्यानुसारिणा दिवैव विवाह इति गदाधरः ॥ ४ ॥

सखे कान्ते ! पूर्णपदैः सह सप्तपदा भव। सा च त्वं मामनुलक्षीकृत्य व्रताऽव्रतवतीभव।
अर्श आदिभ्योऽजित्यच् प्रत्ययः । सखीत्वं च–
"सख्यं साप्तपदीनं स्यान्मैत्री साप्तपदीति च" इति स्मृतिसिद्धम्।

(A) प्रजापतिर्यजुरापोऽभिषेके विनियोगः—

या आपः शिवाः सुखहेतवः शिवतमाः अदृष्टद्वारा परलोकहेतवः शान्ताः सुखकर्त्र्यः शान्ततमाः मनोमलक्षालनसमर्थाश्च भवन्ति । ता आपः हे कन्ये! ते तव भेषजम् आरोग्यं कृण्वन्तु कुर्वन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथास्यै दक्षिणा्ँसमधि हृदयमालभते-
"मम व्रते ते हृदयं दधामि[A] मम चित्तमनु चित्तं तेऽ अस्तु । मम
वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्" इति ॥५॥

अथ सूर्येक्षणानन्तरम् अस्यै अस्या वध्वाः 'षष्ठ्यर्थे चतुर्थी' । दक्षिणांसमधि दक्षिणस्कन्धस्योपरि हस्तं नीत्वा तस्या हृदयमालभते स्पृशति वरः ॥ ५ ॥

अथैनामभिमन्त्रयते—
"सुमङ्गलीरियं वधूरिमा्ँसमेत [B] पश्यत ।
सौभाग्यमस्यै दत्वा याथाऽस्तँ व्विपरेत न" इति ॥६॥

अथ हृदयालम्भानन्तरम् एनां वधूं वरोऽभिमन्त्रयते "सुमङ्गलीरि०" त्यादिना मन्त्रेण ।

अत्र शिष्टसमाचाराद् "उत्तरत आयतना हि स्त्री" (श. ब्रा. ८।४।४।११) इति श्रुतिलिङ्गाच्च वधूं वरस्य 'वामभागे उपवेशयन्ति, तस्याः सीमन्ते वरेण सिन्दूरं दापयन्ति च इतिहरिहरः ॥६॥

(*A*) परमेष्ठी प्रजापतिस्त्रिष्टुप् हृदयालम्भे विनियोगः—

हे कन्ये ! मम व्रते शास्त्रविहितनियमादौ ते तव हृदयं मनः दधामि स्थापयामि तद्विषयं करोमि । मम चित्तमनु ते चित्तमस्तु । वृत्तिभेदेन मनश्चित्तयोर्भेदः । किंच मम वाचम् एकमना अनन्यचित्ता सती जुषस्व सेवस्व । अपि च प्रजापतिर्धाता त्वा त्वां मह्यं मदर्थं नियुनक्तु । मत्सेविनीं करोत्विति भावः ।

(१) "पतिपुत्राऽन्विता भव्याश्चतस्रः सुभगा अपि ।
सौभाग्यमस्यै दद्युस्ता मङ्गलाचारपूर्वकम् ॥
वामे सिन्दूरदाने च वामे चैव द्विरागमे ।
वामेऽशनैकशय्यायां भवेज्जाया प्रियार्थिनो ॥"

इति संस्कारगणपतौ ।

(*B*) प्रजापतिरनुष्टुबनुमन्त्रणे विनियोगः—

हे विवाहे मिलिता जनाः ! इयं वधूः सुमङ्गलीः सुमङ्गलरूपा । विभक्तिलोपाभाव आर्षः । अत इमां समेत सङ्गच्छत पश्यत च । किं च अस्यै कन्यायै सौभाग्यं दत्वा अस्तमदर्शनं गृहं वा याथ गच्छथ । न विपरेत न विरुद्धमुखतया परेत न प गच्छत । पुनरपि मङ्गलमाशास्य पुनरागमनाय व्रजतेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां दृढपुरुष उन्मथ्य प्राग्वोदग्वा ऽनुगुप्त आगार आनडुहे रोहिते चर्मण्युपवेशयति—

"इह गावो निषीदन्त्विहाश्वा ऽइह (A) पूरुषाः ।
इहो सहस्रदक्षिणो यज्ञ ऽइह पूषा निषीदंतु" इति ॥७॥

तां वधूं दृढपुरुषः बलवान् कश्चित् पुमान् उन्मथ्योत्थाप्य प्राक् पूर्वस्यां दिशि उदग् उदीच्यां वा दिशि पूर्वकल्पितेऽनुगुप्ते सर्वतः परिवृते आगारे गृहे तत्र च पूर्वमास्तीर्णे (१)आनडुहे आर्षभे रोहिते लोहितवर्णे चर्मणि अजिने प्राग्ग्रीवे उत्तरलोम्नि उपवेशयति 'इह गाव' इत्यादिना 'निषीदंत्वि'त्यन्तेन मन्त्रेण केचन जामातैव दृढपुरुष इत्याहुः॥७॥

(A) प्रजापतिरनुष्टुप् लिङ्गोक्ता देवता उपवेशने विनियोगः—

इह कन्यानिवेशने गावः अश्वाः पुरुषाश्च निषीदन्तु निवसन्तु । प्रतीह शब्दं क्रियावृत्तिः, 'पूरुषोऽवसाने' इति पूरुष इति दीर्घः । उ एवार्थे ।

इहैव सहस्रं गावो दक्षिणा यस्य स-सहस्रदक्षिणो यज्ञः, पूषा देवता च निषीदतु ॥

(१) आनडुहचर्माऽभावे तृणनिर्मितः कटादिर्ग्राह्यः ।

"गृहप्रवेशेऽनडुहश्चर्मास्तरणमिष्यते ।
तस्याऽभावे तु तार्णस्य तल्पस्याऽऽस्तरणं भवेत्"

इति लघ्वाऽऽश्वलायनस्मृतेः ।

तल्पोऽत्राऽऽसनम्, कृष्णाजिनं वा ।

"अग्नेरपरस्यामानडुहं चर्मलोहितं कृष्णाऽजिनं वा प्राचीनग्रीवमुत्तरलोमास्तृणाति तत्र प्राङ्मुखीमुदङ्मुखीं वा वधूं प्रवेश्य" इति वैखानसगृह्योक्तेः (३, ५,)। "नियते सामान्यतः प्रतिनिधिः स्यात्" (का. श्रौ. अ, १ कं ४. सू. २) इति सूत्रात् रक्तवस्त्रादिकमपि ग्रहीतुं शक्यते । अत एव उद्वाहतत्त्वे—"इदानीं तु—

"यत्र धर्मश्चतुष्पादः स्याद्धर्मः पादविग्रहः ।
कामिनस्तमसा च्छन्नाः जायन्ते यत्र मानवाः ॥
अहङ्कारगृहीताश्च प्रक्षीणस्नेहबान्धवाः ।
विप्राः शूद्रसमाचाराः सन्ति सर्वे कलौ युगे ॥"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामवचनं च कुर्युर्विवाहश्मशानयोः ॥८॥

विवाहे श्मशाने च वृद्धानां स्त्रीणां वचनं वाक्यं कुर्युः ॥८॥

वृद्धानां स्त्रीणां वचनं कार्यमित्यत्र प्रमाणमाह—

ग्रामं प्रविशतादितिवचनात् । तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः ॥६॥

ग्रामं वृद्धानां स्त्रीणामाचारं प्रविशतात् इति स्मृतिवचनाद् ।

ननु ग्रामं प्रविशतादिति स्मृतिवचनाद् हरिद्रालेपनादौ अस्तु प्रामाण्यं यत्रतु अथैनमश्मानमारोहयतीत्येतदनन्तरं तूष्णीं वरस्य पाषाणावरोहणं कारयित्वा कुमार्या भ्राता वराङ्गुष्ठोपरि उपलं निधाय वराद्रूप्यादि-गृह्णाति इति ताः स्मरन्ति तदप्रमाणम् । लोभमूलत्वेन वैसर्जनीयवस्त्रग्रहणवदित्यत आह-तयोर्ग्रामः प्रमाणमिति श्रुतिवचनादिति । श्रुतिवचनत्वाभियंत्स्मर्यते रूप्यग्रहणादि तदपि प्रमाणं प्रत्यक्षश्रुतिमूलत्वात् ॥९॥

आचार्याय वरं ददाति ॥१०॥

वरः स्वकीयाय आचार्याय वरं ददाति ॥१०॥

वर-शब्दार्थमाह—

गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याऽश्वो वैश्यस्येति ॥११॥

इति निगदव्याख्यातम् ॥११॥

(*A*) अस्तमिते ध्रुवं दर्शयति—

"ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि । मह्यं

. इति मत्स्यपुराणोक्तकलियुगस्वभावेन सम्यग्धर्माचरणरहितेनापि धर्मोपवेशनावज्ञाऽभावेऽपि कर्मणः प्राधान्यात् यत्र कुत्राप्युपवेशनं कर्त्तव्यमित्युक्तम् ।

(*A*) परमेष्ठी पंक्तिः ध्रुवेक्षणे विनियोगः—

मन्त्रार्थः—हे वधु ! त्वं ध्रुवमसि ध्रुवासि । लिङ्गव्यत्ययः ।

अतोऽहं त्वा त्वां ध्रुवं ध्रुवां पश्यामि । अत एव त्वमपि ध्रुवा पोष्या एधि भव । अस्तेरूपम् । यद्वा पोष्ये पोषणीये मयि ध्रुवैधि मत्सेवने स्थिरा भवेत्यर्थः । कुत इत्यत आह मह्यमिति—बृहस्पतिर्ब्रह्मा त्वा त्वाम् मह्यम् अदात् दत्तवान् । अत एव मया पत्या सह प्रजावती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि संजीव प्राणिहि । "कालाध्वनोरत्यन्तसंयोग" इति द्वितीया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाऽदाद् बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम्" इति ॥१२॥

दिवा विवाहश्चेत्तदाऽस्तमिते सूर्ये "ध्रुवमीक्षस्वेति" प्रैषेण वधूं ध्रुवं तारकाविशेषं दर्शयति । रात्रौ विवाहश्चेत्तदा वरदानानन्तरमेव । ध्रुवमसीत्यादिना मन्त्रेण वधूर्ध्रुवमीक्षते । वरस्यैव मन्त्रपाठ इति गदाधरः । तदा पश्यामीत्यत्र ण्यर्थान्तर्भावः ॥१२॥

अधिरथर्ठ० शतं दुहितृमते ॥१३॥

ददातीत्यनुवर्तते । दुहितृमांश्च यस्य दुहितर एव न पुत्राः, तस्मै दुहितृमते रथेनाधिकं गोशतं दत्त्वा तस्य कन्यामुद्वहेत । "यस्यास्तु न भवेद् भ्राता" इति मनुवचनात् अभ्रातृमतीपरिणयनं निषिद्धं, तदतिक्रम्य कश्चित्तामुद्वहेच्चेत्, तस्याः पुत्रिकात्वदोषपरिहाराय रथाधिकं गवां शतं दद्यात् ॥१३॥

सा यदि न पश्येत्पश्यामीत्येव ब्रूयात् ॥१४॥

सा कन्या यदि ध्रुवसंज्ञकं सूक्ष्मं नक्षत्रं न पश्येत् तथाऽपि तया पश्यामीत्येव वक्तव्यम्, न पश्यामीति वचनं न वक्तव्यम् ॥१४॥

त्रिरात्रमक्षारालवणाशिनौ स्याताम् ॥१५॥

विवाहदिनमारभ्य त्रिरात्रं त्रीन् अहोरात्रान् अक्षारालवणाशिनौ [1]अक्षारं चालवणं चाक्षारालवणम् । तदश्नीतः एवंशीलौ स्याताम् ॥१५॥

---

(१) "हैडम्बिका राजमाषा माषा मुद्‌गा मसूरिकाः ।
लङ्कयाढ़क्याश्च निष्पावास्तिलाद्याः क्षारसंज्ञिताः" ॥
(आ० गृ० १. ८. १)

"गोक्षीरं गोघृतं चैव धान्यं मुद्‌गास्तिला यवाः ।
अक्षारलवणा ह्येते क्षाराश्चान्ये प्रकीर्तिताः"
"तिलमुद्‌गादृते शैम्ब्यं सस्ये गोधूमकोद्रवौ ।
धान्यकं देवधान्यं च शमीधान्यं तथैक्षवम् ॥
स्विन्नधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः" ॥
गोधूमानां तु तत्रैव प्रतिप्रसव उक्तः यथा—
"श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः" इति निर्णयसिन्धौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधः शयीयातां संवत्सरं न मिथुनमुपेयातां द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः ॥१६॥

अध आस्तरणास्तृतायां भूमौ, न खट्वादौ। संवत्सरं वर्षं यावत् मिथुनमभिगमनं नोपेयाताम् नोपगच्छेताम् । अथवा द्वादशरात्रम् अथवा षड्रात्रम्, अथवा त्रिरात्रमन्ततः, संवत्सरादिपक्षाणाम् अन्ते त्रिरात्रमित्यर्थः ॥१६॥

इति प्रथमस्य अष्टमी कण्डिका ॥ ८ ॥

स्मार्ताग्निमतो यावज्जीवं प्रतिदिनकर्तव्यं सायंप्रातर्होमविधानमाह-

उपयमनप्रभृत्यौपासनस्य परिचरणम् ॥१॥

(१) उपयमनान् कुशानादाय त्रिस्रः समिधोऽग्नावभ्याधाय मणिकोदकेनाग्निं पर्युक्ष्य होमं कुर्यात् इत्येतावत्पूर्वोक्तक्रियामात्रविधानेन औपासनस्य आवसथ्यस्य अग्नेः परिचरणम् अनुष्ठानं सायं प्रातर्होमयोः कर्तव्यम् ॥१॥

(२) अस्तमितानुदितयोः ॥२॥

अस्तमितश्च अनुदितश्च अस्तमितानुदितौ, तयोः अस्तमितानु-

---

(१) अत्र विवाहाग्निरेव औपासनाग्निरिति आश्वलायनानां पक्षः। "कर्म स्मार्तं विवाहाग्नौ" इत्यादिमनुवचनमपि आश्वलायनादिपरमेव । वाजसनेयिनानां तु नैष पक्षः सम्मतः। विवाहहोमेनैव आवसथ्याग्नौ सिद्धे "आवसथ्याऽऽधानं दारकाले" इति पृथगारम्भसामर्थ्यात् ।

(२) अस्तमितलक्षणं कात्यायनेनोक्तम् ।

"यावत् सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
लोहितत्वं च नापैति तावत्सायं तु हूयते ॥"

अनुदितस्तु द्विविधः । अनुदितः समयाध्युषितश्च । तथा च मनुः --

"उदितेऽनुदिते चैव समयाऽध्युषिते तथा" इति ।

तत्रानुदितः स्पष्टतारकोपलक्षितः। ततः परमुदयात् प्राक् समयाध्युषितः सम्पूर्णादित्यमण्डलदर्शनोपलक्षितोऽनुदित इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दितयोः क्रमेण सायं प्रातः जुहुयात् ॥२॥

दध्ना तण्डुलैरक्षतैर्वा ॥३॥

दध्ना गव्येन, तण्डुलैः ओदनैः अक्षतैः यवैर्वा होमः कार्यः ॥३॥

अग्नये स्वाहा प्रजापतये स्वाहेति सायꣳ सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः ॥४॥

आहुतिद्वयं सायम् आहुतिद्वयं प्रातः क्रमेण जुहुयात् ॥४॥

पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ ॥ पुमानिन्द्रश्च सूर्यश्च पुमाꣳसं वर्ततां मयि पुनः स्वाहा" इति पूर्वां गर्भकामा[1] ॥ ५ ॥

यजमानस्य पत्नी गर्भकामा चेत् अग्नये स्वाहेति पतिकर्तृकं होमं वाधित्वा तत्स्थाने सा पुमाꣳसौ इति मन्त्रेण *A* प्रथमामाहुतिं जुहुयात्। द्वितीयां तु यजमानो जुहुयात् न प्रथमाम् ॥५॥

इति प्रथमस्य नवमी कण्डिका ॥ ९ ॥

प्रायश्चित्तनिरूपणम् ।

राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाज्यꣳ [2]संस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम् ॥ १ ॥

---

(१) पूर्वां गर्भकामेत्यत्र नित्ययोर्द्वयोराहुत्योः प्रथमा किं पूर्वशब्देन विवक्षिता उत ? ताभ्याम् अन्या इति—

अत्रोच्यते—अन्या एवेति । कुतः ? मन्त्रान्तरेण देवतान्तरहोमविधानात्। तस्मात् "अग्नये स्वाहा" "सूर्याय स्वाहा" इति नित्ये आहुती वाधित्वा "पुमांसा" विति मन्त्रविहिता पत्नीकर्तृका कर्मान्तररूपा काम्या प्रथमा आहुतिः, द्वितीया तु प्रजापतये स्वाहेति आहुतिर्यजमानकर्तृका ।

(*A*) तत्र मेधातिथिर्गायत्री अनुष्टुप् लिङ्गोक्ता होमे विनियोगः ।

मन्त्रार्थः—पुमाꣳसौ मित्रावरुणौ, पुमाꣳसौ उभौ अश्विनीकुमारौ, पुमानिन्द्रः पुमान् सूर्यश्च, मयि विषये पुमाꣳसं वर्ततां स्थापयन्तु गर्भरूपेण इति पत्नीप्रार्थना ।

(२) आज्यं संस्कृत्य आज्यसंस्कारान् निरूप्याज्यादिना कृत्वा 'इह रति' रिति मन्त्राभ्यां जुहोति । एष एव विधिरित्यनेनैवाज्यसंस्कारस्य प्राप्तत्वादत्राज्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युद्धादौ रथेन प्रस्थितस्य राज्ञः कदाचित् अक्षस्य रथचक्रस्य भेदः स्यात्, अथवा नद्धस्य रथस्य विमोक्षः बन्धनविच्छेदः स्यात्, अथवा यानस्य रथस्य विपर्यासः अधोमुखता स्यात्, अन्या वा काचन अशुभसूचिका व्यापत्तिः उत्पातः भवेत्, तथा स्त्रियाः वध्वाः उद्वहने पितृगृहात् भर्तृगृहे प्रथमगमने च यदि रथाक्षभेदादिः पूर्वोक्तो दोषः सम्भवेत् तदा तम् एव अग्निम् उपसमाधाय अर्थात् राज्ञः दोषे समायाते सेनाग्निं, स्त्रियाश्चेद्दोषः समायातस्तदा वैवाहिकमग्निं चतुर्थीकर्मार्थं समानीतं स्थापयित्वा ब्रह्मोपवेशनादिपर्युक्षणान्ते 'इह रतिः' (शु० य० अ० ८ म० ५१) इति द्वाभ्यां मन्त्राभ्याम् आज्यं संस्कृत्य आहुतिद्वयं जुहुयात । तत आघारादिकं सर्वं कुर्यात् ॥१॥

प्रायश्चित्तनिरूपणम्

अन्यद्यानमुपकल्प्य तत्रोपवेशयेद्राजानँ स्त्रियं वा 'प्रतिक्षत्र' इति यज्ञान्तेनाऽऽत्वाऽहोर्षमिति चैतया ॥२॥

ततः तद्यानं त्यक्त्वा अन्यद्यानं वाहनं रथादिकमुपकल्प्य तत्र तस्मिन् याने राजानं स्त्रियं वा उपवेशयेत् "प्रतिक्षत्रे० यज्ञे" इत्यन्तेन मन्त्रेण (शु० य० अ० २० । १०) "आ त्वाऽहार्षम्" (शु० य०अ० १२,११) इति एतया ऋचा च उपवेशयेत, अर्थात् मन्त्रद्वयेन उपवेशनं कर्तव्यम् ॥२॥

धुर्यौ दक्षिणा प्रायश्चित्तिः ॥ ३ ॥

अस्य कर्मणः धुर्यौ अनड्वाहौ दक्षिणा भवति। प्रायश्चित्तिः इति च कर्मणः संज्ञा ॥३॥

ततो ब्राह्मणभोजनम् ॥ ४ ॥

ततः कर्मान्ते ब्राह्मणस्य एकस्य भोजनं कारयितव्यम् ॥४॥

इति प्रथमस्य दशमी कण्डिका ॥ १० ॥

संस्कृत्येति ग्रहणम् इह रतिरित्याहुत्योराघारादिभ्योऽपि पूर्वकालत्वज्ञापनार्थमिति गदाधरभाष्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थी-कर्म आह—

चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरतऽउदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति ॥ १ ॥

विवाहदिनमारभ्य या चतुर्थी तिथिः तस्यामपररात्रे[1] रात्रेरन्तिमप्रहरे अभ्यन्तरतः गृहस्य मध्ये (न तु बहिश्शालायाम्) वैवाहिकमग्निं स्थापयित्वा[2] अग्नेर्दक्षिणतो ब्रह्माणमुपवेश्य अग्नेरुत्तरतः प्रणीताऽतिरिक्तम् उदकपात्रं स्थापयित्वा स्थालीपाकं चरुं श्रपयित्वा आघारहोमानन्तरम आज्यभागौ इष्ट्वा "अग्ने प्रायश्चित्ते" इत्येतैः पञ्चभिर्मन्त्रैः पञ्च आज्याहुतीर्जुहोति ॥ १ ॥

अग्ने प्रायश्चित्ते(A) त्वं देवानां प्रायश्चित्तिरसि ब्राह्मण

---

१ अत्रापररात्रग्रहणं पूर्वाह्णव्युदासार्थम् । चतुर्थीकर्मणो विवाहाङ्गत्वाद् बहिःशालायां मा भूदित्यभ्यन्तरग्रहणम् । अग्निमुपसमाधायेति ग्रहणमभ्यन्तरगुणविधानार्थम् । ब्रह्माणमुपवेश्येति च उदपात्रस्थापनावसरविधानायोक्तम् । चरोर्भूतोपादानां मा भूदिति श्रपयित्वेत्युच्यते । आज्यभागाविष्ट्वेति ग्रहणमाज्याहुतिकालविधानार्थम् ।

२ अथ चतुर्थीकर्म वैवाहिकमग्निं वध्वा सहादाय (वै० खा० गृ० ३।५)

"विवाहाग्निमग्रतोऽजस्रं नयन्ति ।" (आश्व० गृ० १।८।६)

"समाप्यैतमग्निमनु हरन्ति ।" (आप० गृ० २।५।१४)

रेणुः—

"अजस्रमग्निधारणं भवेद्विवाहहोमतः ।
ततोऽग्निना सह व्रजेत् प्रयाणकालतो वरः ॥
कथं चिदग्निनाशनं भवेत् स्वयोनिनिर्हृतिः" ॥ इति ॥

अग्न्यनुगमननिमित्तमनादिष्टप्रायश्चितम् ।

"अनुगमने उपवासश्चान्यतरस्य भार्यायाः पत्युर्वा ।" (आप० गृ० २।५।१९)

(A) सर्वेषां परमेष्ठी त्रिष्टुप् लिङ्गोक्ता देवता होमे विनियोगः । हे अग्ने हे प्रायश्चित्ते सर्वदोषापहारक यतः त्वं देवानां मध्ये प्रायश्चित्तिः दोषापहर्ता असि अत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्वा नाथकाम उप धावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा ।

वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मण-रुचानाथकाम उप धावामि याऽस्यौ प्रजाघ्नी तनूस्तामस्यौ नाशय स्वाहा ।

सूर्य प्रायश्चित्ते, त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उप धावामि याऽस्यौ पशुघ्नी तनूस्तामस्यै नाशय स्वाहा ।

चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उप धावामि याऽस्यौ गृहघ्नी तनूस्तामस्यौ नाशय स्वाहा ।

गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्म-णस्त्वा नाथकाम उप धावामि याऽस्यौ यशोघ्नी तनूस्तामस्यौ नाशय स्वाहा" इति ॥२॥

स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति ॥३॥

स्पष्टोऽर्थः ॥३॥

हुत्वा हुत्वैतासामाहुतीनामुदपात्रे संस्रवान्त्समवनीय

तत एनां मूर्द्धन्यभिषिञ्चति–"या[1] ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी, निन्दिता तनूर्जारघ्नीं ततऽ एनां करोमि सा जीर्य त्वं मया सहाऽसौ" इति ॥४॥

अहं ब्राह्मणो भूत्वा त्वाम् उपधावामि आराधयामि । किम्भूतोऽहम् आशीःकामः । अस्यै अस्याः वध्वाः या पतिं हन्तीति पतिघ्नी तनूः तन्वा अवयवः अस्ति ताम् अस्या नाशय । तेन यत् अस्याः पतिनाशकम् अङ्गलक्षणं हस्तरेखादिकम्, तद्दूरीकृत्य स्वङ्गं कुरु । एवमग्रेतना अपि मन्त्रा व्याख्येयाः ।

(१) या त इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वधूर्देवता अभिषेचने विनियोगः । हे कन्ये ! या ते पत्यादि घातिनी निन्दिता तनूः अस्ति अनेन अभिषेकेन तव एनां तनूं जारघ्नीम् उपपतिघातिनीं करोमि सा त्वं मया पत्या सह जीर्य वृद्धा भव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतासां पूर्वोक्तानां षण्णाम् आहुतीनां संस्रवान् स्रुवलग्नाज्यचर्ववयवान् उत्तरतः पूर्वं स्थापिते उदपात्रे समवनीय प्रक्षिप्य ततः तस्मात् संस्रवमिश्रम् उदकं गृहीत्वा एनां वधूं मूर्धनि मस्तके या ते पतिघ्नीति मन्त्रेण वरोऽभिषिञ्चेत् ॥४॥

अथैनाᳬ स्थालीपाकं प्राशयति—

"प्राणैस्ते (A) प्राणान्त्सन्दधाम्यस्थिभिरस्थीनि माᳬसैर्माᳬसानि त्वचा त्वचम्" इति ॥५॥

अथ अभिषेकानन्तरम् एनां (१)वधूं स्थालीपाकं वरः प्राशयेत् 'प्राणैस्ते" इति मन्त्रेण ॥५॥

तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित् परो भवति ॥६॥

यतः अनेन चरुशेषप्राशनकर्मणा भर्त्रा सह ऐक्यं प्राप्ता दाराः तस्मात् श्रोत्रियस्य दारेण भार्यया सह उपहासं मैथुनं नेच्छेत् कश्चित । हि यस्मात् एवंवित् एवं कुर्वन् श्रोत्रियस्य परः शत्रुर्भवति । समाप्तं चतुर्थीकर्म ॥६॥

गर्भाधानमाह—

तामुदुह्य यथर्तु प्रवेशनम् ॥७॥

तां वधूम् उदुह्य विवाहकर्मणा भार्यात्वं संपाद्य यथर्तु ऋतौ ऋतौ प्रवेशनम् अभिगमनं कुर्यात् ॥७॥

(A) प्राणैस्त इति प्रजापतिरृषिर्यजुश्छन्दो वधूर्देवता वध्वाः स्थालीपाकप्राशने विनियोगः ।

हे कन्ये ! मम प्राणादिभिः ते तव प्राणादीन् सदधामि संयोजयामि ।

(१) वधूसंस्कारोऽयम् नतु द्रव्यप्रतिपत्तिः । अतो द्रव्यस्य नाशदोषादावन्यद्रव्यस्य प्राशनं कार्यम् ॥

तदुक्तं कारिकायाम् —

"वधूसंस्कार एवायं प्रतिपत्तिरियं नतु ।
अतो द्रव्यविनाशादौ द्रव्येणान्येन तद् भवेत् ॥
शेषद्रव्यविनाशादौ लुप्यन्ते प्रतिपत्तयः" ॥ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाकामी वा काममाविजनितोः संभवामेति वचनात् ॥८॥

स्त्रियाः काममनतिक्रम्य इति यथाकामम् यथाकाममस्यास्तीति यथाकामी यथाकामी वा भवेत् न ऋतुकालाभिगमननियमः । कुतः ? कामम् स्वेच्छया आविजनितोः आप्रसवात् संभवाम भर्त्रा सह सङ्गता भवाम इति स्त्रीणाम् इन्द्रात् वरप्रार्थनावचनात् ॥८॥

अथास्यै दक्षिणाꣳसमधिहृदयमालभते "यत्ते सुसीमे हृदयं दिवि [A]चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्" इति ॥९॥

अथ अभिगमनानन्तरम् अस्यै अस्या भार्याया दक्षिणांसं दक्षिणस्कन्धम् अधि उपरि दक्षिणंहस्तं नीत्वा हृदयम् आलभते स्पृशति यत्त इति मन्त्रेण वरः ॥९॥

एवमतऽ ऊर्ध्वम् ॥१०॥११॥

प्रथमर्तौ यथा हृदयाऽऽलम्भः कृतः एवमुक्तप्रकारेणाऽतोऽनन्तरमूर्ध्वम् ऋतावृतौ तदालम्भः कार्यः ।

एवम् अनेनैव प्रकारेण अतोऽनन्तरम् ऋतौ ऋतौ प्रवेशनं यथाकामं वा इति हरिहरव्याख्या ॥१०॥

इति प्रथमस्य एकादशी कण्डिका ॥११॥

पक्षादिकर्मनिरूपणम् ।

पक्षादिषु स्थालीपाकꣳ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति ॥ १ ॥

(A) टि०—यत्त इति प्रजापतिऋर्षिरनुष्टुप्छन्दो वधूहृदयालम्भने विनियोगः ।

मन्त्रार्थः—

हे सुसीमे ! शोभनसीमन्तिनि ! यत् ते तव हृदयं मनः दिवि वर्तमाने चन्द्रमसि श्रितं तदहं वेद, तच्च मनः मां विद्यात् पश्येम शरदः शतमित्याद्युक्तार्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षाणां शुक्ल-कृष्णपक्षाणाम् आदयः पक्षादयः तासु [1]पक्षादिषु प्रतिपत्सु स्थालीपाकं [2]श्रपयित्वा तेनैव स्थालीपाकेन दर्शाव्यवहितप्रतिपदि दर्शदेवताभ्यः, पौर्णमास्यव्यवहितप्रतिपदि पौर्णमासदेवताभ्यो हुत्वा ब्रह्मण इत्येवमादिभ्यश्चतुर्भ्यः स्थालीपाकेनैव जुहोति । अग्निः, विष्णुः, इन्द्राग्नी, इति दर्शदेवताः, अग्निः, उपांशु अग्नीषोमौ, अग्नीषोमौ इति पूर्णमासदेवताः ॥१॥

विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्यऽ आकाशाय च ॥२॥

ततः स्थालीपाकादेव विश्वेदेवादिभ्यो बलित्रयमग्नौ दद्यात् । बलिहरणवाक्ये च नमः शब्दः अन्ते कार्यः ॥ २ ॥

वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा, [3]प्रजापतये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥३॥

वैश्वदेवस्येत्यवयवलक्षणा षष्ठी । विश्वे देवा देवता देवपितृमनुष्या-

(१) अत्र यद्यपि पक्षादिष्विति सामान्येनोक्तम् । तथापि—

"पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते" ॥

इति वचनात् मध्याह्नादर्वाक् पौर्णमासीसमाप्तौ चतुर्दश्यामुपोष्य पूर्णिमायां पक्षादिकर्म । दर्शस्थालीपाकस्तु यस्मिन्दिनेऽपराह्णेऽमावास्यालाभः तस्मिन्दिने उपोष्य परेद्युः कार्यं इति ।

आधानानन्तरं शुक्लप्रतिपदि स्थालीपाकारम्भो भवति । अतश्च शुक्लपक्षे आधानकरणेऽपि न कृष्णप्रतिपदि एतदारम्भः ।

"सायमादि-प्रातरन्तमेकं कर्म प्रचक्षते ।
पौर्णमासादि-दर्शान्तमेकमेव विदुर्बुधाः" इति ॥

(२) ह्यपोत्सर्गे "पौष्णस्य जुहोति" इति पूपसम्बद्धः पृथगेव पिष्टमयश्चरुः पूर्वसिद्धो यथा गृह्यते तथा अत्रापि सिद्धचरोरुपादानं मा भूदिति श्रपयित्वेत्युच्यते ।

वैश्वदेवपाकस्तु सिद्ध एव ग्राह्यः । यतो विश्वेदेवा देवता अस्य इति वैश्वदेवेन दैनन्दिनो भोजनार्थः पाकोऽभिधीयते ।

(३) परिभाषातः प्राप्तत्वात् स्वाहाकारग्रहणं बलिनिवृत्त्यर्थम् । अतः प्रदानार्थोऽपि स्वाहाकारो न बलिहरणेषु भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयो ऽस्येति वैश्वदेवः सर्वार्थः प्रत्यहं क्रियमाणः पाकः, तस्य वैश्वदेवस्याग्नये स्वाहेत्यादिभिर्मन्त्रैर्जुहोति ॥३॥

बाह्यतः स्त्रीबलिꣳ हरति ।

"नमः स्त्रियै, नमः(A) पुꣳसे वयसेऽवयसे, नमः शुक्लाय कृष्णदन्ताय पापीनां पतये, नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त ऽउत वाऽरण्ये तेभ्यो, नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददत्वि"ति ॥४॥

ततो बाह्यतः शालायां बहिःप्रदेशे नमः स्त्रियै इत्यादिभिः पञ्चभिर्मन्त्रैः प्रतिमन्त्रं स्थालीपाकात् स्त्र्यादिभ्यो बलिः स्त्रीबलिस्तं स्त्रीबलिं हरति स्रुवेण मन्त्रान्ते भूमौ प्रक्षिपति ॥४॥

शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनम् ॥५॥

बलिहरणानन्तरं शेषं स्थालीपाकपात्रस्थितम् अवशिष्टं चरुम् अद्भिः लौकिकोदकेन प्रप्लाव्य मज्जयित्वा ततो ब्राह्मणभोजनं कारयेत् ॥५॥१२॥

इति प्रथमस्य द्वादशी कण्डिका ॥१२॥

(A) प्रजापतिर्यजूꣳषि लिङ्गोक्ता देवता बलिकर्मणि विनियोगः ।

स्त्रियै सन्तानसुखविघातिन्यै नमः अस्तु ॥१॥

तथा पुंसे सन्तानसुखविघातिने नमः अस्तु । किम्भूताय पुंसे वयसे अवयवसे च, वृद्धाय बालाय च । (२)

शुक्लाय शुक्लवर्णाय कृष्णदन्ताय पापीनां पतये पुंसे नमः अस्तु (३)

ये ग्रामे वसन्तः उत वा अथवा अरण्ये वसन्तो मे प्रजाम् उपलोभयन्ति मोहयन्ति तेभ्यो नमः अस्तु । (४)

एभ्यो बलिं हरामि । स्वस्ति मे अस्तु । प्रजां मे ददतु तेभ्यो नमश्चास्तु । (५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा यदि गर्भं न दधीत सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति "इयमोषधी[1] त्रायमाणा सहमाना सरस्वती । अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभम्" इति ॥१॥१३॥

सा धर्मपत्नी (भार्या) यदि गर्भकामा गर्भं न दधीत न धारयेत्तदा तस्मिन् समये पतिः श्वेतपुष्प्याः श्वेतानि पुष्पाणि प्रसूनानि यस्याः सा श्वेतपुष्पी, तस्यास्तथोक्तायाः सिंह्याः कण्टकारिकायाः[2] भटकटैया इति ख्यातायाः उपोष्य पुष्यनक्षत्रदिवसात्पूर्वदिने स्वयमुपवासं कृत्वा अर्थात् यमनियमादिमान् भूत्वा पुष्यनक्षत्रविशिष्टे दिने तस्याः पूर्वोक्तायाः कण्टकारिकाया मूलं शिफामुत्थाप्योत्पाट्य स्ववेश्मनि आनीय तत्र यत्नतः स्थापयित्वा, यदा ऋतुमती भार्या स्यात्तदा चतुर्थेऽह्नि स्नातायां भार्यायां सत्यां निशायां रात्रावुदपेषम् उदकेन जलेन तन्मूलं पिष्ट्वा पेषयित्वा अर्थाद् द्रवीभूतं सम्पाद्य निजधर्मपत्न्याः दक्षिणनासिकायाम् दक्षिणे नासापुटे आसिञ्चति प्रक्षिपति पतिस्तदुदपेषम् "इयमोषधी० जग्रभम्" इत्यन्तेन मन्त्रेण ॥१॥१३॥

इति प्रथमस्य त्रयोदशी कण्डिका ॥१३॥

---

(१) प्रजापतिर्बृहत्योषध्यासेचने विनियोगः ।

ओषति दहति दोषान्, धत्ते गुणानित्योषधी 'उष दाहे डुधाञ् धारणे" यत इयमोषधी त्रायमाणा प्रयोक्तॄन्, सहमाना दोषवेगान्, सरस्वती सरति कारणतयाऽनुगच्छति इति सरो रसस्तद्वती । अतोऽस्याः बृहत्याः कण्टकारिकायाः प्रभावाद यथा अहम् पितुर्जनकस्य नाम अहमस्य पुत्र इति जग्रभम् गृहीतवानस्मि, तथा अहमुत्पत्स्यमानः पुत्रोऽपि अहमस्य पुत्र इति मम नाम गृह्णातु इति योजना । हृग्रहोर्भश्छन्दसि इति भत्वम् । द्विर्भावश्छान्दसः ॥

(२) कण्टकान् इयर्ति इति कण्टकारिका तस्याः ।

"निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका" इत्यमरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पुंसवनम् ॥१॥

अथ गर्भधारणानन्तरं क्रमप्राप्तं पुंसवनं पुंसवनाख्यं कर्म उच्यत-इति सूत्रशेषः (१) ॥१॥

पुरा स्यन्दत इति मासे द्वितीये तृतीये वा ॥२॥

पुरा स्यन्दते गर्भस्पन्दनात् किञ्चिच्चलनात पुरा पूर्वमेव स्पन्दते तत, चलिष्यति (२) तत इति हेतोः मासे द्वितीये तृतीये वा मासे भवितुमर्हति। कालातिक्रमे तु सत्यपि चलने कार्यम्।

"एतदेव पुरा गर्भचलनादकृतं यदि।
पूर्वं सीमन्तकात कार्यं स्यन्दितेऽपि बृहस्पति"

रिति वचनस्वरसात् ॥२॥

यदहः पुंसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याऽऽप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गाँश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनं हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याम् ॥३॥

गर्भधारणसमयात् द्वितीये तृतीये वा मासे यदहः यस्मिन् अहनि दिने पुंसा नक्षत्रेण पुरुषनामकेन नक्षत्रेण, पुरुषनामकं नक्षत्रं पुष्यादि। तेन नक्षत्रेण चन्द्रमाः तारापतिः युज्येत संयुक्तः स्यात्तदहः तस्मिन्नहनि उपवास्य अशनमकारयित्वा आप्लाव्य भार्यां स्नापयित्वा, अहते नूत्ने सकृत्प्रक्षालिते सदशे दशासंयुक्ते वाससी परिधानीयोत्तरीये द्वे वस्त्रे परिधाप्य परिहितं कारयित्वा, न्यग्रोधावरोहान्–अवाचीनमधः रोहन्ति जायन्ते इति अवरोहाः न्यग्रोधस्य वटस्यावरोहास्तान् तथोक्तान्। शुङ्गाँश्च ऊर्ध्वाङ्कुरान् मुकुलाकृतिविशिष्टाँस्तदग्रपल्लवानिति यावत्। चकारोऽत्रावरोहसमुच्चयार्थः। ततश्चोभयं निशायां रात्रौ उदपेषं पिष्ट्वा उदकेन जलेन पेषयित्वा पूर्ववदासेचनम्। पूर्ववत गर्भधारणार्थोक्तवदेव दक्षनासा-

(१) "अस्यां भार्यायामुत्पत्स्यमानगर्भस्य बैजिकगार्भिकदोषपरिहारसुरूपताज्ञानोदयप्रतिरोधिपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनं करिष्ये" इति सङ्कल्पवाक्यम्।

(२) यावत्पुरा निपातयोर्लडिति पुरा योगे भविष्यार्थे वर्तमानप्रयोगः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रन्ध्रे भर्तुरासिञ्चति धारयति "हिरण्यगर्भः सम्" अ० २३, मं० १ "अद्भ्यः सम्भृत" अ० ३१, मं० १७ इत्येताभ्यामृग्भ्याम् ॥३॥

कुशकण्टकꣳ सोमाꣳशुं चैके ॥४॥

एके आचार्याः पिष्यमाणेषु न्यग्रोधावरोहशुङ्गेषु कुशानां दर्भाणां कण्टकं मूलं, सोमस्य सोमनामकलताविशेषस्य अंशुं खण्डं च प्रक्षिपेत् इति मन्यन्ते । एके नेति तस्माद्विकल्पः । कल्पेऽस्मिन् द्रव्यचतुष्टयस्य पेषणमिति भावः ॥४॥

काम्यमाह—

कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः॥५॥

स भर्ता यदि कामयेत अयं गर्भः गर्भस्थो बालकः वीर्यवान् पराक्रमी स्यात् भवतु तदा अस्याः भार्यायाः उपस्थे अङ्के कूर्मपित्तं कृत्वा स्थापयित्वा कूर्मपित्तशब्देन-कूर्मपृष्ठसम्पादितं पात्रमुच्यते" अन्ये तु "जलपूर्णं शरावमिति।" विकृत्या विकृतिच्छन्दस्कया "सुपर्णोऽसि गरुत्मान् इत्यारभ्य गच्छ स्वः पत" (य० अ० १२, मं० ४) इत्यन्तया ऋचा एनं गर्भम् अभिमन्त्रयते, अनामिकाग्रेण गर्भाशयम् उदरं स्पृष्ट्वा विलोकयित्वा वा मन्त्रं पठति (१) ॥५॥१४॥

इति प्रथमस्य चतुर्दशी कण्डिका॥१४॥

अथ सीमन्तोन्नयनम् ॥१॥

पुꣳसवनवत् ॥२॥

अथ पुंसवनानन्तरमवसरप्राप्तं सीमन्तस्य केशविन्यासस्य उन्नयनं पृथक्करणं व्याख्यास्यत इति । सीमन्तोन्नयनमिति संस्कारः । स तु

---

(१) "स्पृशन्ननामिकाग्रेण क्वचिदालोकयन्नपि ।
अनुमन्त्रयेत् सर्वत्र सदैवमनु मन्त्रयेत्" इति कात्यायनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गर्भसद्भावे सति भवति, गर्भाभावे एतस्याप्यभावः। अतः प्रतिगर्भं क्रियत इति कर्काचार्याः (१) अपरे तु प्रथमगर्भ एवेति।

पुंसवनवदित्यनेन कर्काचार्यमतं यस्मिन् अहनि पुंविशिष्टेन नक्षत्रेण चन्द्रमा युज्येत तस्मिन् अहनि भोजनमकारयित्वा संस्नाप्याहते वाससी परिधाप्येति लभ्यते ॥१॥२॥

प्रथमगर्भे मासे षष्ठेऽष्टमे वा ॥३॥

तच्च सीमन्तोन्नयनं प्रथमे आद्ये गर्भे गर्भधारणात् षष्ठे मासि अष्टमे वा मासि भवति। द्वितीयादिगर्भेषु तु न मासनियम इति कर्काचार्याः। अन्ये तु प्रथमगर्भे इति पृथक् सूत्रम्। मासे षष्ठेऽष्टमे वेति भिन्नमिति वर्णयन्ति(२) तेन कर्कमते प्रतिगर्भम्। अन्येषां मते प्रथमगर्भ एवेति (३) ॥३॥

तिलमुद्गमिश्रꣳ स्थालीपाकꣳ श्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्भद्रपीठऽ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जूलैस्त्र्येण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्ध्वं विनयति "भूर्भुवः (A) स्वरि"ति ॥४॥

---

(१) "केचित्तु गर्भसंस्काराद् गर्भं गर्भं प्रयुञ्जते"

इति कारिकायाम्।

(२) "सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः।

यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥" इति।

ततो द्वितीयादिगर्भाणां तत्संस्कार परिलोपो न शङ्कनीयः।

(३) "तनु रुधिरप्रियाऽलक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदाभभूतमहालक्ष्मीसमावेशनद्वारा प्रतिभर्गं बीजगर्भसमुद्भवैनोनिबर्हणजनकातिशयद्वारा च श्रीपरमेश्वरप्रीत्यर्थं स्त्रीसंस्काररूपं सीमन्तोन्नयनाख्यं कर्म करिष्ये" इति संकल्पवाक्यम्।

(A) भूरिति। हे स्त्रि ! भूरादिलोकत्रयमग्नित्रयं प्राणत्रयं वा तत्र सुखार्थं-त्वत्सीमन्तं विनयामि प्रापयामि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र विशेषमाह—तिलः मुद्गैर्मिश्रः सम्मिश्रस्तिलमुद्गमिश्रस्तं तथोक्तं स्थालीपाकम् ओदनं चरुं श्रपयित्वा आज्यभागं विधाय तदन्ते स्थालीपाकेन प्रजापतेर्हुत्वा-प्रजापतये स्वाहेत्येकामाहुतिमग्नौ प्रक्षिप्यात्र स्विष्टकृदादि-दक्षिणादानान्तं कृत्वा अग्नेः पश्चात् पश्चिमस्यां दिशि पत्युर्दक्षिणतो भद्रपीठे भद्रासने उपविष्टायामासीनायां गर्भिण्यां सत्यां[1], युग्मेनौदुम्बरवृक्षोद्भवेन सटालुग्रप्सेन अपक्वफलद्वयनिबद्धैकस्तबकेन, त्रिभिश्चदर्भपिञ्जूलैर्दर्भपवित्रैः (दर्भपिञ्जूलशब्देन कुशसङ्घात-उच्यते ऐ०ब्रा० प०१ अ०२) त्र्येण्या त्रिषु स्थानेषु एता शुक्ला त्र्येणी तया त्रेण्या शलल्या शल्लकीकण्टकेन वीरतरशङ्कुना वीरतरशङ्कुः आश्वत्थशङ्कुः तेन, शरेषीकया वा पूर्णचात्रेण च सूत्रकर्तनसाधनभूतो लोहकीलस्तर्कुस्तस्यापरं नाम चात्रं,तेन सूत्रपूर्णेन। चकारोऽत्र औदुम्बरादिफलस्तबकादिद्रव्यसमुच्चयार्थकः । अतो हेतोः उक्तद्रव्यादिपञ्चकेन स्त्रियाः सीमन्तमूर्ध्वं विनयति, केशललाटयोः सन्धिस्थानमारभ्य केशान् पृथक्करोति द्वैधीकरोतीति भावः ॥४॥

"सीमन्तः कथ्यते स्त्रीणां केशमध्ये तु पद्धतिरि"—
त्यभियुक्तग्रन्थे। भूर्भुवः स्वरिति मन्त्रेण ॥४॥

प्रतिमहाव्याहृतिभिर्वा ॥५॥

विनयनमिति सूत्रार्थः । अत्र विनयामीत्यध्याह्रियते। तेन ओं भूः विनयामि, ओं भुवः वि०, ओं स्वः वि० इति मन्त्राः ॥५॥

त्रिवृतमाबध्नातिA "अयमूर्जावतो वृक्षऽ ऊर्जीव फलिनी भवे"ति ॥६॥

त्रिवृतं त्रिभिर्वृत्यते प्रथ्यत इति त्रिवृत तां वेणीं प्रति तत्र व ग्रेण्याम् औदुम्बरादिपुञ्जपञ्चकमाबध्नाति नियुनक्ति भर्ता "अयमू० भव" इत्यन्तेन मन्त्रेण ॥६॥

अथाह वीणागाथिनौ-राजानꣳ संगायेतां यो वाऽप्यन्यो वीरतरऽ इति ॥७॥

---

(१) भद्रपीठशब्दो गोमयपीठे चतुरस्रे प्रसिद्ध इति भर्तृयज्ञः।

A) प्रजापतिर्यजुः फलिनीबन्धने विनियोगः ।

हे स्त्रि ! यतोऽयमूर्जावान् वृक्षः "हलन्ताट्टाप् निशा दिशेतिवत्" अस्य चोर्जावतो वृक्षस्य ऊर्जीव सफला शाखेव त्वमपि फलिनी फलवती भवेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वेण्यां बन्धनानन्तरं स्वहस्ते वीणां गृहीत्वा, गाथागानकर्त्तारौ प्रति वीणागाथिनौ "राजानं०. सङ्गायेतामि"ति कर्ता प्रैषमाह । अतः परं तौ वीणागाथिनौ ब्राह्मणावेव सोत्साहौ राजसम्बन्धि गानं गायतः । अथवा अन्यस्तदतिरिक्तो यः कश्चिद्वीरतरोऽतिपराक्रमी नलादिः तं गायेताम् । अत्रात्मनेपदं छान्दसम् । एवं च गेये विकल्पः ॥७॥

नियुक्तामप्येके गाथामुपोदाहरन्ति—"सोम एव नो(A) राजेमा मानुषीः प्रजाः। अविमुक्तचक्रऽ आसीरंस्तीरे तुभ्यम-सावि"ति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति ॥८॥

एके आचार्याः नियुक्तामाम्नायविहितां गाथां मन्त्रम् उप समीपे उदाहरन्ति गानं कुर्वन्ति । एके न । अतो विकल्पः । अत्र मन्त्रः "सोम एव नो० तुभ्यमसौ"इति । असाविति स्थले च सीमन्तिनी यां नदीमुप समीपे आवसिता आश्रिता भवति तस्याः नद्याः गाथागानकर्ता "गङ्गे सरस्वति"इत्येवं नाम गृह्णाति उच्चारयतीत्यर्थः ॥८॥

ततो ब्राह्मणभोजनम् ॥९॥१५॥

व्याख्यातं चैतत् । कर्मण्यस्मिन् ब्राह्मणभोजनम् इष्टकुटुम्बाद्यतिरिक्तपरमिति मुरारिमिश्राः ॥९॥१५॥

इति प्रथमस्य पञ्चदशी कण्डिका ॥१५॥

सोष्यन्तीमद्भिरभ्युक्षति—एजतु दशमास्यऽ इति प्राग्यस्यै त इति ॥१॥

(A) प्रजापतिर्गायत्री सोमो देवता गाने विनियोगः—

सोमश्चन्द्र एव नोऽस्माकं राजा प्रभुः । अत इमाः प्रजाः मानुषीः मानुष्यः सौम्याः नतु राक्षस्यः "यथा राजा तथा प्रजेति स्मृतेः"। हे गङ्गादिनदि ! तुभ्यं तव सोमरूपायाः तीरे प्रजा आसीरन् । त्वामाश्रित्य स्थिताः प्रजा इत्यर्थः । कीदृशे—अविमुक्तचक्रे अनुल्लंघितराजाज्ञे । "चक्रं रथाङ्गे व्यूहे च राजाज्ञायाम्" इत्यभिधानात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोष्यन्तीं प्रसवशूलवतीं प्रसवसमये शूलादिप्रसववेदनासंयुक्तां स्त्रियं भर्ता "एजतु दशमास्य इत्यारभ्य जरायुणा सह" (शु० य० अ० ८ मं० २८) इत्यन्तेन मन्त्रेणाद्भिरुदकेन अभ्युक्षति सिञ्चति। पूङ् प्राणिगर्भ विमोचने ॥ १ ॥

अथावरावपतनम्—"अवैतु (A) पृश्नि शेवलꣳ शुने जराय्वत्तवे। नैव माꣳसेन पीवरीं न कस्मिꣳश्चनायतनमव जरायु पद्यतामि"ति ॥२॥

अथोक्तोपाधिविशेषणविशिष्टां स्त्रियं प्रोक्षणानन्तरं 'अवरावपतनं' सञ्ज्ञकं मन्त्रं पठतीत्यध्याहारः। अवरमुल्बं जरायु गर्भवेष्टनम् अव अवाचीनमधः पतत्यनेनेत्यवरावपतनो मन्त्रः, तं सूत्यन्तके उपविश्य पतिः पठति। यथा—अवैतु पृश्निमित्यारभ्य पद्यतामित्यन्तम् ॥२॥

जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति ॥३॥

जातस्याविर्भूतस्योत्पन्नस्य कुमारस्य शिशोः अच्छिन्नायां नाड्यां अच्छिन्ने अखण्डिते नाले जनको मेधाजननायुष्ये—मेधाजननं च आयुष्यं चेति मेधाजननायुष्ये ते तथोक्ते करोति। अत्र सूत्रे कुमारपद-पाठात् इतः प्रभृति कर्म स्त्रीणां न भवति इति ध्वन्यते ॥३॥

अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा

(A) प्रजापतिर्ऋषिर्गर्भस्त्रवपाते विनियोगः—हे सोष्यन्ति! तव जरायु। अवैतु अध आयातु पततु। किंभूतम्-पृश्नि। नानारूपं, तथा शेवलं-पिच्छलं जलोपचितं वा। किमर्थं-शुने शुनः अत्तवे भक्षणाय। हे पीवरि! गर्भधात्रि तव जरायु मांसेनाम्ररूपेण सह नैवावपद्यताम् मा पततु।

आयतनं विस्तृतं न कस्मिँश्चन गर्भोपघातके निमित्ते सत्यपि आयतनं विस्तृतं वा सद्य अधः पद्यतां पततु।

(१) ममास्य कुमारस्य गर्भाम्बुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धि-बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्ये इति सङ्कल्पवाक्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"भूस्त्वयि दधामि(१)भुवस्त्वयि दधामि, स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति" ॥४॥

सुवर्णान्तर्हितया—सुवर्णेन हिरण्येन अन्तर्हितया आच्छादितया अनामिकयाऽङ्गुल्या अर्थात् सुवर्णान्वितोपकनिष्ठया मधुघृते—मधु च घृतं च ते द्वन्द्वसामर्थ्यादेकीकृते घृतं वा—केवलं घृतं सर्पिरेव पिता बालकं "ॐभूस्त्वयि दधामि" इत्यादिभिश्चतुर्भिर्मन्त्रैः सकृत्प्राशयति, अर्थात्तस्य जिह्वायां निमार्ष्टि (२) ॥४॥

अथास्यायुष्यं(३)करोति नाभ्यां दक्षिणे वा कर्णे जपति—"अग्निरायुष्मान्त्स (४)वनस्पतिभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । सोमऽ आयुष्मान्त्सऽ ओषधीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ब्रह्मायुष्मत्तद् ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । देवाऽ आयुष्मन्तस्तेऽ मृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ऋषयऽ आयुष्मन्तस्ते व्रतै-

---

(१) ऋष्यादि प्रागुक्तम् । हे कुमार ! ते तव मेधाजननार्थं आस्ये मुखे केवलं मधु घृतं न दधामि, किन्तु भूरादिलोकत्रयस्य वेदत्रयस्याग्नित्रयस्य प्राणत्रयस्य वा मेधां दधामि । त्वयीति पाठः शाखान्तरीयः ।

(२) मेधाजननं स्वकाले न कृतं चेत्कालान्तरे न भवति नियतकालत्वात् ।

(३) आयुष्यं कर्म स्वकाले न कृतं चेत्कालान्तरेऽपि भवति ।

(४) प्रजापतिर्ऋषिर्गायत्री लिङ्गोक्तदेवता आयुष्यकरणे जपे विनियोगः ।

मन्त्रार्थः—स प्रसिद्धोऽग्निः आयुष्मान् भवति । कथं—वनस्पतिभिरिध्मादिभिः काष्ठैरिव आयुष्मान् भवति । तेनाग्न्यायुषा हे कुमार ! त्वा त्वाम् आयुष्मन्तं निर्दोषदीर्घायुषं करोमीति वाक्यार्थं उत्तरमन्त्रेष्वपि सम्बध्यते ।

सोम इति । सोम ओषधीभिः फलपाकान्तैर्व्रीह्यादिभिः, ब्रह्म वेदो ब्राह्मणैरध्येतृभिः, देवा इन्द्रादयोऽमृतेन सुधया, ऋषयो व्रतैः कृच्छ्रादिभिः, पितरः स्वधाभिः श्राद्धान्नैः, यज्ञो दक्षिणाभिः, समुद्रः स्रवन्तीभिर्नदीभिरित्येतावान्विशेषः । शेषं पूर्ववत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । पितरऽ आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । यज्ञऽ आयुष्मन्त्स दक्षिणाभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । समुद्रऽ आयुष्मान्त्स स्रवन्तीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमी"ति त्रिः (१) ॥ ५ ॥

अथ मेधाजननानन्तरम् अस्य बालकस्य आयुषे हितम् आयुष्यम् आयुष्यसंज्ञकं कर्म करोति । तद्यथा—नाभ्यां नाभिसमीपे दक्षिणकर्णसमीपे वा स्थित्वा पिता अग्निरायुष्मानित्यारभ्य—आयुष्मन्तं करोमीत्यन्तान् अष्टौ मन्त्रान् त्रिर्जपति त्रिरुच्चारयति ॥५॥

त्र्यायुषमिति च ॥६॥

"त्र्यायुषं जमदग्नेः" इत्यमुमपि मन्त्रं कुमारस्य नाभौ दक्षकर्णे वा जपेद्वारत्रयम् । चकारोऽत्र पूर्वसूत्रस्थत्रिःपदानुकर्षकः ॥६॥

स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत् ॥७॥

स पिता यदि कामयेत इच्छेत् यदयं कुमारः सर्वमायुरियात् सर्वं समस्तं शतवर्षपर्यन्तमायुः लभेत तदा वात्सप्रेण—"दिवस्परीत्यारभ्य अस्ताव्यग्निरित्यतः प्राक् ये मन्त्राः (१२।१७-२८) तेषां वात्सप्र इति संज्ञा । तेन वात्सप्रेण एनं शिशुमभिमृशेत् अभिमन्त्रयेदित्यर्थः ॥७॥

दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि ॥८॥

दिवस्परि इत्येतस्य द्वादशर्चस्यानुवाकस्योत्तमामृचम् अस्ताव्यग्निरित्येतां वर्जयित्वाऽवशिष्ट एकादशर्चो वात्सप्रोऽत्र गृह्यते ॥८॥

---

(१) जातकर्मणि हेम्नाऽऽभ्युदयिकश्राद्धम् । तच्च जीवत्पितृकेणापि पितुः पितॄनुद्दिश्य कार्यम् ।

"उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥" इति वचनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयात्। इममनु प्राणितेति(१) ॥ ९ ॥

ततः प्रतिदिशं—सर्वासु पूर्वादिषु चतसृषु दिक्षु मध्ये च पञ्च ब्राह्मणान् अवस्थाप्य स्थापयित्वा "इममनु प्राणित" इति तान् पूर्वोक्तान् ब्राह्मणान् प्रति प्रैषं दद्यात् ॥९॥

पूर्वो ब्रूयात्प्राणेति(२)व्यानेति दक्षिणोऽपानेत्यपरऽ उदानेत्युत्तरः समानेति पञ्चमऽ उपरिष्टादवेक्षमाणो ब्रूयात् ॥१०॥

ततः प्रेषिताः सन्तो विप्राः प्राच्यादिक्रमेणेमं बालकं लक्षीकृत्य पूर्वः पूर्वस्यां दिशि अवस्थितो ब्रूयात्प्राणेति।

दक्षिणो दक्षिणस्यां दिश्यवस्थितो ब्राह्मणो व्यानेति ब्रूयात्।

एवम् अपरः पश्चिमायां दिशि, तथा चोत्तरः उत्तरस्यां दिश्यवस्थितश्च ब्राह्मणः क्रमेण "अपान" "उदान" इति ब्रूयात्। उपरिष्टादूर्ध्वमवेक्षमाणोऽवलोकयन् पञ्चमो मध्येऽवस्थितो ब्राह्मणः "समान" इति ब्रूयात्॥१०॥

स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु ॥११॥

अपिवाऽविद्यमानेषु ब्राह्मणेषु स्वयमेव कुमारजनक अनुपरिक्रामँस्तत्तद्दिशि कुमारस्याभिमुखीभूय पूर्वोक्तं "प्राण" "व्यान" "अपान" "उदान" "समान" इति कुर्यात् ब्रूयादित्यर्थः। कल्पेऽस्मिन् प्रैष विरहः ॥११॥

(१) भो ब्राह्मणाः इमं कुमारनु लक्षीकृत्य अनुप्राणित यूयं सर्वे प्राणादि पञ्चवायुयुक्तं कृत्वा दीर्घायुष्ट्वेन आयुष्मन्तं कुरुत।

शुक्लयजुर्वेदे उपप्रयन्तः अ० ३ मं० ११ इत्यारभ्य सुपोषः पोषैः ३।३७ इत्यन्त एको वात्सप्रोऽनुवाकः। दिवस्परि अ० १२। मं० १७ अस्मे सुवीरम् १८ यावदपरो वात्सप्रानुवाकः। अनयोर्मध्ये कतरेण भाव्यम् इति संशयनिवृत्त्यर्थमिदयुक्तम्—

(२) हे कुमार ! त्वं प्राण हृदि सुस्थः प्राणो भव।
हे कुमार ! सर्वाङ्गेषु सुस्थो व्यानो भवेत्यर्थः।
हे कुमार ! त्वं गुदे सुस्थोऽपानो भवेति।
हे बालक ! त्वं कण्ठे सुस्थ उदानो भव।
हे शिशो ! त्वं नाभौ सुस्थः समानो भवेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य यस्मिन्देशे जातो भवति तमभिमन्त्रयते "वेद(१)ते भूमि हृदयं दिवि चन्द्रमसि श्रितम्। वेदाहं तन्मां तद् विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमि"ति॥१२॥

स कुमारः यस्मिन् देशे यस्मिन् भूप्रदेशे जात आविर्भूत उत्पन्नः तं देशमभिमन्त्रयते संस्कारकर्ता हस्तेन स्पृशति "वेद ते० शतमि"ति मन्त्रेण॥१२॥

अथैनमभिमृशति-"अश्मा भव(२) परशुर्भव हिरण्यमस्तृतं भव। आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम्"इति॥१३॥

अथ-जन्मदेशाभिमर्शनान्तरम् एनं-बालकं जन्मदाता अश्मा भव० शतम् इति मन्त्रेणाभिमृशति करेण स्पृशति। "सर्वकाये"इति हरिहर मिश्राः। हृदि स्पृशतीति जयरामः। मस्तके इति कारिकाकारमतम्।१३।

अथास्य मातरमभिमन्त्रयते "इडासि (३) मैत्रावरुणी वीरे

---

(१) प्रजापतिरनुष्टुप् भूम्यभिमन्त्रणे विनियोगः।

हे भूमे कुमारजन्मप्रदेश! ते तव हृदयम् भूमिर्वेद। विसर्गाभावश्छान्दः। कीदृशम्? दिवि वर्तमाने चन्द्रमसि प्रसादरूपेण स्थितम्। यद्वा कलङ्करूपेण चन्द्रमसि श्रितं, "तदेतच्चन्द्रमसि कृष्णम्" इति श्रुतेः (श-ब्रा-९-)। अहमपि तत्ते हृदयं वेद। तच्च कर्तृभूतं मां विद्यात् तम् उपकर्तुं जानातु। अतस्त्वद्दत्तपुत्रेण सह वयं पश्येम शरदः शतमित्याद्युक्तार्थम्।

(२) प्रजापतिरनुष्टुप् लिङ्गोक्तदेवताऽभिमर्शने विनियोगः—

हे कुमार! त्वमश्मा पाषाण इव भव। अत्र सादृश्यं दृढत्वप्रियत्वाभ्याम्। परशुः वज्र इवापकर्तृनाशको भव। किंच अस्तृतम् अक्षीणं हिरण्यं भव। यथा धात्वन्तरासम्भिन्नं सुवर्णं संशुद्धं तथा निर्दोषस्त्वं भवेति भावः। यतस्त्वं पुत्रनामा आत्माऽसि, अतः स त्वं वै निश्चयेन शरदः शतं जीव प्राणिहि।

(३) प्रजापतिरनुष्टुबिडाऽभिमन्त्रणे—

हे वीरे! पुत्रवति! त्वंइडा मानवी यज्ञपात्री मैत्रावरुणी मित्रावरुणयोरंशोत्पन्नासि। यथा इडायां पुरूरवा उत्पन्नो यथा वा मित्रावरुणयोरगस्त्यो वसिष्ठश्चोत्पन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीरमजीजनथाः। सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदि"ति ॥१४ ॥

अथ—कुमाराभिमर्शनानन्तरम् अस्य-कुमारस्य मातरं जननीमभिमन्त्रयते-अभिमुखीभूय आमन्त्रयते मन्त्रश्रावणेन संस्करोति "इडासि० करत्" इत्यन्तेन मन्त्रेणेत्यर्थः ॥१४॥

अथास्यै दक्षिणꣳ स्तनं प्रक्षाल्य प्रयच्छतीमꣳ स्तनमिति ॥१५॥ यस्ते स्तनऽ इत्युत्तरमेताभ्याम् ॥१६॥

अथ कुमारस्य मात्रभिमन्त्रणानन्तरम् अस्यै-अस्याः जनन्या दक्षिणं स्तनं—दक्षकुचं प्रक्षाल्य-क्षालयित्वा प्रयच्छति ददाति कुमाराय "इमꣳ स्तनम्" इति मन्त्रेण बालकस्य मुखे प्रवेशयतीति भावः।

तत उत्तरं-सव्यं स्तनं प्रक्षाल्य "यस्ते स्तनः" "इमꣳ स्तनम्" इत्येताभ्यामृग्भ्यां प्रयच्छति कुमाराय ॥१५-१६॥

उदपात्रꣳ० शिरस्तो निदधाति "आपो देवेषु (१) जाग्रथ यथा देवेषु जाग्रथ। एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां जाग्रथे"ति ॥१७॥

उदपात्रम् उदकपूर्णं पात्रं सोदकं शरावं शिरस्तः—शिरःप्रदेशे खट्वाधस्ताद्भूप्रदेशे निदधाति—स्थापयति "आपो देवेषु० जाग्रथे"त्यन्तेन मन्त्रेण। तच्चोत्थानपर्यन्तं तत्रैव तिष्ठति॥१७॥

स्तथा त्वयमपि तादृशः पुत्रोऽस्तु इति भावः। यतस्त्वं वीरं पुत्रमजीजनथाः असौषीः अतः सा त्वं वीरवती जीवपतिपुत्रा भव। या त्वमस्मान् वीरवतः जीवबहुपुत्रान् अकरत् अकरोः। पुरुषविपरिणामश्छान्दसः।

(१) प्रजापतिरनुष्टुप् आवाप उदपात्राधाने—

हे आपः! यूयं देवेषु देवकार्यनिमित्तं जाग्रथ तदेकनिष्ठाः स्थ। एवं वस्तुस्थितिमुक्त्वा तद्दृष्टान्तेन दार्ष्टान्तिकमाह—अतो यथा देवेषु जाग्रथ तथा स पुत्रिकायां सपुत्रैव सपुत्रिका तस्याम् अस्याम् सूतिकायां प्रसवित्र्यां सूतिकाया हिते जाग्रथ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्सन्धिवेलयोः फलीकरणमिश्रान्त्सर्षपानग्नावावपति—"शण्डा(१)मर्का उपवीरः शौण्डिकेयऽ उलूखलः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा। आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहे"ति ॥१८॥

द्वारदेशे सूतिकागारस्य द्वारोपलक्षिते बहिःप्रदेशे पञ्चभूसंस्कारान् कृत्वा तत्र सूतिकाग्निमुपसमाधाय-स्वात्माभिमुखं स्थापयित्वा सन्धिवेलयोः—सायंप्रातश्च फलीकरणमिश्रान्—फलीकरणैः तण्डुलकणैः मिश्रान् मिश्रितान् सर्षपान् आ उत्थानात्-यावदुत्थानमवसानम् अग्नौ पूर्वोक्तवद्वावावपति हस्तेन प्रक्षिपति 'शण्डा मर्का० स्वाहे'त्यन्तेन मन्त्रेण। अत्रावपनोपदेशाद्धोमेतिकर्तव्यता न भवति(२)। सूतिकाग्निग्रहणमावसथ्याग्निनिवृत्त्यर्थम् ॥१८॥

---

(१) प्रजापतिर्ऋषिरनुष्टुब्लिङ्गोक्ता देवताः सर्षपावपने विनियोगः।

शण्डाः शण्डः मर्काः मर्कः। शृणातीति शण्डः। मारयतीति मर्कः। उपघाते वीरः उपवीरः। शौण्डिकेयः शौण्डे विघ्नकरणे कुशलः। उलूखलवदाश्रितघातकत्वादुलूखलः। मलिम्लुचः—अतिमलिनाशयः। द्रोणासः—वृक्षकोटरवन्नासिका यस्य सः। च्यावयतीन्द्रियाणि इति च्यवनः। अयं सर्वः इतः सूतिकागृहहोमात् नश्यतात् नश्यतु इति प्रत्येकमन्वयः। आसमन्ताल्लिखतीत्यालिखन् तक्षन्। अनिमिषदृष्टिः पराभवितुमव्यवच्छिन्नदृष्टिः। उपशृणोतीत्युपश्रुतिः उपश्रुतिर्यस्येति वा। किं वदन्ती विद्यते यस्य स किम्वदन्तः। "किंवदन्ती जनश्रुतिरि" त्यभिधानात्। हर्यक्षः पिङ्गलाक्षः। कुम्भयति स्तम्भयतीत्येवंशीलः कुम्भी। शातयतीति शत्रुः। पात्रपाणिः खर्परहस्तः। नॄन्मिनोति हिनस्तीति नृमणिः। हन्त्री हिंसा मुखे यस्य स हन्त्रीमुखः। सर्षपवदरुणः। धूसर इत्यर्थः। येनोपद्रुतश्च्यवतीति च्यवनः प्रकृतिभ्रंशकः। अयं सर्वोऽपि बालग्रह इतो नश्यतादित्यन्वयः।

(२) अत्राग्नेर्देवतात्वम्।

"अत्राग्नेर्देवतात्वं स्यान्मन्त्रोक्ताः कैश्चिदीरिता" इति। एतच्च स्वकाले एव भवति नियतकालत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि कुमारऽ उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्कऽ आधाय जपति–"कूर्कुरः(१) सुकूर्कुरः कूर्कुरो बालबन्धनः। चेच्चेच्छुनक सृज नमस्तेऽ अस्तु सीसरो लपेतापह्वर तत्सत्यम्। यत्ते देवा वरमददुः स त्वं कुमारमेव वो वृणीथाः। चेच्चेच्छुनक सृज नमस्तेऽ अस्तु सीसरो लपेतापह्वर तत्सत्यम्। यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ। चेच्चेच्छुनक सृज नमस्तेऽ अस्तु सीसरो लपेतापह्वरे"ति ॥१९॥

यदि कुमारः 'कुमारशब्देनाऽत्र बालग्रहः" बालग्रहः उपद्रवेत्–एवं शिशुं विघ्नयेत् तदा तं बालं जालेन–प्रच्छाद्य आच्छाद्य अथवा उत्तरीयेण-उत्तरीयवस्त्रेणाच्छाद्य पिता-जनकः अङ्के क्रोड़े आधाय जपति पठति वक्ष्यमाणमन्त्रम्। किन्तदित्यत आह–"कूर्कुरः० इत्यारभ्य अपह्वरेत्यन्तम्। इतिशब्दोऽत्र मन्त्रसमाप्तिद्योतकः ॥१६॥

अभिमृशति "न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसी"ति (२) ॥२०॥

ततः पिता तं कुमारम् अभिमृशति स्पृशेत् न नमयाति इत्यारभ्य चाभिमृशामसीत्यन्तेन मन्त्रेण ॥२। ६॥

॥ इति प्रथमस्य षोडशी कण्डिका ॥१६॥

(१) कूर्कुरो भाषणाख्यो बालग्रहः। तथा सुकूर्कुरश्चातिभाषणाख्यो बालग्रहः कूर्कुराख्यो बालग्रहो बालान् बध्नातीति बालबन्धनः, सीसरोऽङ्कसारकः, हे शुनक! तद्गण उच्यते लपेत लापनरोधकेति यावत्। अपह्वर गात्रापहारक ते तुभ्यं नमोऽस्तु। ततस्तुष्टश्चैनं कुमारं सृज मुञ्च। किं कुर्वन्–चेच्छेच्छुच्छुः शब्दं कुर्वन्। शेषमुक्तार्थम् ॥ १ ॥ हे शुनक! तत्सत्यं यत्ते तुभ्यं देवदूताय देवा वरमददुः दन्तवन्तः। स च त्वं हिंसाविहारः कुमारमेव वृणीथाः वृतवानसीति। शेषं पूर्ववत् ॥ २ ॥

(२) यत्र यस्मिन् बालके वयं वदामः–वयं ब्रूमो मन्त्रम् यस्मिन् बालके चाभिमृशामसि–अभिमृशामः अभितः सर्वतः स्पर्शं कुर्मः स कुमारो न नामयति अङ्गानि, न हृष्यति न ग्लायति न ग्लानो भवति। शिष्टं सर्वं सुगमम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति॥१(१)

दशम्यां प्रसवदिवसाद्दशम्यां रात्र्यामतीतायामर्थादेकादशेऽह्नि ब्राह्मणान् नामकरणाङ्गतया नान्दीश्राद्धव्यतिरिक्तान् त्रीन् ब्राह्मणान् भोजयित्वा-भोजनं कारयित्वा, पिता जनको नाम-संज्ञां करोति संव्यवहारार्थं विदधाति ॥ १ ॥

कीदृशं तदित्याकाङ्क्षायामाह—

द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम् ॥२॥

द्वे अक्षरे यस्य तद् द्व्यक्षरम्। चत्वारि अक्षराणि यस्य तच्चतुरक्षरम्। वाशब्दोऽत्र विकल्पार्थकः। पुनः कथम्भूतम्–घोषवदादिं–घोषवदक्षरमादौ यस्य तच्चादृशम्, वर्गाणां प्रथमद्वितीयाः शषसाश्चेत्येतेऽघोषास्तद्भिन्नानां हलां घोषवत्त्वम्। यथा—गघङ जझञ डढण दधन बभम यरलवह इति। अन्तरस्थम्—अन्तर्मध्ये अन्तस्था वर्णा यस्य तत्तथोक्तम्, यरलवा इत्यर्थः। दीर्घाभिनिष्ठानं-दीर्घमक्षरमभिनिष्ठानेऽवसानेऽन्ते यस्य तत्तथोक्तम्। कृतं-कृत्प्रत्ययान्तम्। अथवा 'कृतं' पितामहाद्यनुरूपं नाम कुर्य्यात्। न तद्धितं, तद्धितप्रत्ययान्तं नाम न कुर्यादित्यर्थः ॥२॥

बालायाः कीदृशं नाम इत्यत आह—

अयुजाक्षरमाकारान्तꣳ स्त्रियै तद्धितम् ॥३॥

हे शुनक! तत्सत्यं यत्ते तव सरमा देवशुनी माता सीसरो देवः पिता। श्यामशबलौ च तव भ्रातरौ। शेषं पूर्ववदिति ॥ ३ ॥

(१) अस्य शिशोर्बीजगर्भसमुद्भवैनो निवर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्ये इति संकल्पवाक्यम्। एवं निष्क्रमणस्यापि। अत्र स्वकुलदेवता भक्त इति नाम कृत्वा —

"कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः॥
योगेशः पुण्डरीकाक्षो मासनामान्यनु क्रमात्" इति चैत्रादि क्रमेण मार्गशीर्षादिक्रमेण वा मासनाम कृत्वा ज्योतिःशास्त्रानुसारेण जन्मनक्षत्रपादप्रयुक्ताक्षरादिनाम कृत्वा व्यावहारिकं नाम कुर्वन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणस्य = शर्म = क्षत्रियस्य = वर्म = शौर्यम् · वैश्यस्य :- आज्यः -
शूद्रस्य = प्रेष्यत्वम्

अयुजाक्षरम्-अयुग्माक्षरम् "अयुजानि विषमाणि त्र्यादीन्यक्षराणि यस्मिन्नाम्नि तत्"। आकारान्तम्—आ शब्दः अन्ते-अवसाने यस्य तत्त थोक्तम्, तद्धितं-तद्धितप्रत्ययान्तं कन्यानाम कुर्यादित्यर्थः ॥३॥

शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य ॥४॥

ब्राह्मणस्य-विप्रस्य पूर्वोक्तलक्षणविशिष्टनामावसाने शर्मा, क्षत्रियस्य-पूर्वोक्तलक्षणविशिष्टनामान्ते वर्मा, वैश्यस्य नामान्ते गुप्तेति पदं योजनीयम्।

अथवा विप्रस्य नाम शर्म मङ्गलप्रतिपादकं विदध्यात्। यथा शुभङ्करः प्रियङ्कर इति। क्षत्रियस्य-शौर्यादिप्रतिपादकम्। वैश्यस्य धनवत्त्वप्रतिपादकं कुर्यात (१) ॥ ४ ॥

निष्क्रमणसंस्कारमाह—

चतुर्थे मासि निष्क्रमणिका ॥५॥

बालस्य जन्मतः चतुर्थे मासि जनको निष्क्रमणिका-गृहाद्बहिर्निष्क्रमणाख्यं कर्म कुर्यात् ॥ ५ ॥

सूर्यमुदीक्षयति तच्चक्षुरिति ॥६॥

गृहाद् बहिर्निष्क्रमणानन्तरं कुमारं सूर्यं 'तच्चक्षुरित्यादि भूयश्च शरदः शतात्' इत्यन्तेन मन्त्रेणोदीक्षयति दर्शयति पितेति ॥ ६॥

इति प्रथमस्य सप्तदशी कण्डिका ॥१७॥

साग्निकस्य प्रवासादागतस्य विधिमाह—

प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत् ॥१॥

प्रोष्य प्रवासं कृत्वा तत एत्य आगत्य गृहान् (गृहशब्देनात्र भार्यापुत्रादीनां ग्रहणम्) उपतिष्ठते तत्समीपे स्थित्वा मन्त्रं पठति

---

(१) "सूतिसंबन्धि पक्त्यादि कर्म तल्लौकिकानले।
पर्वण्यपि च तत्पक्वमश्नीयान्नैव दोषभाक्॥" इति वचनात्
सूतिकासंबन्धि सर्वं कर्म लौकिकाग्नौ भवति।
जातकर्म अशौचेऽपिभवतीति भाष्यकाराः। अशौचान्त इत्यन्ये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मार्ताग्निमान् । पूर्ववत्—कातीयश्रौत्रसूत्रे यदुक्तं तद्वदित्यर्थः । तथा हि—"गृहा मे त्वारभ्य गृहेषु न" (३।४१-४२) इत्यन्तैस्त्रिभिर्मन्त्रैर्गृहाणामुपस्थानं विधाय "क्षेमाय वः० इत्यादि शँयो" रित्यन्तेन गृहं प्रविशेत् ॥१॥

पुत्रं दृष्ट्वा जपति "अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम्"इति॥२॥

पुत्रमात्मजं दृष्ट्वा—विलोक्य "अङ्गादङ्गात्" इत्यादि मन्त्रं जपति ॥ २ ॥

अथास्य मूर्द्धानमवजिघ्रति—"प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमि"ति[२] ॥३॥

अथ "अङ्गादङ्गात्" इति जपानन्तरम् अस्यात्मजस्य मूर्द्धानं शिरः अवजिघ्रति अर्वाचीनं यथा स्यात्तथा जिघ्रति । "प्रजापतेष्ट्वा०शतमि" त्यन्तेन मन्त्रेण । 'असौ' इत्यत्र तस्यैव बालस्य नामग्रहणम् ॥३॥

गवां त्वा हिङ्कारेणेति च ॥४॥

ततः प्रजापतेष्ट्वेति सकृदवघ्राणोत्तरं "गवां त्वा हिङ्कारेणाव जिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतम्" इति मन्त्रेण सकृदवघ्राणं विधाय द्विस्तूष्णीमवजिघ्रेत् ॥४॥

---

(१) प्रजापतिरनुष्टुब्वायुर्देवता जपे विनियुज्यते—

हे पुत्र यतस्त्वमङ्गादङ्गात्सम्भवसि—प्रत्यङ्गादुत्पत्स्यसे उत्पन्नः । तथा हृदयादन्तरङ्गादधि आधिक्येन जायसे । अतस्त्वं वै निश्चितं पुत्रनामा आत्मा असि भवसि । स च त्वं शरदः शतं जीव, शतं वर्षाणि जीवेत्यर्थः ।

(२) परमेष्ठी उष्णिक् प्रजापतिरवघ्राणे विनियुज्यते—

हे पुत्र ! प्रजापतेर्ब्रह्मणः हिङ्कारेण स्नेहार्द्रशब्देन सामवेदेन वा त्वा त्वामवजिघ्रामि । अवघ्राणेन च हे असौ कुमार ! त्वं सहस्रायुषा बहुकालजीवनेनोपलक्षितः शतं शरदो जीवेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शर्म सुखं = वर्म=शौर्यम् · गुप्तः-आव्यः-
रक्षणः = पुष्यत्वम्

अयुजाक्षरम्-अयुग्माक्षरम् "अयुजानि विषमाणि त्र्यादीन्यक्षराणि यस्मिन्नाम्नि तत्" । आकारान्तम्—आ शब्दः अन्ते-अवसाने यस्य तत्तथोक्तम् , तद्धितं-तद्धितप्रत्ययान्तं कन्यानाम कुर्यादित्यर्थः ॥३॥

शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य ॥४॥

ब्राह्मणस्य-विप्रस्य पूर्वोक्तलक्षणविशिष्टनामावसाने शर्मा, क्षत्रियस्य-पूर्वोक्तलक्षणविशिष्टनामान्ते वर्मा, वैश्यस्य नामान्ते गुप्तेति पदं योजनीयम् ।

अथवा विप्रस्य नाम शर्म मङ्गलप्रतिपादकं विदध्यात् । यथा शुभङ्करः प्रियङ्कर इति । क्षत्रियस्य-शौर्यादिप्रतिपादकम् । वैश्यस्य धनवत्त्वप्रतिपादकं कुर्यात (१) ॥ ४ ॥

निष्क्रमणसंस्कारमाह—

चतुर्थे मासि निष्क्रमणिका ॥५॥

बालस्य जन्मतः चतुर्थे मासि जनको निष्क्रमणिका-गृहाद्बहिर्निष्क्रमणाख्यं कर्म कुर्यात् ॥ ५ ॥

सूर्यमुदीक्षयति तच्चक्षुरिति ॥६॥

गृहाद् बहिर्निष्क्रमणानन्तरं कुमारं सूर्यं 'तच्चक्षुरित्यादि भूयश्च शरदः शतात्' इत्यन्तेन मन्त्रेणोदीक्षयति दर्शयति पितेति ॥ ६॥

इति प्रथमस्य सप्तदशी कण्डिका ॥१७॥

साग्निकस्य प्रवासादागतस्य विधिमाह—

प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत् ॥१॥

प्रोष्य प्रवासं कृत्वा तत एत्य आगत्य गृहान् (गृहशब्दनात्र भार्यापुत्रादीनां ग्रहणम्) उपतिष्ठते तत्समीपे स्थित्वा मन्त्रं पठति

(१) "सूतिसंबन्धि पक्त्यादि कर्म तल्लौकिकानले ।
पर्वण्यपि च तत्पक्वमश्नीयान्नैव दोषभाक् ॥" इति वचनात्
सूतिकासंबन्धि सर्वं कर्म लौकिकाग्नौ भवति ।
जातकर्म अशौचेऽपिभवतीति भाष्यकाराः । अशौचान्त इत्यन्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मार्ताग्निमान् । पूर्ववत्—कातीयश्रौत्रसूत्रे यदुक्तं तद्वदित्यर्थः । तथा हि—"गृहा मे त्यारभ्य गृहेषु न" (३।४१-४३) इत्यन्तैस्त्रिभिर्मन्त्रैर्गृहाणामुपस्थानं विधाय "क्षेमाय वः० इत्यादि शँयो" रित्यन्तेन गृहं प्रविशेत् ॥१॥

पुत्रं दृष्ट्वा जपति "अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम्" इति[1] ॥२॥

पुत्रमात्मजं दृष्ट्वा—विलोक्य "अङ्गादङ्गात्" इत्यादि मन्त्रं जपति ॥ २ ॥

अथास्य मूर्द्धानमवजिघ्रति—"प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमि"ति[2] ॥३॥

अथ "अङ्गादङ्गात्" इति जपानन्तरम् अस्यात्मजस्य मूर्द्धानं शिरः अवजिघ्रति अवाचीनं यथा स्यात्तथा जिघ्रति । "प्रजापतेष्ट्वा०शतमि" त्यन्तेन मन्त्रेण । 'असौ' इत्यत्र तस्यैव बालस्य नामग्रहणम् ॥३॥

गवां त्वा हिङ्कारेणेति च ॥४॥

ततः प्रजापतेष्ट्वेति सकृदवघ्राणोत्तरं "गवां त्वा हिङ्कारेणाव जिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतम्" इति मन्त्रेण सकृदवघ्राणं विधाय द्विस्तूष्णीमवजिघ्रेत् ॥४॥

---

(१) प्रजापतिरनुष्टुब्वायुर्देवता जपे विनियुज्यते—

हे पुत्र यतस्त्वमङ्गादङ्गात्सम्भवसि—प्रत्यङ्गादुत्पत्स्यसे उत्पन्नः । तथा हृदयादन्तरङ्गादधि आधिक्येन जायसे । अतस्त्वं वै निश्चितं पुत्रनामा आत्मा असि भवसि । स च त्वं शरदः शतं जीव, शतं वर्षाणि जीवेत्यर्थः ।

(२) परमेष्ठी उष्णिक् प्रजापतिरवघ्राणे विनियुज्यते—

हे पुत्र ! प्रजापतेर्ब्रह्मणः हिङ्कारेण स्नेहार्द्रशब्देन सामवेदेन वा त्वा त्वामवजिघ्रामि । अवघ्राणेन च हे असौ कुमार ! त्वं सहस्रायुषा बहुकालजीवनेनोपलक्षितः शतं शरदो जीवेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिर्दक्षिणेऽस्य कर्णे जपति "(१)अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः। अस्मे शतꣳ शरदो जीवसेऽधा ऽ अस्मे व्वीरांच्छश्वत ऽ इन्द्र शिप्रिन्" इति ॥५॥

ततोऽस्य बालस्य दक्षिणे कर्णे दक्षश्रोत्रे "अस्मे० शिप्रिन्निति" मन्त्रं जपति उच्चारयतीत्यर्थः ॥५॥

"इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषꣳ रयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिनत्वमह्नाम्" इति सव्ये ॥६॥

ततः सव्ये—वामश्रोत्रे "इन्द्र श्रेष्ठानि० सुदिनत्वमह्नाम्" इत्यन्तं मन्त्रं जपति ॥६॥

स्त्रियै तु मूर्द्धानमेवाव जिघ्रति तूष्णीम् ॥७॥

स्त्रियै स्त्रियाः बालिकायाः तु पुनः मूर्धानं शिर एव अवजिघ्रति तूष्णीम्। एवकारोऽत्र श्रोत्रजपव्यवच्छेदार्थकः ॥७॥

इति प्रथमस्य अष्टादशी कण्डिका ॥१८॥

---

(१) द्वयोर्मन्त्रयोः प्रजापतिस्त्रिष्टुप् इन्द्रः कर्णजपे विनियुज्यते—

हे मघवन्! हे नाकेश! यद्वा हे ऋजीषिन् सोमांशुवन्! "ऋजीषः सोमांशुरिति वेदप्रसिद्धेः" हे इन्द्र स्वर्गेश! हे शिप्रिन् सुखद! लघुहस्तेति वा अस्मे अस्मै कुमाराय इन्द्राय ऐश्वर्ययुक्तधनानि प्रयन्धि प्रयच्छ। "कर्मणि षष्ठी" इन्द्र धनं देहीति भावः। किंभूतस्य विश्ववारस्य सर्वैर्वरणीयस्य। भूरेर्बहुतरस्य। प्रयोजनमाह—अस्मे अस्य शतं शरदो जीवसे जीवितुम्। किंच अस्मे अस्मिन् वीरान् पुत्रान् शश्वतः शाश्वतान् चिरायुषः अधाः धेहि देहि॥

इन्द्र श्रेष्ठानीति सव्यकर्णस्य जपे विनियुज्यते—

अस्मे अस्मिन् कुमारे श्रेष्ठानि द्रविणानि स्वरूपतो दानतश्चोत्तमानि द्रव्याणि धेहि। तथा चित्तिं ज्ञानं दक्षस्य प्रजापतेः इव सुभगत्वं सौभाग्यं सर्वप्रभुत्वं च धेहि। तथा रयीणां धनानां पोषं पुष्टिम् अरिष्टिं अहिंसां रोगराहित्यम्। वाचो वाण्याः स्वात्मानं स्वादुत्वं माधुर्यम् अह्नां दिवसानां सुदिनत्वं दानभोगादिनाऽवन्ध्यत्वं च धेहि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठे मासेऽन्नप्राशनम्(१) ॥१॥

जन्मतः षष्ठे मासे शिशोरन्नप्राशममन्नप्राशनाख्यं कर्म विदध्यात् ।

स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति—"देवीं(२)वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा"॥इति२॥

स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वाऽऽज्यभागाविष्ट्वा आज्यभागसंज्ञके द्वे आहुती हुत्वा द्वे आज्याहुती जुहोति । तत्र प्रथमामाहुतिम् "देवीं० स्वाहेति" मन्त्रेण ॥२॥

वाजो नो ऽद्येति च द्वितीयाम् ॥३॥

द्वितीयामाज्याहुतिं "वाजो नोऽद्य" इति मन्त्रेण जुहोति ॥३॥

स्थालीपाकस्य जुहोति "प्राणेनाऽन्नमशीय (३) स्वाहाऽपानेन गन्धानशीय स्वाहा चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहा" इति ॥४॥

---

(१) अस्य शिशोर्मातृगर्भमलप्राशनशुद्धयन्नब्रह्मवर्चसतेज इन्द्रियायुर्बलपरिपूरण-फलसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थमन्नप्राशनाख्यं कर्म करिष्ये इति संकल्पः ।

(२) प्रजापतिस्त्रिष्टुप् वाक् होमे विनियुज्यते—

देवीं द्योतमानां वाचं देवाः प्राणादि वायवोऽजनयन्त उत्पादितवन्तः । ततस्तां वाचम् ऐश्वर्याख्यां पशवो मनुष्यादयः संसरणत्वाद् वदन्ति । "पशुरेवर्ठ॰० स देवानाम्" इति श्रुतेः । सा वाक् नोऽस्मानुपैतु । किं भूता मन्द्रा हर्षकरी । इषमन्नमूर्जं रसं च दुहाना पूरयमाणा । सुष्टुता शोभनैर्मन्त्रैस्तद्दृष्टृभिर्वा स्तुता नुतेत्यर्थः । तत्र दृष्टान्तो वत्सान् धेनुरिवेति ।

(३) प्रजापतिर्यजूंष्यन्नदेवत्यानि होमे विनियुज्यन्ते—

हे अग्ने ! प्राणेन वायुना त्वत्प्रसादादहमन्नमशीयाश्नानि स्वाहा सुहुतमस्तु । एवं सर्वत्र योजनीयमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः स्थालीपाकस्य चरोः "प्राणेनान्नऽमशीय स्वाहा" इति प्रतिमन्त्रं चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहोति। ततः स्विष्टकृदादि प्राशनान्तं सर्वं कर्म विधातव्यम् ॥४॥

प्राशनान्ते सर्वान् रसान् सर्वमन्नमेकत ऽउद्धृत्याथैनं प्राशयेत् ॥५॥

प्राशनान्ते-संस्रवप्राशनान्ते कर्मणि कृते सर्वान्-कटुमधुरादिरसान् सर्वमन्नं-भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं च एकत-एकस्मिन् हिरण्यादिपात्रे उद्धृत्य, अथानन्तरमेनं शिशुं ततोऽन्नं गृहीत्वा प्राशयेत् प्राशनं कारयेदित्यर्थः ॥५॥

तूष्णीꣳ हन्तेत्ति वा हन्तकारं मनुष्यो इति श्रुतेः ॥६॥

हन्तेति मन्त्रोच्चारणे श्रुतिं प्रमाणयति हन्तकारमिति—

तूष्णीं मन्त्ररहितं "हन्त" इत्यनेन वा एनं कुमारं प्राशयेत्। कुतः? हन्तकारं मनुष्या उपजीवन्तीति श्रवणात् ॥६॥

भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य ॥७॥

भारद्वाजी पक्षिविशेषः "लोके चिठिकेति" ख्याता। तस्याः मांसेन वाक्प्रसारः अयं बालको वाग्मी भूयादित्येवं कामोऽभिलाषो यस्मिन् बालके तस्य तथोक्तस्य भक्षणं कारयेत् ॥७॥

कपिञ्जलमाꣳसेनान्नाद्यकामस्य ॥८॥

यद्ययं बालः अन्नादो भूयात् इति कामयेत्तदा कपिञ्जलमांसं भक्षयेत्। कपिञ्जलशब्देन कारण्डवो मयूरो मैरिर्वा। तित्तिरो वेति केचित् ॥८॥

मत्स्यैर्जवनकामस्य ॥९॥

यद्ययं बालो जवनः द्रुतगामी स्यादिति कामयेत्तदा मत्स्यान् प्राशयेत् ॥ ९ ॥

कृकषायो आयुष्कामस्य ॥१०॥

आयुःकामस्य कुमारस्य कृकषाया कङ्कणहारिकाया मांसं प्राशयेत् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आट्या ब्रह्मवर्चसकामस्य ॥११॥

ब्रह्मवर्चसकामस्य शिशोः आट्याः शरार्याः आडीति ख्यातायाः मांसं "शरारिराटिराडिश्चेत्यमर." भक्षयेत् प्राशयेत् । आटिर्जलचरः पक्षी ॥११॥

सर्वैः सर्वकामस्य ॥१२॥

यो जनः सर्वान् वाक्प्रसारादि कामान् कामयते तस्य भारद्वाज्यादिभिर्मांसैः यथासंख्येन भक्षणं कुर्यात् ॥१२॥

अन्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम् १३॥

अन्नपर्याय वा—अन्नपरिपाटीक्रमेण वा अन्नवत् सर्वमांसानेकीकृत्य तं प्राशयेदित्यर्थः । अन्नपरिपाट्या वा क्रमेण प्राशनैनैकत उद्धृत्येति भर्तृयज्ञः । अन्नपर्यायेत्यविभक्तिकं पदं छान्दसम् । सूत्रे द्विरुक्तिरवसानं सूचयति ॥१३॥

इति गृह्यसूत्रविवृतौ प्रथमकाण्डे एकोनविंशी कण्डिका ॥१६॥

समाप्तं चेदं प्रथमकाण्डम् ॥

वाल्मीकि पौडेल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वितीयं काण्डम् ।

सांवत्सरिकस्य चूडाकरणम् (१) ॥ १ ॥

सम्वत्सरो जातो यस्य स सांवत्सरिकः अतिक्रान्तसम्वत्सरः तस्य कुमारस्य चूड़ाकरणं चौलाख्यं कर्म कुर्यात् ॥ १ ॥

तृतीये वाऽप्रतिहते ॥ २ ॥

अथवा तृतीयेऽब्दे अप्रतिहते असम्पूर्णे सति चूड़ाकरणं कुर्यात् ॥२॥

षोड़श-वर्षस्य केशान्तः ॥ ३ ॥

षोड़श वर्षाणि अतीतानि यस्य स षोडशवर्षः तस्य पुरुषस्य केशान्तो गोदानाख्यः संस्कारो भवति ॥ ४ ॥

यथामङ्गलं वा सर्वेषाम् ॥ ४ ॥

यद्वा यथामङ्गलं यथाकुलाचारं चौलं कार्यम् । यस्य कुले साम्वत्सरिकस्य चूडाकर्म क्रियते तस्य साम्वत्सरिकस्य चूडाकरणम् । यस्य तृतीये वर्षे तस्य तदा इति व्यवस्था । केचित् यथामङ्गलशब्देन धर्म शास्त्रान्तरे विहितं कालान्तरं कल्पयन्ति ॥ ४ ॥

ब्राह्मणान् भोजयित्वा माता कुमारमादायाऽऽप्लाव्याऽहते वाससी परिधाप्याङ्कऽ आधाय पश्चादग्नेरुपविशति ॥ ५ ॥

---

(१) नारदः—"सुनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ।
पञ्चाब्दात्प्रागथोर्ध्वं तु गर्भिण्यामपि कारयेत् ॥
सहोपनीत्वा कुर्याच्चेत्तदा दोषो न विद्यते"
वसिष्ठः—"गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म तु ।
पञ्चमासादधः कुर्यादत ऊर्ध्वं तु कारयेत् ॥
वृद्धगार्ग्यः—विवाहव्रतचूडासु माता यदि रजस्वला ।
तस्याः शुद्धेः परं कार्यं माङ्गल्यं मनुरब्रवीत् ॥"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र शुभे दिने वृद्धि[१]श्राद्धव्यतिरिक्तान् त्रीन् ब्राह्मणान् भाजयित्वा माता शिरोर्जननी कुमारं स्वबालकं हस्ते गृहीत्वा आप्लाव्य स्नापयित्वा अहते नवे सकृद्धौते वाससी वस्त्रयुग्मे परिधाप्य परिहिते कारयित्वा अङ्के क्रोडे आधाय संस्थाप्य अग्नेः पश्चात् भर्तुर्दक्षिणत उपविशति ॥५॥

अन्वारब्धऽ आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णाऽ आसिञ्चति "उष्णेन(A)वायऽ उदकेनेह्यदिते केशान् वप" इति॥६॥

उपवेशनानन्तरम् अन्वारब्धः ब्रह्मणा उपस्पृष्टः आघारादिस्विष्टकृदन्ताश्चतुर्दशाऽऽज्याहुतीर्हुत्वा संस्रवप्राशनान्ते शीतास्वप्सूष्णा अप आसिञ्चति "उष्णेन० वप" इत्यन्तेन मन्त्रेण ॥ ६ ॥

केशान्ते मन्त्राध्याहारमाह—

केशश्मश्रिवति च केशान्ते ॥७॥

केशान्ते गोदानाख्ये कर्मणि केशान् इति मन्त्रावयवे 'केशश्मश्रु वप' इत्यध्याहारो विशेषः ॥ ७ ॥

अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा पिण्डं प्रास्यति॥८॥

अथ उष्णोदकसेकानन्तरम् अत्र प्रकृतोदके नवनीतपिण्डं घृतपिण्डं दध्नो वा पिण्डं प्रास्यति प्रक्षिपति ॥ ८ ॥

ततऽ आदाय दक्षिणं गोदानमुन्दति "सवित्रा प्रसूता दैव्या ऽआप ऽउन्दन्तु ते तनूं दीर्घायुत्वाय(B)वर्चसे" इति ॥९॥

---

(१) "एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।
त्रिषट् चौलोपनयने नान्दीश्राद्धं विधीयते" ॥

(A) परमेष्ठी प्रतिष्ठा वायुर्देवता वपनोदकासेके विनियोगः—

'रविकिरणसम्बन्धादन्तर्गतज्योतिषा वायोरुष्णत्वम्' हे वायो ! त्वमप्युष्णोदकेन गृहीतेन कुमारस्य शिरः प्लवनाय एहि । अदिते देवमातः केशान् लचीकृत्य केशार्द्रकरणार्थं शीतोदकमध्ये उष्णोदकं वप क्षिपेत्यर्थः ॥

(B) प्रजापतिर्गायत्री आपो देवता क्लेदने विनियोगः—

हे कुमार ! सवित्रा सूर्येण प्रसूता उत्पादिता आपः ते तव तनूं चूडाख्यमङ्गम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तस्मान्नवनीतादीनामन्यतमपिण्डप्रासनस्थानात् किञ्चिदुदकमादाय दक्षिणं गोदानं गवि पृथिव्यां दीयते निधीयते स्थाप्यते शयनकाले इति गोदानं दक्षिणकर्णसमीपवर्त्ति शिरःप्रदेशम् उन्दति क्लेदयति आर्द्रीकरोति 'सवित्रा० वर्चस' इत्यन्तेन मन्त्रेण ॥ ९ ॥

त्र्येण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधाति ओषध(*A*) इति ॥१०॥

त्रिषु स्थानेषु एनी श्वेता त्र्येणी शलली शल्लकीशलाका तया शलाकया क्लिन्नान् केशान् विनीय पृथक् कृत्य त्रीणि (१) कुशतरुणानि दर्भतृणानि अन्तर्मध्ये दधाति स्थापयति 'ओषधे त्रायस्व' इति मन्त्रेण ॥ १० ॥

शिवो(*B*)नामेति (२) लोहक्षुरमादाय निवर्तयामीति(*C*)

उन्दन्तु क्लेदयन्तु । किं भूता दैव्याः दिवि भवाः । किमर्थम्-दीर्घायुत्वाय चिरकालं निर्दुष्टजीवनाय, वर्चसे प्रतापाय ऐश्वर्याय च ।

(*A*) प्रजापतिर्यजुर्गायत्री तृणान्तर्धाने विनियोगः—
हे ओषधे कुशतरुण ! त्वं कुमारं त्रायस्व क्षुरादस्य ।

(१) कुशा एव तरुणानि कुशतरुणानीति कर्मधारयः ; न तु कुशानां तरुणानीति षष्ठीसमासः तथात्वे लक्षणापत्तेः ।

(*B*) प्रजापतिः प्राजापत्याबृहती क्षुरो देवता क्षुराऽऽदाने विनियोगः—
हे क्षुर ! त्वं नाम नाम्ना शिवः शान्तोऽसि । स्वधितिः वज्रं ते तव पिता । ते तुभ्यं नमोऽस्तु । मा माम् मा हिंसीः कदाऽपि हिंसको मा भूः ॥

(२) "क्षुरस्य नित्यं लौहत्वात्ताम्रत्वाच्चेह लौहगीः ।
गृह्यान्तरेषु बहुषु क्षुरस्ताम्रमयो यतः ॥"

(*C*) प्रजापतिः प्राजापत्या त्रिष्टुप् क्षुरो देवता स्पर्शने विनियोगः —
हे कुमार ! त्वां निवर्तयामि मुण्डयामि । किमर्थम्, आयुषे जीवनाय । अन्नाद्याय अन्नभक्षणाय । प्रजननाय सन्तानाय । रायो धनस्य पोषाय पुष्ट्यै । सुप्रजास्त्वाय शोभनापत्यतायै । सुवीर्याय शोभनसामर्थ्याय ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवपति "येनावपत्सविता क्षुरेण (*A*)सोमस्य राज्ञो व्वरुणस्य विद्वान्। तेन ब्रह्माणो व्वपतेदमस्यायुष्यञ्जरदष्टिर्यथा सत्" इति ॥ ११ ॥

ततः शिवो नामेति मन्त्रेण लोहक्षुरं ताम्रपरिष्कृतम् आयसं क्षुरमादाय दक्षकरेण गृहीत्वा 'निवर्तयामि' इति मन्त्रेण प्रवपति तं क्षुरं कुशतरुणान्तर्हितेषु केशेषु संलागयति स्थापयति। अत्र प्रपूर्वको वपतिः संलागनार्थे वर्तते। अन्यथा उत्तरसूत्रविहितं छेदनमनर्थकं स्यात् ॥ ११ ॥

सकेशानि प्रच्छिद्याऽऽनडुहे गोमयपिण्डे प्रास्यत्युरतो ध्रियमाणे ॥ १२ ॥

'येनावपत्० यथाऽसत्' इत्यन्तेन मन्त्रेण सकेशानि केशसहितानि कुशतरुणानि प्रच्छिद्य छित्वा द्विधा कृत्वा अग्नेरुत्तरतो भूमौ ध्रियमाणे संस्थाप्यमाने आनडुहे आर्षभे गोमयपिण्डे गोशकृत्पिण्डे प्रास्यति प्रक्षिपतीत्यर्थः ॥ १२ ॥

एवं द्विरपरं तूष्णीम् ॥ १३ ॥

एवमुक्तप्रकारेण द्विः द्विवारम् उन्दनादि-गोमयपिण्डस्थापनान्तम् अपरं कर्म तूष्णीं मन्त्ररहितं कुर्यात् ॥ १३ ॥

इतरयोश्चोन्दनादि ॥ १४ ॥

इतरयोः पश्चिमोत्तरयोः गोदानयोः उन्दनादि-छेदनप्रभृतिकर्म चकारात् सकृत्समन्त्रकं द्विरमन्त्रकं कार्यम्। तत्र पूर्वाऽपरगोदाने कृत्वा तत उत्तरगोदाने कर्तव्यम् ॥ १४ ॥

(*A*) लम्बायनः पङ्क्तिः सविता देवता कुशतरुणप्रच्छेदने विनियोगः— हे ब्राह्मणः ब्राह्मणाः येन कारणेन क्षुरेण वा सविता प्रसविता पिता आदित्यो वा राज्ञः सोमस्य वरुणस्य च शिरः अवपत् राजसूयदीक्षायै अमुण्डयत्। किं भूतः विद्वान् सर्वज्ञः, तेन कारणेन क्षुरेण वा वाऽस्य कुमारस्य इदं शिरो यूय वपत मुण्डयत। यथाऽयं कुमार आयुष्मान् दीर्घायुः जरदष्टिः सुपरिणतवपुश्च असत् स्यात् इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पश्चात् (A) त्र्यायुषमिति ॥१५॥

अथ पश्चात् पश्चिमगोदानकर्मणि 'त्र्यायुषम्' इति मन्त्रेण सकेशतृणानां छेदनं विदध्यात् ॥ १५ ॥

अथोत्तरतो 'येन(B)भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यम्। तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति ॥ १६ ॥

अथोत्तरगोदानकर्मणि सकेशानां कुशतृणानां 'येन० स्वस्तये' इत्यन्तेन मनुना छेदनं विधेयम्। अन्यत्सर्वं दक्षिणगोदानवत्कार्यम्॥१६॥

त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते ॥१७॥

प्रदक्षिणं यथा भवति तथा त्रिः त्रीन् वारान् क्षुरेण शिरो मूर्धानं परितः सर्वतो हरति भ्रामयतीत्यर्थः। केशान्ते कर्मणि समुखं मुखसहितं शिरः परिहरतीति ॥ १७ ॥

तत्राऽयं मन्त्रः—

"यत्क्षुरेण मज्जयता(C)सुपेशसा वप्त्रा वपति केशाञ्छिन्धि शिरो माऽस्याऽऽयुः प्रमोषीः" ॥ १८ ॥

(A) उत्तरनारायण उष्णिक् आशीः छेदने विनियोगः—

त्रीणि आयूंषि समाहृतानि बाल्ययौवनस्थविराणि

इत्येवं तेषामेव अवस्थात्रयव्यापकमायुरस्माकमस्त्विति मन्त्रार्थः।

(B) वामदेवो यजुः क्षुरो देवता छेदने विनियोगः—

येन ब्रह्मणा मन्त्रेण तपसा वा चरणशीलो वायुः ज्योक् चिरम् आकल्पं दिवं द्याम् पश्चात्तापमनुसूर्यं तमनु विश्वं च चरति। किं भूतः भूरिः प्रचुरः, तेन ब्रह्मणा तपसा वा तन्मन्त्रितक्षुरेण ते तव शिरो वपामि। किमर्थम् जीवातवे जीवनहेतवे धर्मार्थं जीवनायायुषे। सुश्लोक्याय शोभनयशसे स्वस्तये अविनाशायेत्यर्थः ॥

(C) वामदेवो यजुः क्षुरो देवता भ्रामणे विनियोगः—

हे क्षुर! यत् यस्मात् वप्त्रा क्षुरेण आवपति शिरो मुण्डयति नापितादिः, किं भूतेन एनं कुमारं मज्जयता संस्कुर्वता तथा सुपेशसा शोभयता। अतोऽस्य कुमारस्य केशान् छिन्धि मुण्डय, शिरः आयुश्च मा प्रमोषीः मा मुषाण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुखमिति च केशान्ते ॥ १९ ॥

केशान्ते गोदानाख्ये कर्मणि मुखमितिपदं मन्त्रे अधिकं वदेत्॥१९॥

ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छति ।
'अक्षण्वन्परिवपेति'' *A* ॥ २० ॥

ताभिः शीतोष्णाभिरद्भिः बालस्य शिरो मूर्धानं समुद्य आर्द्रं विधाय नापिताय चौरकर्मकर्त्रे 'अक्षण्वन्परिवप'' इति मन्त्रेण प्रयच्छति समर्पयति ॥ २० ॥

यथामङ्गलं केशशेषकरणम् ॥२१॥

क्षुरसमर्पणानन्तरं नापितेन वपनं कारयेत् । तत्र केशानां शेषकरणं शिखारक्षणं यथामङ्गलं यथाकुलचारं यस्याऽन्वये यथा प्रसिद्धं तदन्वये तथैव शिखास्थापनं विधेयम्, न तु सर्वथा शिखाच्छेदनं कर्तव्यम्। चूडाकरणसंस्कारस्य शिखाधारणार्थत्वात् । गर्भकेशानां न छेदनमिति तु सर्वथा निर्मूलम् ॥२१॥

अनुगुप्तमेतर्ठ० सकेशं गोमयपिण्डं निधाय गोष्ठे पल्वलऽ-उदकान्ते वाऽऽचार्याय वरं ददाति ॥२२॥

ततो वपनानन्तरं सर्वान् कचान् गोमयपिण्डे कृत्वा तं पिण्डं वस्त्रादिनाऽनुगुप्तमावृतं विधाय गोष्ठे गवां स्थाने स्थापयेत्।

अथवा पल्वले अल्पजलाशये उदकान्ते यत्र कुत्राप्युदकसन्निहिते वा स्थापयेत्। ततः चौलकर्मकर्ता पित्रादिः स्वायाचार्याय वरम् अभिलषितद्रव्यं ददाति प्रयच्छतीत्यर्थः ॥२२॥

गां केशान्ते ॥२३॥

केशान्ताख्ये कर्मणि तत्संस्कारकर्ता स्वाचार्याय गां ददाति। संस्कार्यस्याचार्यायेति हरिहरमिश्राः ॥२३॥

सम्वत्सरं ब्रह्मचर्यमवपनं च केशान्ते द्वादशरात्रर्ठ० षड्रात्रं त्रिरात्रमन्ततः ॥२४॥

(*A*) वामदेवो यजुः क्षुरी देवता वपने विनियोगः—
हे नापित ! अस्य शिरः अक्षण्वन् क्षतमकुर्वन् परिवप परितो वप शिखां रक्षित्वा परितो मुण्डयेत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केशान्तकर्मोत्तरं केशान्तकर्मणा यः संस्कृतः स यावत्सम्वत्सरमब्दं ब्रह्मचर्यं चरेदनुतिष्ठेत्, स्त्रिया सह संवेशं न कुर्यात्। केशान्तकर्मानन्तरं अब्दपर्यन्तम् अवपनं वपनं वर्जयेत। उक्तनियमाऽशक्तश्चेत् तदा ब्रह्मचर्यम् अवपनं च द्वादशरात्रं षड्रात्रं वा त्रिरात्रं वा चरेत् ॥२४॥ (१)

इति द्वितीयस्य प्रथमा कण्डिका ॥१॥

चौलोपनयनयोः शिखास्थापनविचारः ।

उपनयने उपनेयस्य माणवस्य चूडाकर्मणि धृतां शिखां वर्जयित्वा वपनमुत सशिखवपनमिति विचारे इदमत्र प्रतिभाति। चौले तावत् बौधायनापस्तम्बाश्वलायनपारस्करादिमहर्षिभिः "अथैनमेकशिखस्त्रिशिखः पञ्चशिखो वा यथैवैषां कुलधर्मः स्यात् यथर्षि शिखां निदधातीत्येके" (बौ० गृ० २. ४. १७—१८) "यथर्षि शिखां निदधाति यथैवैषां कुलधमः स्यात्" (आप० गृ० १६-१५) यथामङ्गलं केशशेषकरणम् (पार० गृ० २-१-२१) इत्यादिसूत्रैः शिखाधारणस्य आवश्यकता प्रतिपादिता।

"केशशेषं ततः कुर्याद्यस्मिन् गोत्रे यथोचितम्।
वसिष्ठा दक्षिणे भागे उभयत्रापि कश्यपाः ।
शिखां कुर्वन्त्यङ्गिरसः शिखाभिः पञ्चभिर्युताम्।
परितः केशपङ्क्त्या वा मुण्डाश्च भृगवो मताः'

इत्यादि स्मृत्या च कुमारस्यापसङ्ख्यया कुलधर्मतो देशविशेषे शिखाधारणं विधीयते।

उपनयनेऽपि—"कुमारं भोजयित्वा तस्य चौलवच्चूर्ष्णीं केशानुप्य स्नातं शुचिवाससं बद्धशिखं यज्ञोपवीतं प्रतिमुञ्चन् वाचयति (२-५-७)

---

(१) चौलत्तरं विशेषः स्मृत्यन्तरे—

"विवाहमौञ्जीचौलोर्ध्वं वर्षमर्धं तदर्धकम्।
पिण्डान् सपिण्डा नो दद्युर्गयायां दद्युरेव ते॥
"विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति बौधायनसूत्रे चौलवदिति चौलधर्मातिदेशात्, बद्धशिखमिति कुमारविशेषणाच्च मध्यशिखावर्जमेव उपनयने वपनयनमभिप्रेतमिति गम्यते। सशिखवपने बद्धशिखमिति विशेषणं कथं सङ्गच्छेत।

आपस्तम्बगृह्ये ऽपि "प्रतिदिशं प्रवपति" इति दिग्वपनस्यैव विधानं न तु सर्ववपनस्य एतदनुसारेण 'पर्युप्तशिरसमलङ्कृतमानयन्ति' (२-२-५) इति पारस्करगृह्ये ऽपि प्रतिदिग्वपनमेवाभिप्रेतमस्ति।

अतएव संस्कारकौस्तुभे-'चौलकाले धृतशिखानां मध्ये मध्यशिखेतर-शिखानामुपनयनकाले वपनं कार्यम् ।

"मध्ये शिरसि चूडा स्याद्वसिष्ठानां तु दक्षिणे।
उभयोः पार्श्वयोरत्रिकश्यपानां शिखा मता॥"

इति वृद्धोदाहृतवचसि मध्यशिखाया निमित्तविशेषसंयोगं विना विहिताया नित्यत्वेन सदा बद्धशिखेनेति नित्यविधिविषयत्वौचित्यादितर-शिखानामनुपनीतधार्यत्वेन माधवोक्तेश्च"इत्युक्तम्।

'तासां मध्यशिखावर्जमुपनयने वपनं कार्यम् "रिक्तो वा एष यन्मुण्डस्तस्यैतदपिधानं यच्छिखा' इति श्रुतेः" इति कमलाकरो ऽप्याह।

"केशश्मश्रु वपते वाऽशिखम्" (२-१-६) इति कातीयश्रौतसूत्रे कर्काचार्योऽप्येवम्।

किं च 'सदोपवीतिना भाव्यं सदा बद्धशिखेन च'

इति भृगुस्मृतौ सदाशब्दश्रवणान्नित्यत्वप्रतीत्या, नित्यानामकरणे प्रत्यवायापत्त्या,

"शिखां छिन्दन्ति ये मोहाद् द्वेषादज्ञानतो ऽपि वा।
तप्तकृच्छ्रेण शुद्ध्यन्ति त्रयो वर्णा द्विजातयः"

इति हारीतेन शिखाविनाशे प्रायश्चित्ताभिधानात्,

'अथ चेत्प्रमादान्निःशिखं वपनं स्यात्तदा कौशीं शिखां ब्रह्मग्रन्थिसमन्वितां दक्षिणकर्णोपर्या शिखाबन्धाद्धत्तिष्ठन्' इति वीरमित्रोदये काठकगृह्ये शिखानाशे प्रतिपत्तिविधानाच्चौलप्रभृति यावज्जीवं शिखाया अवश्यधार्यत्वमवगम्यते ।

एवं पुरुषोद्देशेन विहितत्वात् पुरुषार्थस्यापि शिखाधारणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्'

इति पूर्वोक्तस्यैव स्मृत्या शिखां विना कर्मानुष्ठाने कर्मणो वैफल्यस्मरणात्, शिखाधारणस्य सर्वकर्माङ्गत्वमप्यवगम्यते ।

यद्यपि आर्षसङ्ख्याकशिखाविधानेन 'गोत्रचिह्नं शिखाकर्म' इति शिखाधारणस्य गोत्रचिह्नत्वावगतेस्तस्य 'वसिष्ठानां नराशंसो द्वितीयः प्रयाजः' इत्यादौ गोत्रसाध्ये कर्मण्युपयोग इति गोत्रज्ञापकत्वमात्रं दृष्टं फलमित्यवगम्यते तथापि संस्कारेषु शिखाकर्मणोऽपि पाठात् इतरसंस्कारवत् अस्याप्यदृष्टार्थत्वमेव । गोत्रज्ञापनं तु आनुषङ्गिकं फलं नतु मुख्यं द्विजत्वचिह्नार्थयज्ञोपवीतवत् । तेन शिखाधारणस्य अदृष्टार्थत्वावगमात् अकरणे प्रत्यवायभिया अवश्यं धार्यैव शिखेति ।

सशिखक्षौरमिति क्वाचित्काधुनिकपद्धतिलेखनं तु श्रुति-स्मृति-सूत्राज्ञानमूलकत्वेन श्रुतिस्मृतिसूत्रविरोधात्, शिष्टाचारविरोधात् संस्कारभास्कराद्यर्वाचीनपद्धतिष्वनुपालम्भाच्चासङ्गतमेव ।

कौथुमराणायनादि छन्दोगमाणवकस्य तु प्राक् समावर्त्तनात् सशिखमेव वपनम् 'केशश्मश्रुरोमनखानि वापयीत शिखावर्जम्" (३-४-२४) इति गोभिलगृह्ये समावर्त्तने शिखारहितवपनोपदेशात् अर्वाक्सशिखवपनावगतेः ।

'सशिखं वपनं कार्यमास्नाद् ब्रह्मचारिणाम्'

इति कर्मप्रदीपे कात्यायनोक्तेश्च ।(एवं च सशिखक्षौरमित्यपि पूर्वोक्तं छन्दोगपरमेवेति बोध्यम्) 'यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव' (य० १७-४८) इति छन्दोगपरमिति निर्णयसिन्धौ ।

इदं च विशिखा विगतशिखा मुण्डितमुण्डा इत्यस्मिन्नर्थे बोध्यम् । विशिखपदस्य विविधशिखवत्वरूपमर्थमङ्गीकुर्वतां न्यायसुधा मीमांसाकौस्तुभकारादीनां मते तु छन्दोगेतरपरमिदम् ।

वस्तुतस्तु विविधशिखायुक्तत्वमेवात्र विशिखपदार्थः । अन्यथा तस्मिन्मन्त्रे बाणैः सह कुमाराणां दृष्टान्तकरणस्यासङ्गत्यापत्तेः ।

यथा विविधशिखाः कुमारा आगच्छन्ति एवं युद्धे अनेकवाज (पक्ष) युक्ता बाणा आगच्छन्तीति हि दृष्टान्तार्थः । यदि च विशिखपदस्य मुण्डितशिरस्कत्वमर्थोऽभिप्रेयते तदा वाजयुक्तैर्बाणैः सह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुण्डितशिरस्कानां कुमाराणां कथं सादृश्यमुपपन्नं स्यात् ।)

अतएव यस्य माणवकस्य स्वगृह्ये उपनयने सशिखमुण्डनं कण्ठतोऽभिप्रेतं तं वर्जयित्वा अन्यस्य कस्यापि माणवकस्योपनयने सर्वमुण्डनं न कार्यमेव ।

यत्र तु महापातकादिप्रायश्चित्तादौ, सामवेदीयोपनयने, सत्रे च सर्वमुण्डनं विशेषतोऽभिहितं तत्र सदोपवीतिनेति सामान्यशास्त्रस्याप्रवृत्या विशिखित्वेन कर्मानुष्ठाने ऽपि न प्रत्यवाय इति ।

अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा ॥१॥

अष्टौ वर्षाणि अतीतानि यस्य शिशोः (१) तम् अष्टवर्षं ब्राह्मणमुपनयेत्, उपनयनसंस्कारेण संस्कुर्यात् । आचार्यस्य उपान्तिके नयनमुपनयनशब्देनाऽभिधीयते । अग्निसमीपनयनं वा उपनयनशब्दस्यार्थः । अथवा गर्भाष्टमे गर्भसहचरितोऽब्दः अष्टमो यस्य तस्मिन्नतीते अर्थात् नवमे उपनयेत् ॥१॥

एकादशवर्षꣳ राजन्यम् ॥२॥

एकादश वर्षाणि अतीतानि यस्याऽसौ एकादशवर्षः तं जन्मतो गर्भतो वा एकादशे वर्षे राजन्यं क्षत्रियमुपनयेत् ॥२॥

द्वादशवर्षं वैश्यम् ॥३॥

द्वादश वर्षाणि अतीतानि यस्याऽसौ द्वादशवर्षस्तं तथोक्तं वैश्यं जन्मतो गर्भतो वा त्रयोदशे ऽब्दे उपनयेत् ॥३॥

यथामङ्गलं वा सर्वेषाम् ॥४॥

सर्वेषां वर्णानां ब्राह्मणक्षत्रियविशां यथामङ्गलं शास्त्रान्तरविहितसमयान्तरे वा उपनयनं भवति ॥४॥

ब्राह्मणान् भोजयेत्तं च(*A*)पर्युप्तशिरसमलङ्कृतमानयन्ति॥५॥

---

(१) पुंसामेवैतद् भवति न स्त्रीणाम् ।

(*A*) वपनं च भोजनात्पूर्वमेव कार्यम्, नेदानीं तदुपदेशो भूतकालनिर्देशाव इति कर्कादयः ।

भोजनं च पयोयवागूत्रामिक्षाहाराः क्रमशः इति गृह्यान्तरोक्तमेव ।

११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृद्धिश्राद्धव्यतिरिक्तान् त्रीन्ब्राह्मणान् भोजयेत् आशयेत्, तं संस्कार्यं कुमारं च भोजयेत् । ततो बहिःशालायाम् उपलिप्त उद्धृतावोक्षितेऽग्निमुपसमाधाय भोजनात् प्राक् शिरसः शिखावर्जं मुण्डनं कारयित्वा तदनन्तरमङ्गलकृत्य स्रङ्मालादिना विभूष्य आचार्यसमीपमानयन्ति। अत्र केचिदाचार्यकर्तृकमानयनमिच्छन्ति ॥५॥

पश्चादग्नेरवस्थाप्य(१) ब्रह्मचर्यमागामिति वाचयति ब्रह्मचार्यसानीति च ॥६॥

तत आचार्यः माणवकम् अग्नेः पश्चात् पश्चिमतोऽवस्थाप्य स्वदक्षिणतोऽवस्थितं कृत्वाऽऽचार्यो माणवकं प्रेषयति, "ब्रह्मचर्यमागाम्" इति, ततः प्रेषितो माणवकः 'ब्रह्मचर्यमागाम्' इति वदेत् । एवम् 'ब्रह्मचार्यसानि' इति आचार्यप्रेषितो माणवकः 'ब्रह्मचार्यसानि' इति वदेत् ॥६॥

अथैनं वासः परिधापयति "येनेन्द्राय(*A*)बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे" इति ॥७॥

अथ वाचनानन्तरम् एनं माणवकम् आचार्यो वक्ष्यमाणलक्षणम्

(१) अत्र अवस्थाप्येति सूत्रेण माणवकस्य उत्थानविधानात् 'प्रदक्षिणमग्निम्परीत्योपविशति' (का० २।३।१) इति अग्रे उपवेशनविधानात् इत आरभ्य तावत्पर्यन्तं कर्म तिष्ठता माणवकेन कर्तव्यम् इति प्रतीयते ।

(*A*) अङ्गिरा बृहस्पतिः बृहस्पतिर्देवता वासः परिधापने विनियोगः—

हे बटो ! येन विधिना इन्द्राय मघवते बृहस्पतिः देवाचार्यो वासः पर्य्यदधात् परिधापितवान्, किंभूतम् अमृतम् अहतम्, तेन विधिना त्वा त्वाम् बटुं परिदधामि परिधापयामि । उभयत्रान्तर्भूतो णिज् बोध्यः। परिधापयतीति लिङ्गात्। यद्वा इन्द्राय पर्यदधात् इन्द्रे अव्यवच्छिन्नं स्थापितवान् । तथा त्वा त्वां लक्ष्यीकृत्य परिदधामि त्वयि अव्यवच्छेदेन धारयामि । किमर्थम्-दीर्घायुत्वाय तव चिरजीवनाय, बलाय देहशक्तये, वर्चसे इन्द्रियशक्तये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहतं शाणादि(१) वासः 'येनै० वर्चसे' इति मन्त्रेण परिधापयति। वासांसि शाणक्षौमाविकानीति वर्णक्रमेण बोध्यानि ॥७॥

(२) मेखलां बध्नीते "इयं दुरुक्तं परिबाधमाना

आश्वलायनः—

(१) "वाससी ते स्वगुरवे मेधाजननकर्मणि ।
दद्यात्तावत्प्रभृत्येव कौपोनेन प्रवर्तयेत्" इति ॥

स्मृत्यर्थसारे —

"कौपीनं कटिसूत्रं च यतेः स्याद् ब्रह्मचारिणः ।
ग्राह्यं नैव गृहस्थस्य श्रौते स्मार्ते च कर्मणि" इति॥

(२) मेखलां च नाभिवस्त्योर्मध्ये बध्नीयात् । भागवते तृतीयस्कन्धे "कदम्ब-किञ्जल्कपिशङ्गवाससा स्वलङ्कृतं मेखलया नितम्बे" इति हरिमित्यस्य विशेषणमुक्तम्, कदम्बकिञ्जल्कवत्पिशङ्गवाससा मेखलया च नितम्बे कटिप्रदेशे स्वलंकृतमिति तदर्थः श्रीधरस्वामिना व्याख्यातः । एवं च कटिप्रदेश एव मेखलाधारणम्, न यज्ञोपवीतवत् स्कन्धे । अत एव कटिधारणीयापरपर्यायं मेखलारशनादि नामधेयमिति तत्तद् गृह्यसूत्रोक्तमुपपद्यते ।

"अथैनं त्रिः प्रदक्षिणं मुञ्जमेखलां परिहरन् वाचयति—इयन्दुरुक्तादिति" (गो. गृ. २।१०।३७)।

"आचार्यो माणवकस्य कटिप्रदेशे बध्वा" (शाङ्खा. गृ. २।२।२१)

"अथैनं मेखलया नाभिदेशे त्रिः प्रदक्षिणं परिव्ययति" (हि.के.गृ. १।४।४)

"मेखलां प्रदक्षिणं त्रिः परिव्ययति" (मान. गृ. १।२२।८)

"मेखलामाबध्नन् वाचयेत्" (गृ. २।२०)

"मेखलामाबध्नीते" (वा. गृ. ११७)

"मौञ्जीं मेखलां त्रिवृत्तां त्रिः परिवीय" (४।११)

"मेखलामाबध्नीते (जै. गृ. ११२) (काठ. गृ. ४।१।११)

'मेखलां बध्नीते अन्तरां वाससः (का. श्रौ. सू. अ. ७। क. ३ सू२६) इति सूत्रव्याख्याने परिधानवस्त्रमध्यवर्तिनीम् इति देवयाज्ञिकः ।

'तस्मादेषाऽन्तरा वाससो भवति' (श. प. ब्रा. ३, २, १, ११) इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(B)वर्णं पवित्रं पुनती मऽ आगात् । प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्" इति ॥८॥

अथ वस्त्रपरिधानानन्तरम् आचार्यो माणवककट्यां मेखलां मुञ्जदिमयीं रशनां "इयं० लेयम्" इत्यन्तेन मन्त्रेण बध्नीते । माणवकस्यैव मन्त्रः मे इति लिङ्गादिति हरिहरः । गदाधरस्तु बन्धनरूपकर्तृत्वेन तदङ्गमन्त्रपाठोऽपि आचार्यस्यैव, लिङ्गं तु लक्षणयोपपादनीयमित्याह तत्राद्यपक्ष एव गोभिलगृह्यसम्मतः ॥८॥

"युवा सुवासाः(C)परिवीतऽ आगात्सऽ उश्रेयान्भवति जायमानः तं धीरासः कवयऽ उन्नयन्ति स्वाध्यो मनसा देवयन्त" इति वा॥९॥

तूष्णीं वा ॥१०॥

अथवा "युवा० देवयन्त" इत्यन्तेन मेखलां बध्नीते ॥९॥
अथवा तूष्णीं मन्त्ररहितेनेत्यर्थः ॥१०॥

दर्शपूर्णमासप्रकरणे पत्नीसन्नहने देवयाज्ञिकः—तत्रैतत्सन्नहनं नाभेरधः कटिप्रदेशे कर्त्तव्यम्, 'अस्ति पत्न्या अमेध्यं यदवाचीनं नाभेः' श. ब्रा. वाक्यात् ।

(B) वामदेवस्त्रिष्टुप् मेखला देवता तद्बन्धने विनियोगः—

इयं मेखला माम् आगात् आगता । किं कुर्वंती, दुरुक्तं दुष्टं भाषितम् असत्याप्रियादिकं परितः सर्वतो भूतं भविष्यच्च बाधमाना निराकुर्वाणा, वर्णं वर्णत्वं पवित्रं शुद्धं पुनती सत्कुर्वंती, मे मम प्राणापानाभ्यां मरुद्भ्यां बलं सामर्थ्यम् आदधाना स्थापयन्ती, स्वसा स्वसृवत् हिता देवी दीप्तिमती सुभगा सौभाग्यदेति भावः ॥

(C) अङ्गिरा बृहती बृहस्पतिर्देवता परिधाने विनियोगः—

यौति गुणान् एकीकरोति इति युवा सुवासाः शोभनवस्त्रयुक्तः । अहतं शोभनमुच्यते । परिवीतः, वस्त्रपुष्पमालादिभिः समन्ततो वेष्टितः आगात् आगतः । 'उ वितर्के' श्रेयान् स यदि जायमानः उत्पाद्यमानः श्रेयान् शुद्धः स्यात् । धीरासः स्थिरप्रज्ञाः कवयः क्रान्तदर्शनाः स्वाध्यः शोभनचित्तत्वयरतं बटुम् उन्नयन्ति, उत्कर्षं गमयन्ति । किं कुर्वन्तः मनसा मनोवृत्त्या देवयन्तः वेदार्थं ज्ञापयन्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञोपवीतं[A] परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥
"यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि" इति ॥११॥

यज्ञोपवीतं० नह्यामि" इत्यन्तं मन्त्रं पठितवतो माणवकस्य दक्षिणं बाहुमुद्धृत्य वामांसोपरि निदध्यात् ॥

अथाजिनं प्रयच्छति "मित्रस्य(१) चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं समिद्धम् । अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहम्" इति ॥२१॥

अथ यज्ञोपवीतपरिधानानन्तरं "मित्रस्य० दधेऽहम्" इत्यन्तेन मन्त्रेण ऐणेयं ब्राह्मणः, रौरवं क्षत्रियः, मेषचर्म वैश्यः परिदध्यात् ।

(*A*) प्रजापतिस्त्रिष्टुप् लिङ्गो देवता यज्ञोपवीतपरिधाने विनियोगः—

हे आचार्य ! इदं ब्रह्मसूत्रम् अहं प्रतिमुञ्च प्रतिमुञ्चानि प्रतिबध्नामि । परमं पर आत्मा मीयते ज्ञाप्यते तेन वाक्योपदेशाधिकारित्वात् । पवित्रं शोधकं प्रजापतेर्ब्रह्मणः सहजं स्वभावशुद्धं पुरस्तात्प्राग्भवमत्त इदम् आयुषे हितम् आयुष्यमस्तु । अग्र्यं मुख्यम् अनुपहतं शुभ्रं निर्मलीकरणं बलं धर्मसामर्थ्यप्रदं तेजःप्रभावप्रदम् ।

(१) प्रावरणपर्याप्तोत्तरीयार्थाऽजिनासम्भवे शाकलः—

"अखण्डं वा त्रिखण्डं वाऽष्टाचत्वारिंशदङ्गुलम् ।
चतुरङ्गुलविस्तीर्णं धारयेदजिनं सदा" इति ॥

खण्डत्रयमानं स्मृत्यन्तरे—

"त्र्यङ्गुलं तु बहिर्लोम यद्वा स्याच्चतुरङ्गुलम् ।
अजिनं धारयेद्विप्रश्चतुर्विंशाऽष्टषोडशैः" इति ॥

चतुर्विंशाङ्गुल एकः । अष्टाऽङ्गुलो द्वितीयः । षोडशाङ्गुलस्तृतीयः । एवं त्रिभिः खण्डैरष्टाचत्वारिंशदङ्गुलं परिमण्डलमजिनं धार्यमित्यर्थः ।

मित्रस्य चक्षुरिति वामदेवस्त्रिष्टुप अजिनधारणे विनियोगः । हे आचार्य ! वाजी अन्नवान् अहमिममजिनमैणेयं परिदधे धारयामि । कीदृशं मित्रस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दण्डं प्रयच्छति तं प्रतिगृह्णाति "यो मे (*A*) दण्डः परापतद्वैहायसोऽधि भूम्याम्। तमहं पुनराददऽ आयुषे ब्रह्मणे ब्रह्मवर्चसाय" इति ॥१२॥

तत आचार्यः माणवकाय दण्डं प्रयच्छति ददाति, माणवकोऽपि तं दण्डं "योमे०साय" इति मन्त्रेण प्रतिगृह्णाति स्वीकरोति (१) ॥ १२ ॥

दीक्षावदेके दीर्घसत्रमुपैतीति वचनात् ॥१३॥

एके आचार्याः दीक्षावत् सोमयागदीक्षायां 'मुखसम्मितमौदुम्बरं दण्डं प्रयच्छति' इति कातीयवचनेन यथा प्रतिग्रहणोच्छ्रयणे विहिते तद्वदत्रापि कर्त्तव्ये इति शेषः। तत्र हेतुमाह–'दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैति' इत्यादिवाक्यस्मरणात्। दीर्घसत्रताऽस्य दण्डप्रतिग्रहणसामान्यात्॥१३॥

अथाऽस्याद्भिरञ्जलिनाऽञ्जलिं पूरयति 'आपो (*B*)हिष्ठा' इति तिसृभिः ॥१४॥

अथाऽऽचार्यः अस्य बालस्याञ्जलिं स्वकीयेनाऽञ्जलिना जलमादाय तैर्जलैः पूरयति 'आपो० चन' इत्यन्ताभिस्तिसृभिर्ऋग्भि ॥१४॥

अथैनꣳ सूर्यमुदीक्षयति तच्चक्षुरिति ॥१५॥

देवस्य चक्षुस्तत्स्थानीयं, बलीयो बलवचरं, धरुणं धारकम्, तेजो यशस्वि उभयसाधनम्, स्थविरं वृद्धम्, समृद्धमृद्धिसाधनम्, अनाहनस्यम् अनाहनसे हितम् अनाहनस्यम्, 'आहना इत्युपनाम' अनुग्रम् अतिसमृद्धित्यर्थः। वसनम् आच्छादनम्, जरिष्णुः जयसाधनम् राज्ञो मुनेश्चेत्यर्थः।

(*A*) प्रजापतिर्यजुः दण्डो देवता तद्ग्रहणे विनियोगः—

हे आचार्य! यो दण्डः मे मह्यं परापतत् अभिमुखमागतः वैहायसः आकाशे प्रसृतः, अधिभूम्याम् भूमेरुपरि वर्तमानः, तं दण्डम् अहःमाददे गृह्णामि। किमर्थम्–आयुषे निर्दुष्टजीवनाय, ब्रह्मणे वेदग्रहणाय, ब्रह्मवर्चसाय याजनाध्यापनोत्कर्षतेजसे इत्यर्थः।

(१) मनुः–"ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकराश्चैव सत्वचो नाग्निदूषिताः॥"

(*B*) व्याख्याता (कां० १। कं० ७ सू०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाचार्य एनं कुमारं सूर्यम उदीक्षयति दर्शयति 'तच्चक्षु० शतात्' इत्यन्तेन मनुना ॥१५॥

अथास्य दक्षिणाꣳसमधि हृदयमालभते "मम[A] व्रते ते हृदयं दधामि मम चित्तमनु चित्तं तेऽअस्तु । मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्" इति ॥१६॥

अथाऽऽचार्यो दक्षिणांसमधि दक्षिणस्कन्धस्योपरि स्वकीयं दक्षहस्तं नीत्वा हृदयं वक्ष आलभते स्पृशति: ॥१६॥

अथास्य दक्षिणꣳ० हस्तं गृहीत्वाऽऽह'को नामासी'ति॥१७॥

अथ हृदयाऽऽलम्भनानन्तरम आचार्यः कृत्स्नवेदाध्यापकः अस्य माणवकस्य दक्षिणं हस्तं साङ्गुष्ठं निजहस्तेन गृहीत्वा 'को नामासि' इति आह ॥१७॥

'असावहं भो ३' इति प्रत्याह ॥१८॥

एवं पृष्टः सन् माणवकः असौ 'अमुकशर्माहं भो ३' इति प्रत्याह प्रतिवचनं दद्यात ॥१८॥

'कस्य ब्रह्म चार्यासि' भवतऽ इत्युच्यमान 'इन्द्रस्य[B]ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासौ" इति ॥१६॥

अथ एवं वटुं प्रति आचार्य आह कस्येति । ततो वटुः भवत इति ब्रवीति । भवत इत्युच्यमाने सति सन्तुष्ट आचार्यः 'इन्द्रस्य० सावित्यन्तं पठतीति शेषः ॥१९॥

अथैनं भूतेभ्यः परिददाति "प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि

(A) व्याख्यातश्चाऽयं मन्त्रो विवाहप्रकरणे—

(B) इन्द्रस्य ऐश्वर्ययुक्तस्य प्रजापतेः 'इदि परमैश्वर्ये, ब्रह्मचारी त्वमसि । तव च अग्निः आचार्यः प्रथमः । तव द्वितीयाऽऽचार्य्यश्चाऽहमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यावापृथिवीभ्यान्त्वा परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या" इति ॥२०॥

अथानन्तरमेनं माणवकम् आचार्यः भूतेभ्यः प्रजापतिप्रभृतिभ्यः परि परितः सर्वतो रक्षितुं ददाति प्रयच्छति प्रजापतये० अरिष्ट्या इत्यनेन मन्त्रेण ॥२०॥

इति द्वितीयस्य द्वितीया कण्डिका ॥२॥

प्रदक्षिणमग्निं परीत्योपविशति ॥१॥

वस्त्रादिभिः संस्कृतो वटुः प्रदक्षिणं यथा स्यात्तथाऽग्निं परीत्य परिक्रम्य वह्नेः पश्चिमत आचार्यस्योत्तरत उपविशति आस्ते ॥१॥

अन्वारब्ध आज्याऽऽहुतीर्हुत्वा प्राशनान्तेऽथैनर्ठ० सर्ठ० शास्ति ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोऽशानेति ॥२॥

ब्रह्मणाऽन्वारब्ध आचार्यः आघारादिस्विष्टकृदन्ताश्चतुर्दशाऽऽज्याहुतीर्हुत्वा संस्रवप्राशनान्ते स्रुवसंल्लग्नघृतप्राशनान्ते कर्मणि कृते

अथानन्तरमाचार्यः एनं वटुं संशास्ति शिक्षयति। तत्प्रकारश्चैवम्—'ब्रह्मचारी(A) असि, इत्याचार्यो ब्रवीति। भवानि, इति ब्रह्मचारी प्रत्याह। अपोऽशान, इत्याचा० अश्नानि, इति ब्र०। वाचं यच्छ इत्याचा० यच्छानि, इति ब्र०। समिधमाधेहीत्याचा० आदधानि, इति ब्र०। अपोऽशान इत्याचा० अश्नानि इति ब्रह्मचारी प्रत्याह ॥२॥

(A) ब्रह्म वेदः तत्कर्म चरतीत्येवं शीलो ब्रह्मचारी त्वं असि भवसि। अपः अशान पिब। मूत्रोत्सर्गादौ निमित्ते शौचान्ते विधिनाऽऽचमनं कुरु। अथवा "अशित्वाऽऽचामेदशिष्यन्नाऽऽचामेत" इति श्रुतेर्भोजनादौ भोजनान्ते चाचमनं कुरु। कर्म स्ववर्णाश्रमविहितं स्नानादिकं गुरुशुश्रूषां वेदाध्ययनादिकं च कुरु। दिवा दिवसे मा सुषुप्थाः स्वाप्सीः। स्मृत्युक्तसमये वाचं गिरं यच्छ नियमय। सर्वदा वक्ष्यमाणनियमेन वह्नौ यावद्ब्रह्मचर्यं सायंप्रातः समिधम् आधेहि प्रक्षिपेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाऽस्मै [1]सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय ॥३॥

अथ शासनानन्तरम् अस्मै ब्रह्मचारिणे सावित्रीं सवितृदेवताकां गायत्रीच्छन्दस्काम् ऋचमन्वाह उपदिशति आचार्यः । किं भूताय प्रत्यङ्मुखाय पश्चिमाभिमुखाय, पुनः किंभूताय वह्नेरुत्तरत उपविष्टाय आसीनाय, तथा

सावित्रीप्रदानसमयं विकल्पेन ब्रवीति—

(१) सर्वस्मृतिपर्यालोचनया सर्वगृह्यपर्यालोचनया च उपनयने गायत्र्युपदेशे अयं क्रमः प्रतीयते—

ओङ्कारपूर्वं व्याहृतिपूर्वं च आचार्यः प्रथमं पादं स्वयमुक्त्वा अथ माणवकं वाचयेत् । यथा—ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यम् । एवं पादत्रयं पृथक् पृथगुक्त्वा ततस्तं वाचयेत् । द्वितीयवारम् अर्धर्चमर्धर्चमुक्त्वाऽथ वाचयेत् । यदि माणवकः पादं पादम् अर्धर्चमर्धर्चं सर्वां च वक्तुं न शक्नुयात् तर्हि यथाशक्ति वाचयेत् । तृतीयस्मिन् वारे माणवकेन सहैव सर्वामृचम् आचार्यो ब्रूयात् न तु पूर्वस्मिन् वारद्वय इव प्रथममाचार्यस्योक्तिः अनन्तरं माणवकस्योक्तिः । अथाऽस्मै सावित्रीमन्वाह'पच्छोऽर्धर्चशः सर्वां च तृतीयेन सहाऽनुवर्तयन्' इति पारस्करगृह्यात् । तृतीयेनेति हेतौ तृतीया न तु सह योगे, तथा सति पुत्रेण सहागतः पितेत्यस्य वाक्यस्य यथा पुत्रेण सह पितुरागमनमर्थस्तथाऽत्रापि तृतीयस्यैवाऽऽवर्तनं स्यात् । अतस्तृतीयस्मिन् वारे आचार्यो माणवकेन सहैव अनुवदेदिति सूत्रार्थः । अयमेवाऽर्थः "अत्र तु सहपाठो विशेष" इति ब्रुवतां पद्धतिकाराणामपि अभिप्रेतः । अत्राऽपि यदि समग्रामृचम् अभिधातुं न शक्नुयान्माणवकस्तर्हि यथाशक्त्येवाऽभिधानम् । परन्तु उभाभ्यां सहैव वक्तव्यम् न तु पूर्ववद्वचनाऽनुवाचने । एवं सति ये प्रणवव्याहृतिरहितामेव गायत्रीमुपनयने उपदिशन्ति तृतीयस्मिन्नपि वारे प्रथमद्वितीयोपदेशवत् अनुवचनं च कुर्वन्ति न सहाऽनुवचनं तेषामनुष्ठाने न किञ्चित्प्रमाणं पश्यामः । अत्र प्रमाणम् **आश्वलायनगृह्ये**—'जान्वाच्योपसंगृह्य ब्रूयादधीहि भोः सावित्रीं भो अनुब्रहीति पाणिभ्यां पाणी सङ्गृह्य सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वां यथाशक्ति वाचयीत ।'

आश्वलायनकारिकायाम्—'भूर्भुवः स्वः पूर्वां तुसावित्रीं वाचयेदथ । पादं पादं च सावित्र्याः स्वयमुक्त्वाऽथ वाचयेत् । ततस्त्वर्धर्चमर्धर्चं सर्वां तामथ वाचयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपसन्नाय पादोपसंग्रहणादिना भजमानाय, पुनः किंभूताय गुरुं समीक्षमाणाय, तथा गुरुणाऽपि समीक्षिताय सम्यगवलोकितायेति ॥३॥

दक्षिणतस्तिष्ठतऽ आसीनाय वैके ॥४॥

वा अथवा एके आचार्याः दक्षिणतोऽग्नेर्दक्षिणस्यां दिशि तिष्ठते ऊर्ध्वाय ऊर्ध्वीभूताय आसीनाय वा सावित्रीप्रदानं स्वीकुर्वन्ति । अत्रैकशब्दाद्विकल्पो बोध्यः ॥४॥

एवं वक्तुमशक्तं तु तं यथाशक्ति वाचयेत्।' **आपस्तम्बसूत्रे**—'सावित्रीं भो अनुब्रूहीति तस्मा अन्वाह तत्सवितुरिति पच्छोऽर्धर्चशः सर्वा व्याहृतीर्विहृताः पादादिष्वन्तेषु वा तथाऽर्धर्चयोरुत्तमां कृत्स्नायाम् ।'

गोभिलगृह्ये—'तस्मा अन्वाह पच्छोऽर्धर्चश ऋक्श इति महाव्याहृतीश्च ओंकारान्ताः ।' (२।१०।३९-४० ।)

लौगाक्षिः—"भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्धर्चशः सर्वामन्ततः ।"

शौनकः—

"सावित्रीं स्वयमाचार्यः पूर्वं पच्छस्तथैव तम् ।
शिष्यं च वाचयेत्पश्चादुच्चार्यार्धर्चशः स्वयम् ॥१॥
तथैव वाचयेच्छिष्यमथोक्त्वा सकलां स्वयम् ।
पूर्वं तथैव शिष्यं च वाचयेदित्ययं क्रमः ॥२॥
त्रिष्वप्येतेषु पक्षेषु यथा शिष्यस्तु शक्नुयात् ।
वक्तुं तथैव आचार्यो वाचयेदवधानतः ॥३॥ इति ।

यमः—

"ओङ्कारपूर्विकास्तिस्रः सावित्रीं यश्च विन्दति ।
चरति ब्रह्मचर्यं च स वै श्रोत्रिय उच्यते ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पच्छोऽर्धर्चशः सर्वां च तृतीयेन सहाऽनुवर्तयन् ॥५॥

कथं सावित्रीप्रदानमिति चेदुच्यते—प्रथमं तावत् पच्छः पादं पादं, तदनु अर्धर्चशः अर्धर्चम् अर्धर्चम्, ततः तृतीयेन वारेण सह ब्रह्मचारिणा सर्वां च सावित्रीम् अनुवर्तयन् आवर्तयन् पठेत् । 'तां वै पच्छोऽन्वाहेत्युपक्रम्य अथाऽर्धर्चश अथ कृत्स्नामिति' श्रुतेः ॥५॥

सम्वत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा ॥६॥

सम्वत्सरे व्रतबन्धनादारभ्य पूर्णेऽब्दे षण्मास्ये षडेव मासाः षण्मास्यं तस्मिन् षण्मास्ये "छन्दोवत्सूत्राणि भवन्ति" इति निर्देशात्षण्मास्यमित्यत्र स्वार्थे तद्धितश्छान्दसो वृद्धिलोपः । चतुर्विंशत्या अहोभिरुपलक्षितः समयः चतुर्विंशत्यहः तस्मिन् चतुर्विंशत्यहे, द्वादशभिरहोभिरुपलक्षितः कालो द्वादशाहः तस्मिन्, एवं षड्भिरहोभिपलक्षितः कालः षडहः तस्मिन्, तथाच त्रिभिरहोभिरुपलक्षितः कालस्त्र्यहस्तस्मिन् त्र्यहे वा सावित्रीमनुब्रूयादाचार्यः ॥६॥

सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयात् 'आग्नेयो वै ब्राह्मण इति श्रुतेः' ॥७॥

तु शब्दः पक्षं व्यावर्त्तयति । तु पुनः ब्राह्मणाय विप्राय सद्य एव गायत्रीमनुब्रूयात् उपदिशेत् । कुतः श्रुतौ हि 'आग्नेयो वै ब्राह्मण' इत्युक्तत्वात् । सद्यो वा अग्निर्जायते तस्मात् सद्य एव विप्राय अनुब्रूयाद् गायत्रीम् ॥ ७ ॥

त्रिष्टुभꣳ राजन्यस्य ॥८॥

तिस्रो व्याहृतीरिति शेषः ।

"ओं पूर्वा व्याहृतीस्तिस्रः समस्तास्तु सकृद्वदेत् ।
पच्छस्त्वर्धर्चशः सर्वां सावित्रीं त्रिर्वदेदथ "॥१॥

इति स्मृत्यन्तरे । अत्र सावित्रीं वाचयन् सन्धिकृतं वर्णविकारं नान्यथा कुर्वीतेति स्मृतिकौस्तुभे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगतीं वैश्यस्य ॥९॥

राजन्यस्य क्षत्रियस्य त्रिष्टुभं सावित्रीम्। त्रिष्टुप् छन्दो यस्याः सा त्रिष्टुप् ताम् त्रिष्टुभं अनुब्रूयात् ॥ (सा च विश्वा रूपाणीति शु.य.१२.३.)

वैश्यस्य तृतीय वर्णस्य जगतीम् जगती च्छन्दो यस्या ऋचः सा जगती ताम् तथोक्ताम् सावित्रीमनुब्रूयात् (सा च ताᳬं सवितुरिति शु. य. १७. ७३.) ॥८॥९॥

सर्वेषां वा गायत्रीम् ॥१०॥

सर्वेषां ब्राह्मणक्षत्रियविशां वा अथवा गायत्री च्छन्दो यस्याः सा गायत्री ताम् गायत्रीम् 'तत्स०यात्' इत्यृचमनुब्रूयादिति शेषः ॥१०॥

इति द्वितीयस्य तृतीया कण्डिका ॥३॥

उपनयनाङ्गभूतं समिदाधानमुच्यते—

अत्र समिदाधानम् ॥१॥

अत्राऽस्मिन्नेवाऽग्नौ उपनयनाङ्गभूतानां तिसृणां समिधां विहितकाष्ठानाम् आधानं प्रक्षेपो भवति। कर्ता चाऽत्र ब्रह्मचार्येव।

हरिहरस्तु—'अत्र' शब्दः सावित्रीप्रदानोत्तरकालार्थक इत्याह।

पाणिनोऽग्निं परिसमूहति 'अग्ने(A) सुश्रवः सुश्रवसं मा कुरु' यथो त्वमग्ने सुश्रवः सुश्रवाऽ असि, एवं माᳬं सुश्रवः सौश्रवसं कुरु, यथा त्वमग्ने देवानां यज्ञस्य निधिपा ऽअसि, एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् इति ॥२॥

(A) प्रजापतिर्यजुः अग्निर्देवता अग्निसमिन्धने विनियोगः—

हे अग्ने! हे सुश्रवः शोभनकीर्त्ते! मा माम् सुश्रवसं शोभनकीर्त्तियुक्तं कुरु। किञ्च हे अग्ने! सुश्रवः। सौश्रवसं सुश्रवाश्च सौश्रवसश्च तम्। तत्र सुश्रवाः स्वयम् सुश्रवा गुरुस्तस्याऽयं सौश्रवसः ममाऽऽचार्यमपि सुश्रवसं कृत्वा तदीयत्वेन माम् सौश्रवसं कुर्वित्यर्थः। किञ्च हे अग्ने यथा त्वन्देवानामिन्द्रादीनां मध्ये यज्ञस्य क्रतोर्निधिं हविर्द्रव्यम् पासि रक्षसि। एवमहं मनुष्याणां मध्ये वेदस्य श्रुतेर्निधिरधिकरणम् भूयासम् भवेयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो वटुः पाणिना दक्षकरेणाऽग्निं प्रकृतोपनयनाङ्गभूतहोमाधिकरणं परिसमूहति 'अग्ने० भूयासम्' इत्यन्तैः पञ्चमन्त्रैः विहितकाष्ठ[1] शुष्कगोमयादिप्रक्षेपेण समुक्षयति । केचित् परिसमूहनकर्मणि मन्त्रत्रयमेवेच्छन्ति । तथा हि—'अग्ने० इत्यारभ्य मा कुरु इत्येकम्, यथात्व० संकुरु इति द्वितीयम्, यथा० भूयासमिति तृतीयम् ॥२॥

प्रदक्षिणमग्निं पर्युक्ष्योत्तिष्ठन्त्समिधमादधाति 'अग्नये[A] समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस ऽएवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाऽऽचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा' इति ॥३॥

ततो वटुः प्रदक्षिणं यथा भवति तथा सन्दीपितम् अग्निं हुताशनं दक्षिणकरस्वीकृतेन जलेन पर्युक्ष्य परिषिच्योत्थाय प्राङ्मुखस्तिष्ठन् समिधं काष्ठम् 'अग्नये० स्वाहा' इत्यन्तेन मनुना आदधाति वह्नौ प्रक्षिपति ॥३॥

---

(१) ब्रह्मपुराणे—"पलाशाऽश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।
अश्वत्थोदुम्बरो बिल्वश्चन्दनः सरलस्तथा ।
शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः" इति ॥

(A) प्रजापतिराकृतिः समिद्देवता समिदाधाने विनियोगः—

हे देवाः इमाम् सम्यगिध्यते दीप्यते अग्निः अनयेति समित् ताम् समिधम् अग्नये अग्न्यर्थम् आहार्षमाहृतवानस्मि । किं भूताय बृहते महते । जातान् जातान् वेत्तीति जातवेदास्तस्मै जातवेदसे । यथ येन प्रकारेण दीप्यमानयाऽनया समिधा त्वं हे अग्ने ! समिध्यसे दीप्यसे एवमहमायुषा जीवनेन मेधयाऽतीतादिधारणवत्या बुद्ध्या वर्चसा तेजसा प्रजया पुत्रादिभिः पशुभिः ब्रह्मवर्चसेन तेजसा कृताऽध्ययनसंपत्या अहं समिन्धे समृद्धो भवामि । आचार्यैस्त्रिधयं फलमप्याशंसते - जीवपुत्रो दीर्घायुरपत्यो ममाऽऽचार्यो भवतु । जीवन्तः पुत्रा यस्य स जीवपुत्रः । मेधावी अहमसानि भवामि । अनिराकरिष्णुः गुरूपदिष्टधर्माद्यविस्मरणशीलः । यशस्वी तेजस्वी ब्रह्मवर्चसी अन्नादः अन्नमत्तीत्यन्नादो भूयासम् भवेयम्, तस्मै स्वाहा सुहुतमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं द्वितीयाम् ॥४॥

एवमनेनैव प्रकारेण द्वितीयां तथा तृतीयां समिधमादधाति ॥४॥

एषा त इति वा समुच्चयो वा ॥५॥

वा अथवा 'एषा०सिषीमहि' (शु. य. २. ४.) इति मन्त्रेण, समिदाधानम् । अथवा अग्नये समि०, एषा ते०, इति च द्वयोर्मन्त्रयोः समुच्चय ऐक्यं स्यात् समिदाधाने ॥ ५ ॥

पूर्ववत्परिसमूहनपर्युक्षणे ॥६॥

परिसमूहनम् 'अग्ने सुश्रवः० भूयासम्' इत्यन्तेन अग्नेः सन्धुक्षणम् । पर्युक्षणं च अग्नेः परितो जलासेकः । परिसमूहनपर्युक्षणे पूर्ववत् अग्नेः कर्तव्ये इत्यर्थः ॥६॥

पाणी प्रतप्य मुखं विमृष्टे "तनूपाऽ अग्नेऽसि तन्वं मे पाहि, आयुर्दा ऽअग्नेऽस्यायुर्मे देहि, व्वर्चोदा ऽअग्नेऽसि व्वर्चो मे देहि । अग्ने यन्मे तन्वा ऽऊनं तन्म ऽआपृण" ॥७॥ (A)

"मेधां मे देवः सविता आदधातु, मेधां मे देवी सरस्वती आदधातु, मेधामश्विनौ देवावाधत्तां पुष्करस्रजावि"ति॥८॥(B)

(A) प्रजापतिर्यजुः अग्निर्देवता मुखविमार्जने विनियोगः—

हे अग्ने ! त्वं स्वभावत एव तनूपा असि, अग्निहोत्रिशरीराणां पालकोऽसि । तनूं पाति पालयतीति तनूपाः । अतो मे मम तन्वं शरीरं पाहि पालय । हे अग्ने ! त्वम् आयुर्दा असि आयुषो दाता भवसि अतो मे ममायुर्देहि । हे अग्ने ! त्वम् वर्चोदा ऽसि अतो मे मम वर्चो देहि । वैदिकानुष्ठानप्रयुक्तं तेजो वर्चः । किं च हे अग्ने ! मे मम तन्वाः शरीरस्य यदङ्गं चक्षुरादिरूपमूनं तदङ्गं मे मम आपृण सर्वतः पूरय ॥७॥

(B) प्रजापतिरनुष्टुप् लिङ्गोक्ता देवता मुखविमार्जने विनियोगः -

देवो द्युतिमान् सविता सूर्यो मे मह्यं मेधाम् धारणावतीं बुद्धिमादधातु । तथा देवी दीप्यमाना सरस्वती मेधाम् आदधातु सम्पादयतु । तथा देवौ कान्तौ अश्विनौ मे मह्यम् मेधाम् आधत्ताम् सम्पादयेताम् । कथंभूतौ—पुष्करस्रजौ पद्ममालिनौ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्युक्षणानन्तरं ब्रह्मचारी पाणी प्रतप्य उभौ करौ तूष्णीमग्नौ तापयित्वा "तनूपा ऽअग्नेऽसि० पुष्करस्रजौ" इति सप्तभिर्मन्त्रैः मुखं विमृष्टे हस्ताभ्यां ललाटादि चिबुकान्तं मार्जयति। प्रतिवाक्यं पाण्योः प्रतपनम्, मुखशोधनं च ॥७॥८॥

अङ्गान्यालभ्य जपति—(A)

अङ्गानि च म ऽआप्यायन्तां वाक् प्राणश्चक्षुः श्रोत्रं यशो बलमिति, त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेऽꣳसे हृदि च 'त्र्यायुषमि'ति प्रतिमन्त्रम् ॥९॥

मुखमार्जनान्तं सर्वाणि अङ्गान्यालभ्य 'अङ्गानि० बलम्' इत्यन्तं मन्त्रं जपति। तत्र वाक् इत्यनेन मुखम्, प्राण इत्यनेन नासिके, चक्षुरित्यनेन चक्षुषी, श्रोत्रम् इत्यनेन श्रवणे, यशो बलम् इति पाठमात्रम्। वाक् इत्यादिषु मन्त्रेषु च म आप्यायतामित्यनुषज्यते। ततः त्र्यायुषमित्येतैश्चतुर्भिर्मन्त्रैः अनामिकागृहीतभस्मना ललाटे, ग्रीवायाम् दक्षिणेऽसे, हृदि च प्रतिमन्त्रं त्र्यायुषाणि करोति ॥९॥

इति द्वितीयस्य चतुर्थी कण्डिका ॥४॥

अत्र भिक्षाचर्यचरणम् ॥१॥

अत्राऽवसरे भिक्षाचर्यं, भिक्षावृत्तिः तस्य चरणम् अनुष्ठानं विधेयमिति सूत्रशेषः ॥१॥

(A) मे मम अङ्गानि आप्यायन्तां वर्धन्ताम्, एवमग्रेतना मन्त्रा व्याख्येयाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिक्षाप्रकारमाह—

भवत्पूर्वां ब्राह्मणो भिक्षेत[1] ॥२॥

भवच्छब्दः पूर्वो यस्याः सा भवत्पूर्वा, ताम् भवत्पूर्वाम् ब्राह्मणो विप्रः भिक्षां भिक्षेत । 'भवति भिक्षां देहि' इति वाक्ययोजना ॥२॥

भवन्मध्यां राजन्यः ॥३॥

भवच्छब्दो मध्ये यस्याः सा भवन्मध्या तां तथोक्तम् राजन्यो द्वितीयवर्णः भिक्षां याचेत । 'भिक्षां भवति ! देही'ति वाक्ययोजना ॥३॥

भवदन्त्यां वैश्यः ॥४॥

भवच्छब्दोऽन्ते यस्याः सा भवदन्त्या ताम् भवदन्त्यां भिक्षां वैश्यस्तृतीयो वर्णः भिक्षेत ।वाक्यप्रयोजना तु 'भिक्षां देहि भवति' इति॥४॥

तिस्रोऽप्रत्याख्यायिन्यः ॥५॥

तिस्रः स्त्रियः भिक्षां याचेत । कथम्भूताः अप्रत्याख्यायिन्यः प्रत्याख्यातुम् निराकर्तुं शीलं यस्याम् तास्तथोक्ताः । न प्रत्याख्यायिन्य अप्रात्याख्यायिन्यः । याः स्त्रियो भिक्षातो विमुखा न भवेयुस्ता भिक्षणीया इत्यर्थः । द्विकर्माऽयं धातुः । स्त्रीभ्यो भिक्षेत्यर्थः ॥५॥

षड् द्वादशाऽपरिमिता वा ॥६॥

षड् वा स्त्रियो द्वादश वा स्त्रियोऽपरिमिता वा असंख्याता वा स्त्रिय भिक्षां भिक्षेत् ॥६॥

मातरं प्रथमामेके ॥७॥

---

(१) "सप्तावरां चरेद् भिक्षां क्षां चर्हिं च न वर्जयेत्" इति हारीतः ।
"सुवर्णं रजतं रत्नं सा पात्रेऽस्य निवेदयेत्" इति संस्कारप्रकाशे ।
"गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
सजातीयगणेष्वेव सर्ववर्णिकमेव वा" इति स्मृतौ ।
सार्ववर्णिकमित्यापद्विषयम् ।

इदं भिक्षाचरणं नैत्यिकं नोपनयानङ्गं कर्ममध्ये भक्षणस्यासंभवात् । एवं समिदाधानादपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एके आचार्या मातरं जननीम् प्रथमाम् भिक्षां भिक्षेतेति वदन्ति । अत्र सूत्रे मातृपदं याञ्चायां दातुः स्नेहस्याऽभ्यर्हितत्वद्योतनार्थमुक्तम् । अयं च प्रथमदिनधर्म इति कर्काचार्याः ॥७॥

आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येके ॥८॥

आचार्याय साङ्गवेदाध्यापयित्रे भैक्षम् उपलब्धां भिक्षां निवेदयित्वा अद्य इयं भिक्षा मया उपलब्धेति समर्प्य वाग्यतोऽहःशेषम् अस्तमयं यावत्तिष्ठेत् नोपविशेन्न च शयीत रागत इति ॥८॥

अहिꣳसन्नरण्यात्समिधऽ आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते ॥९॥

ततो ब्रह्मचारी अहिंसन् हिंसामकुर्वन् अर्थात् स्वयम्भग्नाः समिध अरण्याद्वनात् आहृत्य आनीय यस्मिन्नग्नौ उपनयनहोमः कृतः तस्मिन्नेवाऽग्नौ[1] पूर्ववत् आधाय समिदाधानं कृत्वा वाचं विसृजते यदि वाग्यमः स्वीकृतस्तदा तस्मिन् समये ताम् विसृजते ॥९॥

ब्रह्मचारिणो यमनियमानाह—

अधःशाय्यक्षारलवणाशी स्यात् ॥१०॥

अधः शयितुं शीलमस्य असौ अधःशायी, अक्षारं च तत् अलवणञ्चाश्नातीत्येवंशीलोऽक्षारालवणाशी स्याद्भवेत् ॥१०॥

दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या ॥११॥

दण्डस्य धारणम्, अग्निपरिचरणमग्नेः सायं प्रातः परिचरणम्

(१) ब्रह्मचर्यैकरणपक्षे ऽयमुपनयनाग्निस्त्रिरात्रं धार्यः । ततः प्रत्यहं लौकिकाग्नौ होमः । उपनयनाग्निरेव विवाहाग्निरिति पक्षे तु उपनयनाग्नावेव प्रत्यहं ब्रह्मचारिणा होमः कर्तव्यः ।

अग्निकार्यं प्रतिदिनं सायं प्रातर्ब्रह्मचारिणा कर्तव्यम् । असंभवे सायमेव वेत्यापस्तम्बादयः । तत्र सायमग्निकार्यं करिष्ये प्रातरग्निकार्यं करिष्ये इति सङ्कल्पः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिसमूहनपूर्वकं समिदाधानरूपमनुष्ठानम्, गुरोः आचार्यस्य शुश्रूषा सेवा, भिक्षार्थं चर्या भिक्षाचर्या भिक्षावृत्तिस्तां च सर्वदा कुर्यात् ब्रह्मचारी इति शेषः ॥११॥

मधुमासᳪमज्जनोपर्यासनस्त्रीगमनाऽनृताऽदत्ताऽऽदानानि वर्जयेत् ॥१२॥

मधु क्षौद्रं, मांसं प्रसिद्धम्, मज्जनं ह्रदे गङ्गादिनद्यां चाप्लवनम्, उपरि पर्यङ्कादौ आसनमुपवेशनम्,स्त्रीणाम्मध्येऽवस्थितिः, अनृतमतथ्यभाषणम्, अदत्तानां परद्रव्याणाम् आदानम् ग्रहणम्, ब्रह्मचारी पूर्वोक्तानि प्रतिषिध्यमानानि सर्वाणि वर्जयेत् । स्नानं तु उद्धृतोदकेन कुर्यादित्यर्थः ॥१२॥

अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् ॥१३॥

अष्टाभिरधिकानि चत्वारिंशद्वर्षाणि वेदग्रहणाय ब्रह्मचर्यं चरेदनुतिष्ठेत् । अर्थात् चतुर्णां वेदानां स्वीकाराय एकमेव ब्रह्मचर्यव्रतं कुर्यात् ॥१३॥

पूर्वोक्तनियमाशक्तावनुकल्पमाह—

द्वादश द्वादश वा प्रतिवेदम् ॥१४॥

अथवा प्रतिवेदम् ऋग्यजुःसामाऽथर्वाख्येषु चतुर्षु वेदेषु द्वादश द्वादश वर्षाणि ब्रह्मचर्यं चरेत् ॥१४॥

यावद्[1] ग्रहणं वा ॥१५॥

अथवा आचार्याद् यावद् वेदयोर्वेदानां वा ग्रन्थतोऽर्थतश्च ग्रहणं स्वीकरणं भवेत् तावद्वर्षाणि ब्रह्मचर्यं चरेदिति शेषः ॥१५॥

वासांसि शाणक्षौमाविकानि ॥१६॥

त्रयाणां ब्रह्मक्षत्रियवैश्यानां ब्रह्मचारिणाम् यथाक्रमं शाण-क्षौमाऽऽविकानि [2]वासांसि वस्त्राणि परिधानाय भवन्ति । शाणं शणमयम्,क्षुमा

(१) "एकं वेदं समाप्य समावर्तनं कृत्वा पुनर्द्वितीयवेदग्रहणं यावत् ब्रह्मचर्यं चरित्वा स्नात्वैवं वेदान्तरेऽपि ब्रह्मचर्यं चरेदि"ति गदाधरभाष्ये ।

(२) गौतमः—सर्वेषां कार्पासं वाऽविकृतम् ॥

वसिष्ठः—शुक्लमहतं वासो ब्राह्मणस्य, माञ्जिष्ठं क्षौमं क्षत्रियस्य, पीतं कौशेयं वैश्यस्येति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतसी तद्विकारमयं क्षौमम्, आविकम् मेषरोमनिर्मितमित्यर्थः ॥१६॥

ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य ॥१७॥

एणी हरिणी तस्या इदमैणेयम् चर्म उत्तरीयं [1]ब्राह्मणस्य ब्रह्मचारिणो भवति ॥१७॥

रौरवꣳ० राजन्यस्य ॥१८॥

रुरुर्मृगविशेषः चित्रत्वेन प्रसिद्धः तस्येदं चर्म रौरवं राजन्यस्य द्वितीयवर्णस्योत्तरीयं भवति ॥१८॥

आजं गव्यं वा वैश्यस्य ॥१९॥

अजस्य इदम् आजम्, गोः इदं गव्यं वा अजिनम् वैश्यस्य उत्तरीयं भवति । सूत्रे 'वा' पददर्शनादियं वैकल्पिकी व्यवस्था बोध्या ॥१९॥

सर्वेषां वा गव्यमसति प्रधानत्वात् ॥२०॥

अथवा सर्वेषां ब्राह्मणक्षत्रियविशां गव्यमजिनं स्यात् उत्तरीयत्वेन । कदा ? प्रधाने असति अविद्यमाने सति, कुतः ? प्रधानत्वात् गव्यस्य पुरुषसम्बन्धितया मुख्यत्वात् । 'तेऽवच्छाय पुरुषं गव्येतां त्वचमदधुः' इति श्रुतेः ॥२०॥

मौञ्जी रशना ब्राह्मणस्य ॥२१॥

मुञ्जः शरस्तन्मयी मौञ्जी रशना-मेखला भवति, कस्य ब्राह्मणस्य ब्रह्मचारिणः ॥२१॥

धनुर्ज्या राजन्यस्य ॥२२॥

धनुषश्चापस्य ज्या गुणः धनुर्ज्या राजन्यस्य क्षत्रियस्य ब्रह्मचारिणः । "सामर्थ्याच्च स्नायुमयी वेणुमयी वा । इयं च त्रिवृन्न कार्या, ज्यात्वविनाशप्रसङ्गात्' इति गदाधरः ॥२२॥

मौर्वी वैश्यस्य ॥२३॥

---

(१) प्रयोगरत्ने—"तत्र्यङ्गुलं बहिर्लोम यद्वा स्याच्चतुरङ्गुलम् ।
एकखण्डं त्रिखण्डं वा धार्यं स्यादुपवीतवत्" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुरुस्तृणविशेषः तन्मयी मौर्वी मेखला वैश्यस्य-विशः ब्रह्मचारिणो भवति ॥२३॥

मुञ्जाऽभावे कुशाश्मन्तक-बल्वजानाम् ॥२४॥

मुञ्जाद्यभावे यथासंख्यं मेखला भवन्ति । तथाहि—मुञ्जमय्या मेखलाया अभावे ब्राह्मणस्य कुशमयी मेखला, अश्मन्तकस्तृणविशेषस्तन्मयी मेखला क्षत्रियस्य, मौर्व्या अभावे वैश्यस्य बाल्वजी रशना भवति ॥२४॥

पालाशो ब्राह्मणस्य दण्डः ॥२५॥

पालाशः पलाशवृक्षोत्थो ब्राह्मणस्य ब्रह्मचारिणो दण्डो भवति ॥२५॥

वैल्वो राजन्यस्य ॥२६॥

वैल्वो विल्ववृक्षोद्भवो दण्डो राजन्यस्य-क्षत्रियस्य ब्रह्मचारिणो भवति ॥२६॥

औदुम्बरो वैश्यस्य ॥२७॥

वैश्यस्य ब्रह्मचारिण औदुम्बर उदुम्बरवृक्षोत्पन्नो दण्डो भवति ॥२७॥

[केशसम्मितो ब्राह्मणस्य, ललाटसम्मितः क्षत्रियस्य, घ्राणसमितो वैश्यस्य] सर्वे वा सर्वेषाम् ॥२८॥

स च दण्डः केशसम्मितः पादादिकेशमूलावधिप्रमाणको ब्राह्मणस्य, क्षत्रियस्य ललाटावधिप्रमाणकः भ्रूमध्यदेशावधिरिति यावत् । वैश्यस्य ब्रह्मचारिणो दण्डः पादादिरोष्ठावधिप्रमाणकः । अथ वा सर्वेषां ब्राह्मणक्षत्रियविशां ब्रह्मचारिणो दण्डा अनियमेन पालाश-वैल्वौदुम्बरा भवन्तीति शेषः । न चाऽत्र जातिनियमः ॥२८॥

आचार्येणाऽऽहूत उत्थाय प्रतिशृणुयात् ॥२९॥

आचार्येण-आचारं ग्राहयित्रा (उपनयनकर्त्रेति यावत्) आहूतः आकारितो ब्रह्मचारी उत्थाय ऊर्ध्वो भूत्वा प्रतिशृणुयात् प्रतिवचनं दद्यात् ॥२९॥

शयानं चेदासीनऽ आसीनं चेत्तिष्ठंस्तिष्ठन्तं चेदभिक्रामन् अभिक्रामन्तं चेदभिधावन् ॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चेद्यदि गुरुः (आचार्यः) शयानं स्वपन्तं ब्रह्मचारिणमाह्वयति तदा ब्रह्मचारी आसीन उपविष्टः सन् प्रतिवचनं दद्यात् । आसीनमुपविष्टं ब्रह्मचारिणमाह्वयति चेत्तदा स तिष्ठन् उत्थितः । चेद्यदि तिष्ठन्तमुत्थितमाह्वयति तदा अभिक्रामन् गुरोरभिमुखं गच्छन् प्रतिशृणुयात् । अभिक्रामन्तमभिमुखमागच्छन्तं ब्रह्मचारिणम् आह्वयति चेदाचार्यस्तदा स ब्रह्मचारी अभिधावन् सन् प्रतिवचनं दद्यादिति ॥३०॥

अस्यार्थवादमाह—

सऽ एवं वर्त्तमानोऽमुत्राद्य वसत्यमुत्राद्य वसतीति तस्य स्नातकस्य कीर्त्तिर्भवति ॥३१॥

स ब्रह्मचारी एवं पूर्वोक्तेन मार्गेण ब्रह्मचर्ये कर्मणि वर्तमानः स्थितः । अमुत्र स्वर्गे अद्य इहैव सन् वसति तिष्ठति । अत्र द्विरुक्तिः स्तुत्यर्था । तस्य ब्रह्मचारिणः स्नातकस्य कृतसमावर्तनकर्मणः पुरुषस्य कीर्त्तिर्यशो भवति ॥३१॥

स्नातकलक्षणमाह—

त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति ॥३२॥

त्रयः त्रिविधाः स्नातका भवन्ति । तत्रैको विद्यास्नातकोऽपरो व्रतस्नातकस्तृतीयो विद्याव्रतस्नातकः ॥३२॥

समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः ॥३३॥

पाठतोऽर्थतश्च नैजं मन्त्रब्राह्मणोभयात्मकं समाप्य द्वादशवार्षिकरूपं ब्रह्मचर्यव्रतमसमाप्य यः समावर्त्तते स्नाति स विद्यास्नातकः ॥३३॥

समाप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातकः॥३४॥

व्रतं ब्रह्मचर्यं द्वादशवार्षिकरूपं समाप्य, मन्त्रब्राह्मणोभयात्मकं स्वशाखीयं वेदमसमाप्य यः समावर्तते स्नाति स व्रतस्नातकः ॥३४॥

उभयꣳ समाप्य यः समावर्तते स विद्याव्रतस्नातकः॥३५॥

उभयं पूर्वोक्तलक्षणलक्षितं वेदं ब्रह्मचर्यं च समाप्य यः समावर्त्तते स्नाति स विद्याव्रतस्नातक उच्यते ॥३५॥

880

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपनयनकालस्य चरमावधिमाह—

आषोडशाद् ब्राह्मणस्याऽनतीतः कालो भवति ॥३६॥

आ द्वाविंशाद्राजन्यस्य ॥३७॥

आ चतुर्विंशाद्वैश्यस्य ॥३८॥

षोडश वर्षाणि अभिव्याप्य इति आषोडशम् तस्मादाषोडशाद्वर्षात्प्राक् ब्राह्मणस्य विप्रस्य अनतीतः न अतीत अनतीत उपनयनस्य कालः समयो भवति।

अर्वाक् द्वाविंशतिवर्षात् क्षत्रियस्य-राजन्यस्याऽनतीत एव उपनयनकालो भवति।

चतुर्विंशाद्वर्षात् प्राक् वैश्यस्योपनयनकालः अनतीतो भवति॥३६-३८॥

अत ऊर्ध्वं पतितसावित्रीका भवन्ति ॥३९॥

अतः पञ्चदशात् एकविंशात् त्रयोविंशाद्वर्षादूर्ध्वमनुपनीता ब्राह्मण-क्षत्रिय-वैश्याः यथाक्रमं पतितसावित्रीकाः पतिताः अधिकाराभावान्नि-वृत्ता सावित्री येभ्यः ते पतितसावित्रीकाः भवन्ति सम्पद्यन्ते ॥३९॥

नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः॥४०॥

एनान् पतितसावित्रीकान् नोपनयेयुः उपनयनसंस्कारेण नैव संस्कुर्युः। नाध्यापयेयुः वेदं न पाठयेयुः। अपि च न याजयेयुः न यज्ञं कारयेयुः। एभिः उक्तदोषग्रस्तैः सह न व्यवहरेयुः। स्नानासनशयनभोजनविवाहा-दिभिः कर्मभिर्न व्यवहारं कुर्युः॥४०॥

कालातिक्रमे प्रायश्चित्तमाह—

कालातिक्रमे नियतवत् ॥४१॥

गर्भाधानादीनां नियतकालकर्तव्यानां कर्मणां नियतकालस्यातिक्रमे लङ्घने सति प्रायश्चित्तं नियतवत् नित्यवत् नित्ये श्रौतकल्पे नैमित्तिकेषु यद्विहितं तत् अनादिष्टं प्रायश्चित्तं सर्वत्र भवति। कृतप्रायश्चित्तस्य अतिक्रान्तकालेऽपि संस्कारकर्मण्यधिकारः सम्पद्यत एवेति। वस्तुतस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालातिक्रम इत्युपलक्षणम्, अन्येष्वपि कर्मसु यत्र प्रायश्चित्तं नोपदिष्टं तत्र सर्वत्र इदमनादिष्टमेव[1] प्रायश्चित्तं कर्तव्यम् ॥४१॥

इदानीं पतितसावित्रीकविषये प्रतिप्रसवमाह—

त्रिपुरुषं [2]पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनं च ॥४२॥

त्रिपुरुषान् यावत् पतितसावित्रीकाः पितृ-पुत्र-पौत्राः तेषामपत्ये चतुर्थे पुरुषेऽसंस्कारः उपनयनसंस्कारो न स्यात्, अध्यापनं च न भवति॥४२॥

तेषाᳪं संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या

---

(१) अनादिष्टप्रायश्चित्तप्रयोगो यथा—स्थण्डिले पञ्चभूसंस्कारान् कृत्वाऽग्निं संस्थाप्याज्यमधिश्रित्य स्रुवं संमृज्याज्यमुद्वास्योत्पूयावेक्ष्य अग्नावेकां समिधमाधायोपविश्य दक्षिणं जान्वाच्य ॐ भूः स्वाहा इदमग्नये नमम, ॐ भुवः स्वाहा इदं वायवे नमम, ॐ स्वः स्वाहा इदं सूर्याय नमम ॐ त्वं नो अग्ने० स्मत्स्वाहा इदमग्नीवरुणाभ्यां नमम, ॐ स त्वन्नो अग्ने० एधि स्वाहा इदमग्नीव०, ॐ अयाश्चाग्ने० भेषजᳪं स्वाहा इदमग्नयेऽयसे न०, ॐ ये ते शतं व० इदं वरुणाय स०, ॐ उदुत्तमं व० स्याम स्वाहा इदं वरुणाय० इति । इदं नवाहुतिहोमात्मकं कर्म यत्र यत्र प्रायश्चित्तानादेशः कर्मणां नियतकालातिक्रमो वा तत्र तत्र कर्तव्यम् ।

(२) व्रात्याश्चतुर्विधाः हीनाचाराः, पापाध्यारोपेण ज्ञातिबहिष्कृताः, युवावस्थायामेव ज्ञातिबहिष्कृताः, अपगतप्रजननेन्द्रियसामर्थ्या वृद्धव्रात्याः । एतैः शुद्ध्यर्थं क्रियमाणो यज्ञो व्रात्यस्तोमोऽपि चतुर्विधः । एषु द्वितीय उक्थ्यसंस्थः, इतरेऽग्निष्टोमसंस्था भवन्ति । अयं च गणयज्ञः, अतोऽयं यज्ञो नैकेन व्रात्येन कर्तुं शक्यते । अयं व्रात्यस्तोमो लौकिकेऽग्नौ भवतीति कर्काचार्याः । एतत्सर्वं कात्यायनश्रौतसूत्रे अ० २२ कं० ४ उक्तम् । अस्य यज्ञस्य पाशुकत्वाद्गणयज्ञत्वाच्च नास्मिन् युगेऽनुष्ठानम् । अतः स्मृत्युक्तेन प्रत्याम्नायान्तरेणैव शुद्धिः संपाद्या । प्रत्याम्नायोऽपि गोनिष्क्रय एव प्रत्याम्नायान्तरापेक्षया सुकरः । तत्र ब्राह्मणस्य द्वादशाब्दं, क्षत्रियस्य नवाब्दं, वैश्यस्य षडब्दं प्रायश्चितम् । एषु क्रमेण ३६०, २७०, १८० इति गावस्तन्निष्क्रया वा दातव्या भवन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवन्ति॰ इति वचनात् ॥४३॥

तेषां पितृ-पुत्र-पौत्राणां पतितसावित्रीकाणां मध्ये यः संस्कारेप्सुः आत्मानं संस्कारयितुकामः स व्रात्यस्तोमेन यज्ञविशेषेण इष्ट्वा व्रात्यस्तोमं सम्पाद्य व्यवहार्यो भवतीत्यर्थः ।" तस्मात्काममिच्छया व्रात्यस्तोमेनेष्ट्वा अधीयीरन् वेदं पठेयुः व्यवहार्याः लोके शिष्टानामध्यापनादिषु कर्मसु योग्या भवन्तीति" श्रुतेर्वचनात् ॥४३॥

इति द्वितीयस्य पञ्चमी कण्डिका ॥५॥

अथ समावर्तनम्—

वेदꣳ समाप्य स्नायात् ॥१॥

आदौ वेदारम्भं कृत्वा सर्वं वेदमर्थतो ग्रन्थतश्चाध्ययनेन समाप्य ततो ब्रह्मचारी स्नायात् ब्रह्मचर्यान्निवृत्तो भवेत् । गुरुणाऽनुज्ञातो गार्हस्थ्यं चिकीर्षेदित्यर्थः । स्नानं समावर्तनम् । तच्च ब्रह्मचर्यनिवर्तकं कर्म । आरम्भमन्तरा समाप्तेरसंभवात् आरम्भ उपलक्ष्यते । वेदारम्भ-समावर्तन-योर्होमः सूत्रकारेण लाघवात् उपाकर्मण्युपदिष्टस्तत एव ज्ञातव्यः ॥१॥

ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकम् ॥२॥

अथवा अष्टाचत्वारिंशद्वर्षसाध्यं ब्रह्मचर्यं समाप्य गुर्वनुज्ञातो गार्हस्थ्यं चिकीर्षेत् । प्रतिवेदं द्वादशवर्षं ब्रह्मचर्यमिति पक्षमाश्रित्य वेदच-तुष्टयाध्ययनेऽष्टाचत्वारिंशद्वर्षाणि ब्रह्मचर्यानुष्ठानम् ॥२॥

---

(१) कलौ उपनयनयोग्यक्षत्रियवैश्ययोरभावात्र तयोरुपनयनमिति नागोजि-भट्टप्रभृतयो दाक्षिणात्याः । सर्वेषु जनपदेषु अयं ब्राह्मणः अयं क्षत्रियः अयं वैश्य इति अविगीतव्यवहारस्य जातिनिर्णायकस्य विद्यमानत्वात् स्वस्वजात्युचितधर्मा-चरणरहितानामपि तत्तज्जात्युचितधर्माचरणशीलैः सह भोजनादि व्यवहारस्य दर्शनात् वणिज इत्याद्यभिचरिताविगीतव्यवहाराच्च अगरवालाः सर्वेऽपि तृतीयवर्णाः प्रायेणोपनयनादि संस्कारभाजः शिष्टैः परिगृहीता भवन्ति, इति पञ्चगौडाः पञ्चद्रा-विडाश्च । अतः सर्वेऽपि प्रायश्चित्ते कृते उपनयनार्हा भवन्ति । तत्र त्रिपुरुषं पतितसावित्रीका एवोपनयनार्हा न तु दशविंशतिपुरुषपर्यन्तमस्मर्यमाणोपन-यनाभावा अपीति केचन दाक्षिणात्याः । बहुकालतो ऽस्मर्यमाणोपनयनानामपि क्षत्रियवैश्यानाममुपनयनार्हत्वं प्रायश्चित्तेन निष्कण्टकमिति सर्वे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावद्ग्रहणं वा ॥३॥

अथवा यावतां वेदानां ग्रहणमध्ययनं चिकीर्षितं भवेत्तावद् ब्रह्मचर्यमनुतिष्ठेत् । एकवेदाध्ययने द्वादश वर्षाणि, वेदद्वयाध्ययने चतुर्विंशतिवर्षाणि, वेदत्रयाध्ययने षट्त्रिंशद्वर्षाणि, वेदचतुष्टयाध्ययनेऽष्टाचत्वारिंशद्वर्षाणीति ॥३॥

द्वादशकेऽप्येके ॥४॥

एके आचार्या द्वादशवार्षिके व्रते समाप्तेऽपि समावर्तनमिच्छन्ति ॥४॥

गुरुणाऽनुज्ञातः ॥५॥

समावर्तनं कुर्यादिति शेषः । गुर्वनुज्ञा च समावर्तनकर्माङ्गं न तु समावर्तनकालान्तरमेतत् ॥५॥

वेदशब्देन किमुच्यत इत्यत आह—

विधिर्विधेयस्तर्कश्च वेदः ॥६॥ ब्रा. मं. मीमां॰

विधत्ते इति विधिर्ब्राह्मणभागः, विधीयते विनियुज्यते ब्राह्मणवाक्येन इति विधेयो मन्त्रभागः । तर्क्यते सन्दिग्धोऽर्थोऽनेनेति तर्कोऽर्थवादः, मीमांसेत्यन्ये, एते वेदशब्दवाच्याः । ब्राह्मणं मन्त्रं मीमांसां चाधीत्य स्नायादित्यर्थः ॥६॥

षडङ्गमेके ॥७॥

एके आचार्याः षडङ्गोपेतं वेदमधीत्य समावर्तनं कुर्यादितीच्छन्ति । शिक्षा सूत्रं व्याकरणं निरुक्तं ज्योतिषं छन्द इति षडङ्गानि ॥७॥

न कल्पमात्रे ॥८॥ ग्रन्थमात्रे

कल्पशब्देन ग्रन्थमात्रमभिधीयते । कल्पमात्रे ग्रन्थमात्रे मन्त्रभागे ब्राह्मणभागे वाऽधीते न स्नायात्, किन्तु अर्थतो ग्रन्थतश्चाधीत्यैव स्नायात् ॥८॥

कामं तु याज्ञिकस्य ॥ ९ ॥

यज्ञं वेदेति याज्ञिकः, तस्य काममिच्छया पाठमात्राध्यायिनोऽपि समावर्तनं भवति । तेन मन्त्रब्राह्मणात्मकं वेदं सार्थमधीत्य स्नायादित्येकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षः। साङ्गं वेदं सार्थमधीत्य स्नायादिति द्वितीयः पक्षः। ग्रन्थमात्रमधीत्य यज्ञविद्यां चाभ्यस्य स्नायादिति तृतीयः पक्षः ॥ ६ ॥

समावर्तनविधिमाह—

उपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात् स्थित्वाऽष्टानामुदकुम्भानां-"ये[1] ऽप्स्वन्तरग्नयः प्रविष्टा गोह्य ऽउपगोह्यो मयूखो मनोहाऽस्खलो विरुजस्तनूदूपुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि" इत्येकस्मादपो गृहीत्वा तेनाभिषिञ्चते—"तेन[2] मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय" इति ॥१०॥

गुरुमुपसङ्गृह्य प्रणम्य वेदाहुतिहोमं कृत्वा अग्ने सुश्रव इत्यादिनोपनयनोक्तप्रकारेणाग्नौ समिदाधानं कृत्वा परिश्रितस्य वस्त्रादिना वेष्टितस्य समावर्तनाग्नेरुत्तरदिशि उत्तरोत्तरक्रमेण स्थापितानामष्टानामुदकुम्भानां पुरस्तात् पूर्वस्यां दिशि आस्तीर्णेषु प्रागग्रेषु कुशेषु उदङ्मुखो ब्रह्मचारी स्थित्वा ऊर्ध्वीभूय येऽप्स्वन्तरिति मन्त्रेण प्रथमादुदकुम्भादपो गृहीत्वा तेनेति मन्त्रेणाऽऽत्मानं स्वयमभिषिञ्चेत् ॥१०॥

"येन[3] श्रियमकृणुतां येनावमृशताꣳ सुराम् । येनाक्ष्या-

१—येऽप्स्वन्तरित्यस्य प्रजापतिरृ० अग्निर्दे० गायत्री छं० जलादाने वि०। हे अग्नयः ! ये भवन्तोऽप्स्वन्तः प्रविष्टा जलमध्ये च स्थिताः तत्र गोह्यः, उपगोह्यः, मयूखः, मनोहा, अस्खलः, विरुजः, तनूदूपुः, इन्द्रियहा इत्येते येऽमङ्गलाः सन्ति तान् विजहामि निरस्यामि, यो रोचनः सुमङ्गलः तमिहाभिषेककर्मणि गृह्णामि। वृद्धमनुः—

"गोह्याद्योऽग्नयो ह्यष्टावमेध्यास्त्वशुभावहाः ।
शुभकृद्रोचनस्त्वेको मेध्यो दीप्तिकरः परः ॥"

२—तेन मामिति द्वयोः प्रजापतिरृ० यजुश्छं० आपो दे० अभिषेके वि०। तेन रोचनाधिष्ठितेन मङ्गलजलेनाहं मामात्मानमभिषिञ्चामि, श्रियै, यशसे, ब्रह्मणे वेदज्ञानार्थं ब्रह्मवर्चसाय।

३—हे अश्विनौ ! येन जलेन भवन्तौ सुराणां श्रियं सम्पदमकृणुताम् कुरुताम्, येन च सुराम् अमृतम् अवमृशतां युवां प्रापतुः, येन अक्ष्यौ उपमन्योरक्षिणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वभ्यषिञ्चतां यद्वां तदश्विना यशः” इति ॥११॥

येन श्रियमिति द्वितीयवारमभिषिञ्चेत् । अष्टभ्य उदकुम्भेभ्योऽपां ग्रहणं तु येऽप्स्वन्तरित्येकेनैव मन्त्रेण मन्त्रावृत्त्या कर्तव्यम् ॥११॥

आपो हि ष्ठेति च प्रत्यृचम् ॥१२॥

आपो हि ष्ठेति तृतीयम्, यो व इति चतुर्थम्, तस्मा इति पञ्चमवारमभिषिञ्चेत् ॥१२॥

त्रिभिस्तूष्णीमितरैः ॥१३॥

तत इतरैः षष्ठसप्तमाष्टमैः कलशैस्तूष्णीममन्त्रकमभिषेकः ॥१३॥

उदुत्तममिति मेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायाऽऽदित्यमुपतिष्ठते—“उद्य[1]न्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय” इति ॥१४॥

अभ्यषिञ्चताम् अभिषिक्तवन्तौ, यद् जलं वां युवयोः तद प्रसिद्धं यशः, तेन मामभिषिञ्चामि ।

१—उद्यन्निति प्रजापतिऋ॑० सविता दे० शक्वरी छं० उपस्थाने वि० ।
हे सूर्य ! यथा इन्द्रः प्रातर्यावभिः प्रातःसवने गमनशीलैर्मरुद्भिर्देवविशेषैः सेवितस्तिष्ठति; तथा भवान् प्रातः उद्यन् उदयं गच्छन् यावभिर्गमनशीलैऋ॑ष्यादिसप्तगणैः सेवितः अस्थाद तिष्ठति । किंभूतो भवान् भ्राजभृष्णुः भ्राजं बिभर्ति इति भ्राजभृष्णुः । प्रातःसवने दश गाः सनोति ददातीति दशनिरसि, अतो मामपि दशसनिं दशगोदक्षिणादातारं कुरु । हे आविदन् ! आ समन्ताद् वेत्तीति आविदन् सर्वज्ञ ! मा मां गमय प्रापय सर्वज्ञ त्वम् । एवं दिवा यावभिरित्यादावपि बोध्यम् ।

इदं द्वादशवार्षिकादिव्रतान्ते समावर्तनपक्षे । प्रयोजनाभावेऽपि स्पर्शसंस्कारमात्रं क्षुरेण कार्यमेवेत्यपरः पक्षः इति पक्षद्वयं मीताक्षराटीकायां प्रदर्शितमित्यधिकं तत एवावगन्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दधि तिलान्वो प्राश्य जटालोमनखानि सꣳहृत्यौदुम्बरेण दन्तान्धावेत—"अन्ना[1]द्याय व्यूहध्वꣳ सोमो राजाऽयमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च" इति ॥१५॥

ततः स्नातको दधितिलयोरन्यतरं भक्षयित्वाऽऽचम्य द्वादशवार्षिकादिव्रतपक्षे जटाश्च लोमानि च नखानि च संहृत्य वापयित्वा, सद्यः पक्षे क्षुरस्पर्शरूपमात्रं संस्कारं कृत्वा उदुम्बरकाष्ठेन दन्तप्रक्षालनं कुर्यात् अन्नाद्यायेति मन्त्रेण ॥१५॥

उत्साद्य पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते—"प्राणा[2]पानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पय" इति ॥१६॥

उत्साद्य सुगन्धिद्रव्योद्वर्त्तनेन शरीरस्य मलमपसार्य पुनः स्नात्वा मलापकर्षणस्नानोत्तरं पुनः स्नानं कृत्वा अनुलेपनं चन्दनं नासिकयोर्मुखस्य मन्त्रेणोपगृह्णीते मुखं नासिके च पाणिभ्यामनुलिम्पतीत्यर्थः ॥१६॥

"पित[3]रः शुन्धध्वम्" इति पाण्योरवनेजनं दक्षिणानिषिच्यानुलिप्य जपेत्—"सुच[4]क्षा ऽअहमक्षीभ्यां भूयासꣳ

१—अन्नाद्यायेत्यस्य अथर्वण ऋ० अनुष्टुप् छं०लिङ्गोक्ता दे०दन्तधावने वि० । हे दन्ताः ! यूयमन्नाद्यायान्नभक्षणाय व्यूहध्वम् एकपङ्क्तिनिविष्टा भवत । यतोऽयं राजा सोमश्चन्द्रः काष्ठरूपेणागमत् आगतः । स एव मे मुखं प्रमार्क्ष्यते शोधयिष्यति यशसा, भगेन भाग्येन च ।

२—प्राणापानावित्यस्य प्रजापतिर्ऋ०यजुः छं०प्राणापानौ दे०चन्दनानुलेपनेवि० भो अनुलेपनाधिदेवते ! मे प्राणापानौ वायू गन्धेन तर्पय, चक्षुर्मे रूपेण तर्पय श्रोत्रं सच्छब्दश्रवणेन तर्पय ।

३—पितर इत्यस्य प्रजापतिर्ऋ० यजुश्छं० पितरो दे० तर्पणे वि० । हे पितरः ! पाणिप्रक्षालनजलेन यूयं शुद्धा भवत ।

४—सुचक्षा अहमित्यस्य प्रजापतिर्ऋ० सविता दे० आशीः प्रार्थने वि० । हे सवितः ! अहमक्षीभ्यां कृत्वा साधु चष्टे इति सुचक्षाः सुदर्शनो भूयासम् । मुखेन सुवर्चाः सुतेजाः भूयासम् । कर्णाभ्यां सुश्रवणो भूयासम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुवर्चा मुखेन । सुश्रुत्कर्णाभ्यां भूयासम्" इति ॥१७॥

ततः प्राचीनावीती दक्षिणामुखः स्नातकः पितर इति मन्त्रेण चन्दनलिप्तयोर्हस्तयोः प्रक्षालनजलं दक्षिणस्यां दिशि पितृतीर्थेन निक्षिप्य यज्ञोपवीती प्राङ्मुखो भूत्वोदकं स्पृष्ट्वा चन्दनेनात्मानमुपलिप्य सुचक्षा इति मन्त्रं पठेत् । जीवत्पितृकस्यापीदं तर्पणम् । प्राचीनावीतिस्थानेऽर्धापसव्यतेति विशेषः ॥१७॥

अहतं वासो धौतं वाऽमौत्रेणाऽऽच्छादयीत—"परि[1]धास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये" इति ॥१८॥

अहतं नवीनं सदशं वासः अथवा अमौत्रेण अरजकेन प्रक्षालितं वासः परिदधीत ॥१८॥

अथोत्तरी[2]यम्—"यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च माऽविदद्यशो मा प्रतिपद्यताम्" इति ॥१९॥

परिधत्ते इति शेषः ॥ १९ ॥

एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत ॥२०॥

चेद्यदि एकं वस्त्रं भवति द्वितीयं न भवति, तदा पूर्वस्य परिधानीयस्यैव वस्त्रस्य उत्तरभागेन प्रच्छादयीत उत्तरीयं कुर्यात् ॥२०॥

सुमनसः प्रतिगृह्णाति—"या ऽ[3]आहरज्जमदग्निः श्रद्धायै

१—परिधास्या इति द्वयोरथर्वण ऋ० यजुपूर्छं, ०लिङ्गोक्ता दे० वासः परिधाने वि० हे वस्त्र ! अहं यत् त्वां परिधास्यै परिदधे तत् यशो धारयामि दीर्घायुत्वाय । अहं जरती अष्टिः तनूः यस्य तादृशो भवामि । तथा पुरूची भवामि । पुरुभिर्बहुभिः पुत्रधनादिभिः उचः संयोगोऽस्येति पुरूची । किं भूतं वासः ? रायस्पोषं धनपुष्टिकरम् । किं चैतत्संबन्धेनाहं शतं शरदो जीवामि ।

२—हे वासो देवते ? द्यावांपृथिवी यशसा युक्तौ मा मामविदत् प्राप्नुताम्, तथा इन्द्रो बृहस्पतिरपि यशसा युक्तौ मा अविदत्, तथा भगः सूर्योऽपि यशसा मा अविदत् । तबैतैः सम्पादितं यशो मा माम् प्रतिपद्यताम्, मयि सर्वदा तिष्ठत्वित्यर्थः ?

३—वि०—या आहरदिति द्वयोर्भरद्वाजोऽनुष्टुप् सुमनसो देवता क्रमेण पुष्पादानबन्धनयोर्विनियोगः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेधायै कामायेन्द्रियाय। ताऽ अहं प्रतिगृह्णामि यशसा च भगेन च" इति ॥२१॥

सुमनसः पुष्पाणि आचार्येण दत्तानि स्वीकरोति ॥२१॥

अथावबध्नीते "यद्य[1]शोऽप्सरसामिन्द्रश्चकार विपुलं पृथु। तेन सङ्ग्रथिताः सुमनस ऽआबध्नामि यशो मयि" इति ॥२२॥

गृहीतानि पुष्पाणि शिरसि बध्नाति ॥२२॥

उष्णीषेण शिरो वेष्टयते—"युवा सुवासाऽ[2] इति॥२३॥ "[3]अलङ्करणमसि भूयोऽलङ्करणं भूयात्" इति कर्णावेष्टकौ ॥२४॥

दक्षिणोत्तरयोः कर्णयोर्मन्त्रावृत्त्या कुण्डले परिधत्ते ॥२४॥

वृत्रस्येत्यङ्क्तेऽक्षिणी[4] ॥२५॥

याः सुमनसः पुष्पाणि जमदग्निः प्रजापतिः श्रद्धाद्यर्थम् आहरत् आददे। ताः सुमनसो यशसा कीर्त्या भगेन ऐश्वर्येण च सहाहं प्रतिगृह्णामि श्रद्धाद्यर्थम्। तत्र श्रद्धा धर्मादरः। मेधा धारणाशक्तिः। कामोऽभिलाषपूर्तिः। इन्द्रियन्तत्पाटवम्।

१—हे सुमनसः इन्द्रो देवः अप्सरसाम् उर्वश्यादीनाङ्कुसुमावबन्धनेन यद्यशः सर्वजनप्रियत्वं चकार कृतवान्,तेन यशसा सङ्ग्रथिताः युष्मान् बध्नामि चूडायाम्। किंभूतं यशः। विपुलं विशालम्। पृथु सन्ततदीर्घम्। तद्यशो मयि विषये तिष्ठ-त्विति शेषः।

२—युवा सुवासा इति=व्याख्यातश्चायं मेखलाबन्धनप्रसङ्गे ॥

३—वि०—अलङ्करणमिति प्रजापतिर्यजुरग्निः कर्णालङ्करणे वि०।

हे कुण्डलदेवते त्वम् अलङ्करणम् अलङ्कारशोभाऽसि। अतस्त्वयाऽलंकृतस्य मम भूयो बहुवारमलङ्करणम् भूयादस्तु।

४—वि०-प्रजापतिर्गायत्री अञ्जनेतव करणे०

बृहस्पति—स्पष्टो मन्त्रार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृत्रस्येत्यर्द्धर्चेन (मा० सं० ४।३) दक्षिणवामे नेत्रे मन्त्रावृत्त्या सौवीराञ्जनेन संस्करोति । वामदक्षिणे इति गदाधरमतम् ॥२५॥

"रोचिष्णुरसि"[1] इत्यात्मानमादर्शे प्रेक्षते ॥२६॥

आत्मानं मुखप्रभृति शरीरम् ॥२६॥

छत्रं प्रतिगृह्णाति "[2]बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो माऽन्तर्धेहि" इति ॥२७॥

गुरुणा दत्तं छत्रमादत्ते ॥२७॥

प्रतिष्ठे[3] स्थो विश्वतो मा पातम्" इत्युपानहौ प्रतिमुञ्चते ॥२८॥

द्विवचनान्तत्वात्परिधातुं शक्यत्वाच्च युगपत्पादयोः परिदधीत ॥२८॥

"विश्वाभ्यो[4] मा नाष्ट्राभ्यस्परि पाहि सर्वतः" इति वैणवं दण्डमादत्ते ॥२९॥

स्नातक इति शेषः ॥२९॥

दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः ॥३०॥

१—वि०-सूर्यो यजुरादर्शो मुखनिरीक्षणे०

मन्त्रार्थः = रोचिष्णुः प्रकाशकः ।

२—गौतमो गायत्री छत्रन्तद्ग्रहणे०

हे छत्र त्वं बृहस्पतेः पितामहस्य छदिः घर्मादि-निवर्तकोऽसि प्रथमम्, अतः पाप्मनो निषिद्धाचरणान्माम् अन्तर्द्धेहि अन्तर्हितं कुरु । तेजसश्च सकाशान्माऽन्तर्द्धेहि मा व्यवहितं कुरु, तद्युक्तं कुर्वित्यर्थः ।

३ प्रजापतिर्यजुर्धर्म उपानद्ग्रहणे०

हे उपानहौ तद्देवते युवाम्प्रतिष्ठे स्थितिहेतू स्थः भवथः । अतो विश्वतः सर्वस्माव परिभवान्मां मा पातम् रक्षतम् ।

४ याज्ञवल्क्यो यजुर्दण्डग्रहणे०

हे दण्ड विश्वाभ्यः सर्वाभ्यः नाष्ट्राभ्यो राक्षसादिभ्यः सर्वतः सर्वावस्थासु मा माम्परिपाहि रक्ष ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दन्तप्रक्षालनमादौ येषां पुष्पादानादीनां तानि दन्तप्रक्षालनादीनि नित्यमपि सर्वदा मन्त्रवन्ति स्नातकस्य भवन्ति । वाससी छत्रं चोपानहौ च वासश्छत्रोपानहः चकाराद् दण्डोऽपि । एतानि चेदपूर्वाणि नूतनानि ध्रियन्ते तदा मन्त्रो भवति ॥३०॥

इति द्वितीयस्य षष्ठी कण्डिका ॥६॥

स्नातस्य यमाचक्ष्यामः ॥१॥

कामादितरः ॥२॥

कामात् इच्छया इतरो द्विजातेरन्यः शूद्रोऽपि यमेषु अधिक्रियते ॥२॥

नृत्यगीतवादित्राणि न कुर्यात् ॥३॥

अन्यैः प्रयुक्तं द्रष्टुं श्रोतुं च न गच्छेत् ॥३॥

क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेत् ॥४॥

क्षेमे राजादिभयराहित्ये, । नक्तं रात्रौ ॥४॥

उदपानावेक्षण-वृक्षारोहण-फलप्रपतन-सन्धिसर्पण-विवृत-स्नान-विषमलङ्घन-शुक्तवदन-सन्ध्यादित्यप्रेक्षण-भैक्षणानि न कुर्यात् ॥५॥

उदपानं कूपादि, तस्य उपरिष्टात् स्थित्वा कौतुकादिना अधोमुखा भूत्वा अवेक्षणं दर्शनं न कुर्यात् । वृक्षारोहणं वृक्षोपरि गमनम् । फलप्रपतनं वृथाऽपक्वफलत्रोटनम् ।सन्धिः कुद्वारं जीर्णद्वारं वा सायं प्रातः सन्ध्या समयो वा, पुत्रजनकयोः मित्रयोः स्त्रीपुरुषयोः भ्रात्रोर्वा ऐक्यं सन्धिः, तत्र सर्पणं गमनम् । विवृतस्नानं नग्नस्नानम्त्रिषमस्य पर्वतादेर्लङ्घनम् । शुक्तं लज्जाकरममङ्गलं दुःखकरम् इति त्रिविधं भाषणम् । तिसृषु सन्ध्यासु आदित्यावलोकनम् । भिक्षणं सिद्धान्नयाचनम् । एतानि क्षेमे सति स्नातको न कुर्यात ॥ ५ ॥

वर्षत्यप्रावृतो व्रजेत् "अयं मे वज्रः पाप्मानमपहनत्" इति ॥६॥

वर्षति सति अनाच्छादितः सन् इमं मन्त्रं पठन् गच्छेत् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्स्वात्मानं नावेक्षेत ॥७॥

अप्सु जलेषु आत्मप्रतिबिम्बं न पश्येत् ॥७॥

अजातलोम्नीं विपुंसीं षण्ढं च नोपहसेत् ॥८॥

भ्रूनेत्रादिस्थाने रोमरहिताम् विपुंसीं पुरुषचिन्हश्मश्र्वादियुक्तां स्त्रियं नोपहसेत्, न च गच्छेत् । षंढमपि नोहसेत् ॥८॥

गर्भिणीं विजन्येति ब्रूयात्, सकुलमिति नकुलम्, भगालमिति कपालम्, मणिधनुरितीन्द्रधनुः ॥९॥

स्पष्टोऽर्थः ॥९॥

गां धयन्तीं परस्मै नाचक्षीत ॥१०॥

स्ववत्सं पाययन्तीं गां "गौस्ते पाययति वत्सम्" इति परस्मै तत्स्वामिने न वदेत् ॥१०॥

उर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात् ॥११॥

उर्वरायां सस्यवत्यां, तृणैरनन्तर्हितायां च भूमौ, उत्सर्पन् गच्छन् तिष्ठन्, न मूत्रपुरीषे कुर्यात् ॥११॥

स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत ॥१२॥

यत्नं विना पतितेन अयज्ञियकाष्ठेन गुदं प्रोञ्छेत् । एतच्च लोष्ठादीनामप्युपलक्षणम् ॥१२॥

विकृतं वासो नाच्छादयीत ॥१३॥

विकृतं नील्यादिरक्तं वासो न परिदध्यात् ॥१३॥

दृढव्रतो वधत्रः स्यात् ॥१४॥

दृढव्रतः समाप्तकर्मा भवेत् । वधात् आत्मानं त्रायते इति वधत्रः स्यात् ॥१४॥

सर्वतऽ आत्मानं गोपायेत्सर्वेषां मित्रमिव ॥१५॥

सर्वेषां स्वेषां परेषां वा मित्रमिव भूयात् ॥१५॥

इति द्वितीयस्य सप्तमी कण्डिका ॥७॥

१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिस्रो रात्रीर्व्रतं चरेत् ॥१॥

समावर्त्तनानन्तरं त्रिरात्रं वक्ष्यमाणं व्रतं कुर्यात्स्नातकः ॥१॥

अमाꣳसाश्यमृन्मयपायी ॥२॥

मांसं न भक्षयेत् । मृन्मयेन पात्रेण जलं न पिबेत् ॥२॥

स्त्री-शूद्र-शव-कृष्णशकुनि-शुनां चादर्शनमसंभाषा च तैः॥३॥

शवो मृतकः, कृष्णशकुनिः काकः, श्वा कुक्कुरः, एतेषां दर्शनं भाषणं च त्रिरात्रं वर्जयेत् ॥३॥

शव-शूद्र-सूतकान्नानि च नाद्यात् ॥४॥

शवान्नं मृतकाशौचान्नम्, शूद्रान्नम् भोज्यान्नस्यापि नापितादेरन्नम्, सूतकान्नं जाताशौचान्नं च नाद्यात् ॥४॥

मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्, सूर्याच्चात्मानं नान्तर्दधीत ॥५॥

आतपे घर्मे मूत्रादि न कुर्यात् । छत्रवस्त्रादिना सूर्यादात्मानं न गोपायेत् त्रिरात्रम् ॥५॥

तप्तेनोदकार्थान्कुर्वीत ॥६॥

शौचादीन् तप्तजलेन कुर्यात् ॥६॥

अवज्योत्य रात्रौ भोजनम् ॥७॥

दीपादिं प्रज्वलय्य रात्रौ भुञ्जीत नान्धकारे ॥७॥

सत्यवदनमेव वा ॥८॥

अथवा सत्यवदनमेव नियमं कुर्यात् मिथ्याभाषणं न कुर्यात् ॥८॥

दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवाँश्चेत् ॥९॥

दीक्षितः सोमयागे कृतदीक्षो यजमानोऽपि चेद्यदि प्रवर्ग्यवान् स्यात्तदा आपादीनि नियमान् कुर्यात् । "प्रवर्ग्यः सोमयाङ्गभूतः कर्मविशेषो महावीर-संभरणाख्यः" स च प्रथमे सोमयोगे विकल्पितः । अतश्चेदित्युक्तम् ॥९॥

इति द्वितीयस्याष्टमी कण्डिका ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथातः पञ्च महायज्ञाः ॥१॥

तत्रैको देवयज्ञो ब्रह्मणे स्वाहेत्यादि होमरूपः । मणिके त्रीनित्येवमादीर्बलिरूपो भूतयज्ञः । पितृभ्यः स्वधा नम इति बलिदानं पितृयज्ञः । हन्तकारातिथिपूजनादिरूपो मनुष्ययज्ञः । पञ्चमो ब्रह्मयज्ञः ॥१॥

अनुष्ठानप्रकारमाह—

वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात् ॥२॥

विश्वे सर्वे देवभूतपितृमनुष्यादयः देवता अस्य, यदन्नमहरहः शालाग्नौ लौकिकाग्नौ वा यथाधिकारं गृहेषु भोजनार्थं पच्यते तदन्नं वैश्वदेवम्, तस्मादन्नात्पञ्चमहायज्ञा अनुष्ठेयाः । तत्रादौ मणिकोदकेनाग्निं पर्युक्ष्य वक्ष्यमाणैः स्वाहान्तैः पञ्चभिर्मन्त्रैर्जुहुयात् । अत्र पर्युक्षणोपदेशः कुशकण्डिकेतिकर्तव्यताव्युदासार्थः । स्वाहाकारोपदेशश्च संस्रवव्युदासार्थः ॥२॥

देवयज्ञः—

ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतयऽ इति ॥३॥

एते पञ्च होमाः ॥३॥

भूतयज्ञः—

भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै ॥४॥

भूतानि च तानि गृह्याणि च भूतगृह्याणि, तेभ्यो भूतगृह्येभ्यः पर्जन्याय नमः, अद्भ्यो नमः, पृथिव्यै नमः, इति त्रिभिर्मन्त्रैर्मणिक (जलपात्र) समीपे कुशत्रयमास्तीर्य तत्र प्राक्संस्थान् त्रीन् बलीन् दद्यात् ॥४॥

धात्रे विधात्रे च द्वार्ययोः ॥५॥

द्वार्ययोर्द्वारशाखयोर्मध्ये धात्रे नमः, विधात्रे नमः इति बलिद्वयमुदक्संस्थं दद्यात् ॥५॥

प्रतिदिशं वायवे ॥६॥

पूर्वाद्यासु चतसृषु दिक्षु पूर्वादिक्रमेण वायवे नम इति मन्त्रावृत्त्यां चतुरो बलीन् ददाति ॥६॥

दिशां च ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः पूर्वादिक्रमेण चतसृषु दिक्षु वायवे नम इति मन्त्रेण दत्तानां बलीनां पुरस्तात् उत्तरतो वा प्राच्यै दिशे नमः इत्यादिमन्त्रचतुष्टयेन चतुरो बलीन् दद्यात् ॥७॥

मध्ये त्रीन् ब्रह्मणेऽन्तरिक्षाय सूर्याय ॥८॥

प्रतिदिशं दत्तानां वायुबलीनामन्तराले ब्रह्मणे नमः, अन्तरिक्षाय नमः, सूर्याय नमः इति । मन्त्रत्रयेण प्राक्संस्थं बलित्रयं ददाति ॥८॥

विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः॥६॥

दत्तानां त्रयाणां बलीनामुत्तरतो बलित्रयं प्राक्संस्थं ददाति ॥६॥

उषसे भूतानां च पतये परम् ॥१०॥

ततो दत्तयोस्तयोर्बल्यो परम् उत्तरतः उषसे नमः, भूतानां पतये नम इति बलिद्वयं प्राक्संस्थं दद्यात् ॥१०॥

पितृयज्ञः—

पितृभ्यः स्वधा नमऽ इति दक्षिणतः ॥११॥

ततो ब्रह्मादिबलित्रयस्य दक्षिणप्रदेशे दक्षिणामुखोऽपसव्येन एकं बलिं ददाति ॥ ११ ॥

पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त ऽइति ॥१२॥

यस्मिन्पात्रे पञ्चमहायज्ञार्थमन्नमुद्धृतं तदुद्धरणपात्रं निर्णिज्य प्रक्षाल्य तदुदकं ब्रह्मादिबलित्रयस्य उत्तरापरस्यां वायव्यां दिशि ॐयक्ष्मैतत्ते निर्णेजनं नमः, इति मन्त्रेण दद्यात ॥१२॥

नृयज्ञः—

उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद् धन्त त इति ॥१३॥

ततो वैश्वदेवादन्नादग्रमन्नं षोडशग्रासपरिमितं ग्रासचतुष्टयपरिमितं वा ब्राह्मणाय अवनेजनेजलं दत्वा 'हन्त त' इति मन्त्रेण दद्यात् ॥१३॥

यथार्हं भिक्षुकानतिथींश्च संभजेरन् ॥१४॥

यो यदन्नमर्हति तदनतिक्रम्य भिक्षुकान् ब्रह्मचारिप्रभृतीन् अतिथींन् अध्वनीनान च संभजेरन् सन्तोषयेरन् ॥१४॥

बालज्येष्ठा गृह्या यथाऽर्हमश्नीयुः ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बालः ज्येष्ठः प्रथमो येषां ते बालज्येष्ठा गृहे भवाः पुत्रपौत्रादयो यथा-योग्यं भुञ्जीरन् ॥१५॥

पूर्वो वा गृहपतिस्तस्मादु स्वादिष्टं पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः ॥१६॥

गृहपतिर्वा पत्न्याः पूर्वमश्नीयात् न युगपत् । कुतः ? श्रुतेः । तस्मात् स्वात् अन्नात् यदिष्टं तद् गृहपतिरश्नाति भुक्तवद्भ्योऽतिथिभ्योऽनन्तरं पत्न्याः पूर्वमिति ॥१६॥

अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः ॥१७॥

देवयज्ञोऽयमहरहः कार्यः स्वाहाकुर्याद्देवेभ्योऽन्नेन जुहुयात् । अन्नाभावे केनचिद् द्रव्येण काष्ठपर्यन्तेनापि कार्यः ॥१७॥

पितृभ्यो मनुष्येभ्यश्चोदपात्राव ॥१८॥

पितृयज्ञो मनुष्ययज्ञश्च आ उदपात्रादपि अहरहः कार्यः । एवं पञ्चमहा-यज्ञक्रिया अहरहरेव कार्येति ॥१८॥

इति द्वितीयस्य नवमी कण्डिका ॥९॥

अथातोऽध्यायोपाकर्म ॥१॥

अधीयत इत्यध्यायो वेदः तस्य उपाकर्म आरम्भविधिरुच्यते । वेदारम्भानन्तरं गायत्र्यैव स्वाध्यायोऽनुष्ठेयः । वेदाध्ययनं तु उपाकर्मानन्तरमेव कर्तव्यम् । साम्प्रतं वेदारम्भेणैव वेदाध्ययनं क्रियते उपाकर्मप्रतीक्षा न क्रियते याजुषैः । इतरैस्तु उपाकर्मणि एव वेदारम्भः क्रियते नोपनयनदिने । उपाकर्मप्रथमारम्भः शुक्रास्तादौ न भवति । एतत्कर्म लौकिकाग्नावपि भवति । कर्काचार्यमते तु स्मार्ताग्नावेवैतदनुष्ठानम् ॥१॥

ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याम् ॥२॥

एतदुपाकर्म ओषधीनां प्रादुर्भावे सति श्रवणेन युक्तायां श्रावण्यां पूर्णिमायां भवति । तत्रापि शुक्लयजुषां पौर्णमास्या एव प्राधान्यम् । बह्वृचां श्रवणस्य । सामगानां हस्तयुक्ता भाद्रशुक्लतृतीया । अथर्वणां च भाद्री पूर्णिमा । तत्र दिनद्वये पूर्णिमासत्वे कात्यायनानां षण्मुहूर्ताधिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यापिनी चेदुत्तरा ग्राह्या अन्यथा पूर्वा । तैत्तिरीयैः सङ्गवव्यापिनी । सङ्गवोत्तरव्यापिनी चेदुत्तरा ग्राह्या अन्यथा पूर्वा । पौर्णमास्यां ग्रहणे सङ्क्रान्तौ वा श्रावणशुल्कपञ्चम्यामुपाकर्म, न पूर्णिमायाम् । पञ्चम्यामुपाकर्म पक्षेऽपि पञ्चमीद्वैधे पूर्णिमावन्निर्णयः ॥२॥

श्रावणस्य पञ्चमीᳬ हस्तेन वा ॥३॥

श्रावणस्य शुक्लपक्षस्य हस्तेन युक्तायां पञ्चम्यां वा उपाकर्म कार्यम् ॥३॥

आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पृथिव्याऽ अग्नय इत्यृग्वेदेऽन्तरिक्षाय वायव ऽइति यजुर्वेदे, दिवे सूर्यायेति सामवेदे, दिग्भ्यश्चन्द्रमस ऽइत्यथर्ववेदे, ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र, प्रजापतये देवेभ्यऽ ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय ऽइति च ॥४॥

ऋग्वेदेऽधीयमाने पृथिव्यै स्वाहा अग्नये स्वाहा इत्याहुतिद्वयं जुहुयात् । एवमग्रेऽपि । ब्रह्मणे स्वाहा छन्दोभ्यः स्वाहा इत्याहुतिद्वयं प्रति वेदमावर्तयेत् । प्रजापतय इत्यादिकाश्च सप्त सर्वत्र जुहुयात् । चतुर्णां वेदानां तन्त्रेणोपाकरणे ब्रह्मणे छन्दोभ्यः इत्याहुतिद्वयं प्रतिवेदमावर्तनीयम् । प्रजापतय इत्येवमाद्याः सप्त तन्त्रेणैव । योगविभागसामर्थ्यात् ॥४॥

सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनु पठेयुर्हुत्वा हुत्वौदुम्बर्यस्तिस्रः समिधः आदध्युरार्द्राः सपलाशा घृताक्ता सावित्र्या ॥५॥

धानानां च अपणानुपदेशात्सिद्धानामेवोपादानम् । अक्षताश्च ता धानाश्चेत्यक्षतधानाः ताः सदसस्पतिमिति मन्त्रेणाचार्यस्त्रिर्जुहोति । किं कृत्वा हुत्वा हुत्वा । एकैकामक्षतधानाहुतिं हुत्वा हुत्वा औदुम्बरीस्तिस्र आर्द्राः पत्रसहिता घृतलिप्ताः समिध आचार्यसहिताः शिष्याः तत्सवितुरिति मन्त्रेणाग्नौ प्रक्षिपेयुर्न यौगपद्येन । तिस्रस्तिस्र इति वीप्साऽऽधातृपुरुष विषया नतु समिद्विषया । अतः प्रत्याहुति एकैकामेवादध्युः ॥५॥

ब्रह्मचारिणश्च पूर्वकल्पेन ॥६॥

तत्र ये ब्रह्मचारिणः शिष्यास्ते पूर्वकल्पेन अग्ने सुश्रव इति पूर्वोपदिष्ट मन्त्रेणादध्युः ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुः ॥७॥

अक्षतधाना यवानां धाना दन्तैरचर्वयन्तः सर्वे आचार्यसहिताः प्राश्नीयुः ॥७॥

दधिक्राव्ण इति दधि भक्षयेयुः ॥८॥

सर्वे ॥८॥

स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात् सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा ॥९॥

स आचार्यो यावत्संख्याकं शिष्याणां गणं समूहमिच्छेत्तावत्सङ्ख्यान् तिलान् आकर्षफलकेन औदुम्बरेण सर्पाकृतिना बाहुप्रमाणेन पात्रेण गायत्र्या शुक्रज्योतिरित्यनुवाकेन वा जुहुयात् ॥९॥

प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्यः शिष्येभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्ययादीन् प्रब्रूयादृषिमुखानि बह्वृचानां, पर्वाणि छन्दोगानाꣳ सूक्तान्यथर्वणानाम् ॥१०॥

संस्रवप्राशनान्ते प्राङ्मुख आचार्यः प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यो यजुर्वेदोपाकरणे ॐकारमुक्त्वा उच्चार्य तत्सवितुरिति गायत्रीं च त्रिरुच्चार्य मन्त्रब्राह्मणयोरध्यायादीन् प्रब्रूयादध्यापयेत् । बह्वृचानां शिष्याणामृग्वेदोपाकरणे ऋषिमुखानि मण्डलादीन्यध्यापयेत् । सामवेदिनां सामवेदोपाकरणे पर्वाणि पर्वणामाग्नेयादीनामादीन प्रब्रूयात् । अथर्वणानां शिष्याणामथर्ववेदोपाकरणे सूक्तानि सूक्तादीन् प्रब्रूयात् ॥१०॥

सर्वे जपन्ति–"सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामहे"इति ॥११॥

टि०—अस्य प्रजापतिर्ऋ० यजुश्छं० ब्रह्मदैवतं जपे वि० । इदं ब्रह्म साङ्गोऽयं वेदोऽध्ययनार्थं सहभावं प्राप्तानां समवेतानां नोऽस्माकमस्मद् हृदयेऽस्तु स्थिरं भवतु । ततः सह मिलितान्नोऽस्मानवतु रक्षतु । तथा सहमिलितानां नोऽस्माकमिदं ब्रह्म वीर्यवत् अयातयाममस्तु । इन्द्रस्तत् यथा यथावत् वेद वेदयतु येन वेदनेन परस्परं वयं न विद्विषामहे न द्विष्मः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचार्य सहिताः सर्वे शिष्याः सह न इति मन्त्रं पठेयुः ॥११॥

त्रिरात्रं नाधीयीरन् लोमनखानामनिकृन्तनम् ॥१२॥

उपाकर्मोत्तरं त्रिरात्रं सर्वेऽध्ययनं न कुर्युः । लोम्नां नखानां च छेदनं त्रिरात्रं न कुर्युः ॥१२॥

एके प्रागुत्सर्गाव ॥१३॥

एके आचार्याः प्रागुत्सर्गाल्लोमनखानामनिकृन्तनमिच्छन्ति । उत्सर्गश्चाग्रे वक्ष्यते ॥१३॥

इति द्वितीयस्य दशमी कण्डिका ॥१०॥

वातेऽमावास्यायाꣳ सर्वानध्यायः ॥१॥

अमायां प्रचण्डे वायौ वाति सति सर्वेषां वेदानां तदङ्गादीनां चानध्यायो भवति ॥१॥

श्राद्धाशने चोल्काऽवस्फूर्जद् भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाकालम् ॥२॥

श्राद्धान्नभोजने, उल्कायां ज्वालाकृतौ पतन्त्यां तारायाम्, अवस्फूर्जति विद्योतमानायां विद्युति विद्युत्पतने, भूमिकम्पे, अग्नौ ग्रामदाहे, इत्युत्पातेषु अनध्यायः । ऋतुसन्धिषु आकालमनध्यायः । एकस्य ऋतोरन्त अन्त्या रात्रिः उत्तरस्याद्यमहस्तावाननध्याय इत्यर्थः ॥२॥

उत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा ॥३॥

उत्सृष्टेषु वेदेषु वेदानामुत्सर्गे कृते, सर्वरूपे मेघदर्शने च (विद्युदभ्रवायुवृष्टिगर्जितानां युगपत्प्रवृत्तिः सर्वरूपम्) त्रिरात्रं त्रिसन्ध्यं वाऽनध्यायः ॥३॥

भुक्त्वाऽऽर्द्रपाणिरुदके निशायाꣳ सन्धिवेलयोरन्तःशवे ग्रामेऽन्तर्दिवाकीर्त्ये ॥४॥

भुक्त्वा यावदार्द्रपाणिस्तावन्नाधीयीत । तथा उदके यावत्तिष्ठति तावत् निशायामनध्यायः । ग्राममध्ये यावच्छवं मृतशरीरं भवति तावदनध्यायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिवा कीर्त्यं पठनीयं यत् प्रवर्ग्यादि तस्मिन् जाते ग्रामे अनध्यायः । अथवा अन्तः सन्निहितो दिवाकीर्तिश्चाण्डालो यत्र सोऽन्तर्दिवाकीर्त्यो देशस्तत्रानध्यायः ॥४॥

धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालम् ॥५॥

धावतः शीघ्रं गच्छतः, अभिशस्तो ब्रह्महत्यादिपापेन युतः पतितस्तेनैव । तयोर्दर्शने, अभ्युदये विवाहादौ यावन्निमित्तं तावदनध्यायः ॥५॥

नोहारे वादित्रशब्द आर्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकश्रृगालसामशब्देषु शिष्टाचरिते च तत्कालम् ॥६॥

नीहारे धूमरिकायां, वादित्राणां मृदङ्गादीनां शब्दे, आर्तस्य दुःखितस्य स्वने शब्दे, ग्रामस्यान्ते सीम्नि श्मशाने श्वा च गर्दभश्च उलूकश्च श्रृगालश्च साम च तेषां शब्दे श्रूयमाणे, शिष्टस्य श्रोत्रियस्याचरिते आगमने च तत्कालमनध्यायः ॥६॥

गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत् ॥७॥

गुरौ आचार्ये मृते उदकं स्नानाय प्रविशेत् दशाहानि स्वाध्यायादुपरमेत् ॥७॥

सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रम् ॥८॥

सोमयागे षोडशानामृत्विजां यजमानस्य च परस्परमद्रोहार्थमाज्यस्य स्पर्शरूपः शपथो विहितः स एव तानूनप्त्रमित्युच्यते । समानं तानूनप्त्रं यस्य तस्मिन् सतानूनप्त्रिणि मृते, अन्येषां तानूनप्त्रिणां त्रिरात्रमशौचं भवति । समाने तुल्ये ब्रह्मणि वेदे चरतीति सब्रह्मचारी । तस्मिन् मृते च त्रिरात्रमाशौचम् ॥८॥

एकरात्रमसब्रह्मचारिणि ॥९॥

असमानाचार्ये ब्रह्मचारिणि मृते एकरात्रमशौचम् ॥८॥

अर्द्धषष्ठान् मासानधीत्योत्सृजेयुः ॥१०॥

अर्द्धः षष्ठो मासो येषां ते अर्द्धषष्ठा मासाः तानर्द्धषष्ठान् मासानधीत्य पूर्वमुपाकृतानि स्वीकृतानि छन्दांस्युत्सृजेयुः ॥१०॥

अर्द्धसप्तमान्वा ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्द्धः सप्तमो मासो येषां ते अर्द्धसप्तमाः । तान् पठित्वोत्सृजेयुः ॥११॥

अथेमामृचं जपन्ति—"उभा[१] कवी यो नो धर्म्मः परापतत् । परिसख्यस्य धर्मिणो विसख्यानि सृजामहे" इति ॥१२॥

उत्सर्गानन्तरमाचार्येण सह शिष्या उभा कवी इतीमामृचं पठेयुः ॥१२॥

त्रिरात्रꣳ सहोष्य विप्रतिष्ठेरन् ॥१३॥

त्रिरात्रं सह एकस्मिन् गृहे आचार्यसहिताः शिष्या निवासं कृत्वा विविधं प्रवासं कुर्युः । त्रिरात्रं सहवासनियमः ॥१३॥

इति द्वितीयस्यैकादशी कण्डिका ॥११॥

पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेयुः ॥१॥

पौषमासस्य रोहिण्यां रोहिणीनक्षत्रे पौष्या ऊर्ध्वं मध्यमायां माघकृष्णाष्टम्यां वा अध्यायान् वेदानुत्सृजेयुः । पूर्वमुपाकृतान् पुनरुपाकरणं यावन्नाधीयीरन् ॥१॥

उत्सर्गप्रकारमाह—

उदकान्तं गत्वाऽद्भिर्देवांश्छन्दाꣳसि वेदानृषीन् पुराणाचार्यान् गन्धर्वानितराचार्यान्त्संवत्सरं च सावयवं पितनाचार्यान्त्स्वांश्च तर्पयेयुः ॥२॥

स्पष्टोऽर्थः ॥२॥

सावित्रीं चतुरनुद्रुत्य "विरताः स्म" इति प्रब्रूयुः ॥३॥

तर्पणस्यान्ते गायत्रीं चतुर्वारमुक्त्वा विरताः स्म इति मन्त्रं पठेयुः॥३॥

---

(१)—अस्य परमेष्ठी ऋ० अनुष्टुप्छं० अश्विनौ देवते जपे वि० ।
हे अश्विनौ युवाम् उभा उभौ कवी, युवा युवानौ । युष्मत्प्रतिपादितो धर्मो नोऽस्माकं परिसख्यस्य सुमित्रभावमापन्नस्य परापतत् रक्षणार्थमागतः । तेन सख्येन विसख्यानि विद्वेषादीनि विषमाध्ययनानि वा विसृजामहे त्यजाम । किं भूतस्य सख्यस्य विधर्मिः उपकारादिधर्मवतः परस्परमनुकूलस्येत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षपणं प्रवचनं च पूर्ववत् ॥४॥

ततः क्षपणं लोमनखनामनिकृन्तनं प्रवचनमध्ययनं च पूर्ववत् त्रिरात्रं न कुर्यात् ॥४॥

इति द्वितीयस्य द्वादशी कण्डिका ॥१२॥

पुण्याहे लाङ्गलयोजनम् ॥१॥

ज्योतिःशास्त्रोक्ते शुभे दिने प्रथमकृषिप्रवृत्तस्य साग्निकस्य लाङ्गलस्य हलस्य योजनं प्रवर्तनं भवति ॥१॥

ज्येष्ठया वैन्द्रदेवत्यम् ॥२॥

अथवा ज्येष्ठानक्षत्रेण युते दिने लाङ्गलयोजनं कार्यम् । यतो ज्येष्ठानक्षत्रमिन्द्रदेवत्यम् । इन्द्राधीना च कृषिः ॥२॥

इन्द्रं पर्जन्यमश्विनौ मरुतऽ उदलाकाश्यपꣳ स्वातिकारीꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहो मधुघृते प्राशयेत् ॥३॥

इन्द्रादिदेवान् दध्यादिना इष्ट्वा नमोऽन्तैर्नाममन्त्रैर्बलिहरणेन संपूज्य अनडुहो मधुघृते पात्रे कृत्वा तूष्णीं प्रत्येकं प्राशयेत् ॥३॥

सीरा युञ्जन्तीति योजयेच्छुनꣳ सु फाला ऽइति कृषेत् फालं वाऽऽलभेत ॥४॥

यागानन्तरं वृषभौ हले योजयेत् । ततो भूमिं कृषेत् । अथवा शुनमिति मन्त्रेण फालं हलमुखं स्पृशेत् ॥४॥

न वाऽग्न्युपदेशात् ॥५॥

अथवा नैतो मन्त्रौ विनियोक्तव्यौ । कुतः ? अग्निचयने एतावुपदिष्टौ । न च तयोरत्रोपदेशो नाप्यतिदेशः ॥५॥

किञ्च—

वपनानुषङ्गाच्च ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निचयनप्रकरणे ये मन्त्राः या ओषधीरित्यादयो विनियुक्ता-स्तेषामप्यनुषङ्गः स्यात् यदि लिङ्गमात्रेण विनियोगः स्यात् न चैतदिष्यते ॥६॥

अग्र्यमभिषिच्य तदाऽकृष्टं कृषेयुः ॥७॥

अग्र्यं मुख्यं वल्लभं बलीवर्दमभिषिच्य घुर्घुरमालादिना भूषयित्वा अकृष्टं यत्क्षेत्रं तत् कृषेयुः न कृष्टम् ॥७॥

स्थालीपाकस्य पूर्ववद्देवतां यजेदुभयोर्व्रीहियवयोः प्रवपन्त्सीतायज्ञे च ॥८॥

इदमपरं कर्मान्तरमुच्यते । स्थालीपाकस्य अपणानुपदेशात् सिद्धस्य चरोः पूर्ववत् लाङ्गलयोजनोक्ता देवता इन्द्रादिका यजेत् । किं कुर्वन् व्रीहियवयोर्वपनकाले प्रवपन् उप्तिं कुर्वन् । एवं सीतायज्ञे च एता देवताः स्थालीपाकेन यजेत् ॥८॥

ततो ब्राह्मणभोजनम् ॥९॥

इति द्वितीयस्य त्रयोदशी कण्डिका ॥१३॥

अथातः श्रवणाकर्म ॥१॥

श्रवणाकर्मेति वक्ष्यमाणस्य कर्मणो नामधेयम्, तद्व्याख्यास्यत इति शेषः ॥१॥

श्रावण्यां पौर्णमास्याम् ॥२॥

तत्कर्म श्रावणशुक्लपञ्चदश्यां कार्यम्, न तु गौणे ॥२॥

स्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति ॥३॥

स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वा, अक्षतानां सतुषयवानां धाना अक्षतधानास्ताश्च यथाविधि पक्त्वा एकस्मिन् कपाले श्रप्यत इत्येक कपालस्तमेककपालं पुरोडाशं श्रपयित्वा धानानां भृष्टयवानां मध्ये भूयसीः बह्वीर्धानाः पिष्ट्वा पेषणेनैव सक्तुत्वं विधाय आज्यभागसंज्ञके द्वे आहुती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुत्वा, ततः 'अपश्वेतपदा जहि० नवै श्वेतस्य' इति मन्त्राभ्याम् द्वे आज्याहुती जुहोति ॥३॥

"अपश्वेतपदा जहि पूर्वेण चापरेण च ॥
सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजवान्धवैः स्वाहा ॥४॥
न वै श्वेतस्याध्याचारेऽहिर्ददर्श कश्चन ।
श्वेताय वैदर्व्याय नमः स्वाहा" इति ॥५॥

स्थालीपाकस्य जुहोति विष्णवे श्रवणायै श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति ॥६॥

ततः स्थालीपाकस्य चरोः 'विष्णवे स्वाहा' इत्यारभ्य 'वर्षाभ्यः स्वाहा' इत्यन्तैश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहोति ॥६॥

धानावन्तमिति धानानाम् ॥७॥

धानानाम्—भृष्टयवानाम् 'धानावन्तं करम्भिणम्' इत्यनयच जुहोति ॥ ७ ॥

घृताक्तान्सक्तून्सर्पेभ्यो जुहोति ॥८॥

---

(१) अपश्वेत० न वै श्वेत० द्वयोः प्रजापतिऋषिर्गायत्रीच्छन्दः सर्पा देवता आज्यहोमे विनियोगः ।

हे श्वेतपद गूढपद ! त्वम् इमाः मदीयाः प्रजाः राजवान्धवैर्वासुकिप्रभृतिभिस्तथा वारुणैर्वरुणसम्बन्धिभिश्च सर्पसमूहैः सह जहि त्यज । अत्र पूर्वसवर्णदीर्घ आर्षः । हित्वा च इतः स्थानादपगच्छ । किंभूताः प्रजाः सप्त सपिण्ड-सगोत्र-सोदकभेदेन सप्तपुरुषसम्बद्धाः । सर्वाश्च सेवकपश्वादिरूपाः । कथम् पूर्वेण पुरतः, अथपरेण पश्चात् । वारुण्यादिभिः सह तुभ्यं सुहुतमस्तु ॥४॥

न वा इति । न वै इति शब्दद्वयं जातिनिश्चयार्थकम्, श्वेतस्य श्वेतपदस्य अध्याचारे आधिपत्ये अहिः कश्चिदपि सर्पः कञ्चन जनं न ददर्श पापबुद्धया मा पश्यतु । तदर्थं श्वेताय शुद्धाय प्रसन्नाय वा नमस्कारयुक्तं स्वाहा सुहुतमस्तु । किं भूताय वैदर्व्याय दर्वीकाराय दीर्घफणायेत्यर्थः । यद्वा वैदर्व्याय विदर्वापत्याय । मदीयनमस्कारयुजा सुहुतेन प्रीतोऽस्माकं सर्पभयं निवर्तयेति वाक्यार्थः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"आग्नेय[1]पाण्डुपार्थिवानाᳬ सर्पाणामधिपतये स्वाहा, श्वेतवायवान्तरिक्षाणाᳬ सर्पाणामधिपतये स्वाहा, अभिभूः सौर्यदिव्यानाᳬ सर्पाणामधिपतये स्वाहा" इति ॥९॥

घृतेन मिश्रितान् सक्तून् सर्पेभ्यः आग्नेयपाण्डुपार्थिवानामित्यादिभिस्त्रिभिर्मन्त्रैस्तिस्र आहुतीर्जुहोति ॥८॥९॥

सर्वहुतमेककपालं 'ध्रुवाय भौमाय स्वाहा' इति ॥१०॥

सक्तुहोमानन्तरं सर्वं सम्पूर्णं हुतं यथा स्यात् तथा 'ध्रुवाय भौमाय स्वाहा' इति मन्त्रेणैककपालं पुरोडाशं जुहोति । ततः स्विष्टकृत् ॥१०॥

प्राशनान्ते सक्तूनामेकदेशᳬशूर्पे न्युप्योपनिष्क्रम्य बहिः शालायाः स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वाग्यतः सर्पानवनेजयति ॥११॥

आग्नेयपाण्डुपार्थिवानाᳬ सर्पाणामधिपतेऽवनेनिक्ष्व, श्वेतवायवान्तरिक्षाणाᳬ सर्पाणामधिपतेऽवनेनिक्ष्व, अभिभूः सौर्यदिव्यानाᳬ सर्पाणामधिपतेऽवनेनिक्ष्वेति ॥१२॥

प्राशनान्ते संस्रवप्राशनान्ते पूर्वकृतसक्तूनामेकदेशं बलित्रयदानार्थं शूर्पे शरेषीकावंशाद्यन्यतमे न्युप्तं कृत्वा उपनिष्क्रम्य शालातो निर्गत्य बहिः प्राङ्गणे स्वयमेव स्थण्डिलं भूमिम् उपलिप्य गोमयेनेत्यर्थः । उल्कायां ज्वलत्काष्ठैर्ध्रियमाणायाम् अन्येन ध्रियमाणे 'माऽन्तरागमत आवसथ्यस्य मम चान्तराले मा गच्छत इत्युक्त्वा वाग्यतो मौनी भूत्वा 'आग्नेय पाण्डुपार्थिवानाम्' इत्यादिभिस्त्रिभिर्मन्त्रैः प्राक्संस्थान् सर्पान् अवनेजयति

१—आग्नेय पाण्डिवति त्रयाणां परमेष्ठी यजुः सर्पाधिपतयो दे० सक्तुहोमे विनियोगः ।

मन्त्रार्थः—आग्नेयाः अग्निदेवत्याः, पाण्डुसंज्ञकसर्पजातीयाः, पार्थिवाः पृथिव्यां विहारिणः, तेषां सर्पाणामधिपतये शेषाय वासुकये वा स्वाहा सुहुतमस्तु ॥ १ ॥ तथा श्वेताः श्वेतजातीयाः वायवाः वायुदेवत्याः आन्तरिक्षाः आकाशविहारिणः तेषामधिपतय इति ॥२॥ तथा च अभिभवन्ति सर्पानित्यभिभुवः, सौर्याः सूर्यदेवत्याः, दिव्याः दिवि विहरणशीलाः, तेषामधिपतय इति । शेषं पूर्ववत् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमावुदकदानेन अवनिक्तान् शुद्धान् करोतीत्यर्थः ॥ ११ ॥ १२ ॥

यथावनिक्तं दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिꣳ हरति ॥१३॥

आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपते एष ते बलिः, श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष ते बलिः, अभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपत एष ते बलिरिति ॥१४॥

यथा येषु प्रदेशेषु अवनिक्तम् अवनेजनं कृतम् तं देशमनतिक्रम्यैव दर्व्या प्रादेशपरिमाणात्मिकया पलाशादियज्ञियवृक्षोद्भवया उपघातमुपहृत्य गृहीत्वा सर्पेभ्यो बलिम् 'आग्नेय०' इत्यादिभिस्त्रिभिर्हरति ददातीत्यर्थः ॥१३॥१४॥

अवनेज्य पूर्ववत्कङ्कतैः प्रलिखति ॥१५॥

आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपते प्रलिखस्व, श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपते प्रलिखस्व, अभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपते प्रलिखस्वेति ॥१६॥

आग्नेयेत्यादिभिस्त्रिभिर्मन्त्रैः पूर्ववदवनेजनं विधाय, ततः कङ्कतानि प्रादेशप्रमाणानि त्रीणि वैकङ्कतानि गृहीत्वा, तैर्यथासंख्यम् प्रलिखति कण्डूयनेन रेखां विदधाति ॥१५॥१६॥

अञ्जनानुलेपनꣳ स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति ॥१७॥

अञ्जनम्-कज्जलम् लौकिकदीपोद्भवम् सौवीरं वेति । अनुलेपनम् श्रीखण्डचन्दनादि, स्रजः पुष्पमालाः, आग्नेयेत्यारभ्य अञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेत्यन्तैभिर्मन्त्रैः प्रतिमन्त्रं प्रतिबलिं यथासंख्यमेकैकं प्रयच्छतीत्यर्थः ॥१७॥

सक्तुशेषꣳ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः ॥१८॥

सक्तुशेषं बलिदानार्थं यत्पूर्वं शूर्पे कृत्वा आनीतम् तत् स्थण्डिले गोमयोपलिप्तायां भूमौ न्युप्य शूर्पेणैव प्रक्षिप्य उदपात्रेण उदकपात्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपनिनीय आप्लाव्य 'नमोऽस्तु सर्पेभ्य' इति तिसृभिः कण्डिकाभिः बलिमुपतिष्ठते स्तौतीत्यर्थः ॥१८॥

स यावत्कामयेत न सर्पाऽ अभ्युपेयुरिति सन्ततयोद-धारया निवेशनं त्रिः परिषिञ्चन्परीयादपश्वेतपदा जहि" इति द्वाभ्याम् ॥१९॥

स गृहपतिः यावत् यावन्तं देशं सर्पा वासुकिप्रभृतयो नागा नाभ्युपेयुर्न सञ्चरेयुरिति कामयेत इच्छेत् तावत् तावन्तं भूप्रदेशं सन्ततया अविच्छिन्नोदकधारया निवेशनं गृहम् परिषिञ्चन् अपश्वेतपदा जहीतिद्वाभ्याम् मन्त्राभ्याम् त्रिः परीयात् गृहस्य समन्तात्प्रादक्षिण्येन त्रीन् वारान् परिक्रम्य गच्छेत् ॥१९॥

दर्वीं शूर्पं च प्रक्षाल्य प्रतप्य प्रयच्छति ॥२०॥

दर्वीं पूर्वोक्तां प्रादेशपरिमाणां पलाशादिवृक्षोत्थां, शूर्पं पूर्वोक्तं च प्रक्षाल्य क्षालयित्वा प्रतप्य सामीप्यादुल्कायामेव सह तापयित्वा प्रयच्छति ॥२०॥

द्वारदेशे मार्जयन्तऽ आपोहिष्ठेति तिसृभिः ॥२१॥

द्वारदेशे शालायाः द्वारसमीपे आपो हिष्ठेति तिसृभिर्ऋग्भिः मार्जयन्ते। मार्जयन्त इत्यत्र बहुवचनश्रवणात् ब्रह्मयजमानोल्काधारा अद्भिरात्मानमभिषिञ्चन्तीति भावः ॥२१॥

अनुगुप्तमेतर्ठ० सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातर्ठ० सक्तून् सर्पेभ्यो बलिर्ठ० हरेदाऽऽग्रहायण्याः ॥२२॥

एतं सक्तुशेषं हुतशेषान् सक्तून् अनुगुप्तम् सुरक्षितं यथा स्यात् तथा निधाय संस्थाप्य ततः तस्मात् श्रवणाकर्मकालादारभ्य अस्तमितेऽस्तमिते सूर्ये प्रत्यहम् आवसथ्याग्निं परिचर्य आराध्य दर्व्योपघातं दर्व्योपहत्योपहत्य शूर्पे न्युप्तान् सक्तून् सर्पेभ्यः पूर्वोक्तेनैव विधिना बलिं हरेत् । अत्रावधिमाह— आऽऽग्रहायण्याः आग्रहायणीं पौर्णमासीं यावदिति शेषः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDI

तर्द० हरन्तं नान्तरेण गच्छेयुः ॥२३॥

तम् यजमानम् बलीन् हरन्तम् अन्तरेण औपासनाग्निमन्तरेण मध्ये न गच्छेयुः ॥२३॥

दर्व्याऽऽचमनं प्रक्षाल्य निदधाति ॥२४॥

दर्व्या पालाशादिनिर्मितोत्थया प्रादेशपरिमाणया आचमनं मुखम् प्रक्षाल्य क्षालयित्वा निदधाति स्थापयति प्रत्यहम् भूमाविति शेषः ॥२४॥

धानाः प्राश्नन्त्यसँस्यूताः ॥२५॥

असंस्यूताः दन्तैरस्पृष्टाः धानाः भृष्टयवान ब्रह्मादयः प्राश्नन्ति भक्षयन्ति ॥२५॥

ततो ब्राह्मणभोजनम् ॥२६॥

ततः कर्माङ्गभूतमेकं ब्राह्मणं भोजयेत् ॥२६॥

इति द्वितीयस्य चतुर्दशी कण्डिका ॥१४॥

प्रौष्ठपद्यामिन्द्रयज्ञः ॥१॥

प्रौष्ठपदी भाद्रपदपौर्णमासी, तस्यां इन्द्रयज्ञनामधेयं कर्म औपासनाग्नौ भवति ॥१॥

पायसमैन्द्रँ श्रपयित्वाऽपूपांश्चाऽपूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेन्द्राण्याऽजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति ॥२॥

पयसा दुग्धेन श्रृतं चरुम् ऐन्द्रमिन्द्रदेवताकं श्रपयित्वा यथाविधि पक्त्वा चतुरः अपूपांश्च श्रपयित्वा, अपूपैर्मोदकैः प्रतिदिशमग्निं स्तीर्त्वा परिस्तीर्य आज्यभागौ एतत्संज्ञकौ द्वे आहुती हुत्वा 'इन्द्राय० प्रौष्ठपदाभ्य' इति स्वाहान्तैः पञ्चभिर्मन्त्रैराज्येन पञ्चाहुतीर्जुहोति ॥२॥

स्थालीपाकस्य जुहोति इन्द्राय स्वाहेति ॥३॥

आज्याहुत्यन्ते स्थालीपाकस्य चरोः 'इन्द्राय स्वाहा' इति मन्त्रेण हवनं कुर्यात् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राशनान्ते मरुद्भ्यो वलिर्ठ० हरत्यहुतादो मरुत इति श्रुतेः॥४॥

प्राशनान्ते स्विष्टकृदादि-संस्रवप्राशनान्ते मरुद्भ्यः एकोनपञ्चाशद्देव-विशेषेभ्यो वलिं हरति ददाति। कुतः ? अहुतमदन्तीति अहुतादः मरुतो देवा इति श्रुतेः वेदवचनात् ॥४॥

मरुद्भ्यो वलिर्ठ० हरति इत्युक्तम् तदधिकरणमाह—

आश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनात् ॥५॥

अश्वत्थस्य पिप्पलस्य इमानि आश्वत्थानि तेषु पत्रेषु बलिं हरति प्रयच्छति। ननु ? सर्वत्र वलिदानं भूमौ दृश्यते कथमत्राश्वत्थपत्रेष्विति संशये आह—मरुतः शुक्रज्योतिप्रभृतयो यस्मादश्वत्थे तस्थुः स्थितवन्तः इति श्रुतेर्बलात् पत्रेष्वेव वलिहरणं युक्तमिति भावः ॥५॥

शुक्रज्योतिरिति प्रतिमन्त्रम् ॥६॥

अत्र यद् वलिहरणं तत्सर्वं शुक्रज्योतिरित्यादिभिः षड्भिर्मन्त्रैः कार्यम्॥६॥

विमुखेन च ॥७॥ मनसा ॥८॥ नामान्येषामेतानि इति श्रुतेः ॥९॥

चकाराद् वलिहरणं विमुखेन उग्रश्च भीमश्चेत्यध्येतृप्रसिद्धेन, मनसा मनोव्यापारेण भवति। कुतः ? एषाम् मरुताम् शुक्रज्योतिश्च चित्रज्योतिश्चेत्येवमादीनि नामानि इति श्रुतेः वेदवाक्यात् ॥७॥८॥९॥

इन्द्रं दैवीरिति जपति ॥१०॥

वलिहरणान्ते 'इन्द्रं दैवीः' इति जपति ॥१०॥

ततो ब्राह्मणभोजनम् ॥११॥

ततो वर्हिर्होमादि ब्राह्मणभोजनान्तं सर्वं भवतीत्यर्थः ॥११॥

इति द्वितीयस्य पञ्चदशी कण्डिका ॥१५॥

आश्वयुज्यां पृषातकाः ॥१॥

आश्वयुजी आश्विनी पूर्णिमा, तत्र पृषातका इति वक्ष्यमाणसंज्ञकं कर्म भवति ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या ऽ अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति ॥२॥

ऐन्द्रम् इन्द्रदेवताकं पायसं पयसि पक्वं चरुं श्रपयित्वा यथाविधि पक्त्वा ततो दधिमधुघृतैर्मिश्रं मिश्रितम् चरुम् 'इन्द्राय स्वाहा' इत्यादिभिः पञ्चभिर्मन्त्रैः प्रतिमन्त्रं पञ्चाहुतीर्जुहोति ॥२॥

प्राशनान्ते दधिपृषातकमञ्जलिना जुहोति "[1]ऊनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहे'ति ॥३॥

प्राशनान्ते संस्रवप्राशनान्ते दधिपृषातकं दध्ना मिश्रम् आज्यम् अञ्जलिना 'ऊनं मे० व्यगात्स्वाहे' त्यन्तेन मन्त्रेण जुहोति । अत्र दधिपृषातकाशब्दः पृषदाज्यवाची । अत्रा[2]ग्निर्देवता न प्रजापतिरिति ॥३॥

दधिमधुघृतमिश्रममात्या ऽ अवेक्षन्ते 'आयात्विन्द्र' इत्यनुवाकेन ॥४॥

अमात्या-यजमानगृह्याः भ्रातृपुत्रादयः दधिमधुघृतैर्मिश्रं मिश्रितं हुतशेषं चरुम् 'आयातु० सदा न' इत्यन्तेनानुवाकेन अवेक्षन्ते अवलोकयन्ति । 'अमा गृहं तत्र भवा अमात्या' इति ॥४॥

मातृभिर्वत्सान्सꣳसृज्य ताꣳ रात्रिमाग्रहायणीं च ॥५॥

वत्सान् मातृभिर्धेनुभिः संसृज्य संमेल्य संसृष्टान्कृत्वा, तस्यां रात्रौ संसृष्टा एव वसन्ति । अधिकारमुपजीवन्नाह—

आग्रहायणीं मार्गशीर्षसम्बन्धिनीं रात्रिं वत्साः संसृष्टा एव वसन्ति ॥५॥

ततो ब्राह्मणभोजनम् ॥६॥

'कृतैतत्कर्माङ्गतया ब्राह्मणमेकं भोजयिष्ये' इत्येकमेवेति ॥६॥

इति द्वितीयस्य षोडशी कण्डिका ॥१६॥

टि० १—ऊनम्मे इत्यस्य गार्ग्य ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता पृषदाज्यहोमे विनियोगः । हे अग्ने ? अनेन पृषदाज्येन मे मम यदूनं तत्पूर्यताम् पूर्णं त्वया क्रिताम् । यच्च मे मम पूर्णं तन्मा व्यगात् विपरीतभावमपूर्णतां मा गच्छतु ।

२—अत्राग्निर्देवतेति गर्ग-वासुदेव-जयरामाचार्याः । हरिहरमिश्रास्तु—"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः" इति छन्दोगपरिशिष्टवचनबलात् प्राकरणिकोमिन्द्रदेवतांबाधित्वा प्रजापतिर्देवतेत्याहुः । गदाधरमते इन्द्रस्य मुख्यत्वादिन्द्र एव देवतेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सीतायज्ञः ॥१॥

व्याख्यास्यते । सीतायज्ञ इति कर्मनाम। यज्ञोऽयं कृषिप्रवृत्तस्य साग्नेर्भवति न निरग्नेः ॥१॥

व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत् ॥२॥

व्रीहयश्च यवाश्च व्रीहियवाः । तेषां मध्ये यत्र यत्र यस्मिन् काले व्रीहिकाले यवकाले वा शरदि वसन्ते वा सीतायज्ञेन यजेत तत्र तन्मयं व्रीहिकाले व्रीहिमयं यवकाले यवमयं स्थालीपाकं चरुमावसथ्येऽग्नौ श्रपयेत् ॥२॥

कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ स्थाली पाकꣳ श्रपयेत् ॥३॥

कामादिच्छया अतोऽन्यत्रापि ईजानो यागं कुर्वन् पत्ताद्रिप्रभृतिषु व्रीहियवयोरेवान्यतरं स्थालीपाकं श्रपयेत् ॥३॥

न पूर्वचोदितत्वात्सन्देहः ॥४॥

परिभाषासूत्रे "व्रीहीन् यवान् वा हविषि" (का० श्रौ० १, ६. १.) इति पूर्वं व्रीहियवयोर्विहितत्वात् सर्वत्र व्रीहियवाभ्यां यागे सिद्धे अत्रापि तेभ्यो यागः प्राप्नोत्येव, न व्रीहियवयोरन्यतरस्य यागसाधनत्वे सन्देह इति किमर्थमिदं सूत्रम् ॥४॥

उत्तरयति—

असंभवाद्विनिवृत्तिः ॥५॥

अनवस्रावितान्तरोष्मपाकविशदविषयप्रसिद्धे तण्डुलपाके चरुशब्दस्य प्रयोगप्रत्ययात् यवपाके तथात्वाभावेन चरुशब्दस्य प्रयोगासंभवात् यवमयस्य चरोस्तद्विधायकशास्त्रस्य च निवृत्तिः स्यात्, अतोऽत्र यवानां स्थालीपाकं कुर्यात् इति पुनरारम्भः । अतः सर्वत्र स्थालीपाको व्रीहीणामेव । यत्र वारुणो यवमयश्चरुः इत्यादौ विशेषविधानं तत्रैव यावश्चरुर्न सर्वत्र । परिभाषासूत्रं तु यवपिष्टे चरितार्थमिति बोध्यम् ॥५॥

क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सस्ययुक्तस्य क्षेत्रस्य पूर्वस्यामुदीच्यां वा दिशि फलस्य सस्यस्य अनुपरोधेन अबाधेन कृष्टे सीरेण विलिखिते शुद्धदेशे सीतायज्ञः कार्यः ॥६॥

ग्रामे वोभयसम्प्रयोगादविरोधात् ॥७॥

अथवा सीतायज्ञो ग्रामे कार्यः। तत्र उभयं प्रयोक्तुं शक्यते फलानुपरोधः, कृष्टं च। न चात्र विरोधः ॥७॥

यत्र अपपयिष्यनुपलिप्तऽ उद्धतावोक्षितेऽग्निमुप समाधाय तन्मिश्रैर्दर्भैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति—

"पृथि[1]वी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः। तमिहेन्द्रमुपह्वये शिवा नः सन्तु हेतयः स्वाहा। यन्मे किञ्चिदुपेप्सितमस्मिन्कर्मणि वृत्रहन्। तन्मे सर्वꣳ समृध्यतां जीवतः शरदः शतꣳ स्वाहा। [2]सम्पत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ श्रीः प्रजामिहावतु स्वाहा। [3]यस्याभावे वैदिकलौकिकानां भूतिर्भवति

१ पृथिवीत्यादीनां पञ्चानां प्रजापतिः आद्ययोरनुष्टुप् तृतीयादिषु क्रमेण प्रतिष्ठा–पङ्क्ति-जगत्यः लिङ्गोक्ता देवता आज्यहोमे विनियोगः—

मन्त्रार्थः—पृथिव्यादि-देवता यस्मै इन्द्राय इन्द्रमुपासितुं स्थिताः। प्रदिशो विदिशः। किम्भूताः द्युभिः कान्तिभिरावृताः पूर्णाः। तमिन्द्रमिह सीतायज्ञे उपह्वये उपह्वानं करोमि। उपहूतस्येन्द्रस्य हेतयो वज्रावायुधानि शिवाः कल्याणकारिण्यः सन्तु तस्मै स्वाहा सुहुतमस्तु ॥

हे वृत्रहन् अस्मिन् कर्मणि (सीतायज्ञे यत्किञ्चिन्मे ममोपेप्सितं प्राप्तुमिष्टं तत्सर्वं शतं शरदः शतं सम्वत्सरान् जीवतः समृध्यताम् समृद्धिं प्राप्नुयात्। तुभ्यं स्वाहा सुहुतमस्तु ॥

२ सम्पत्तिर्धनाद्युपक्रयः, भूतिरैश्वर्यम्, भूमिराश्रयः, वृष्टिमभीष्टतर्पणम्, ज्येष्ठतादिना ज्येष्ठत्वम्, श्रैष्ठ्यं सर्वोपकारित्वम्, श्रीयते सेव्यते सर्वैरिति श्रीः, लाङ्गलपद्धतिः- प्रतिष्ठा सम्पत्त्यादिगणः तं प्राप्तः सन् मदीयां प्रजाम् पुत्रादिकमवतु इन्द्रो वा एतैर्युक्तां प्रजामवतु ॥

३ यस्याः सीतायाः सद्भावे, वैदिकलौकिकानां श्रौतस्मार्तकर्मणां भूतिः सम्पत्तिर्भवति तामिन्द्रपत्नीं सीतामुपह्वये उपह्वानं करोमि। सा सीता मे मम अनपायिनी अदनीयादिवृद्धिकारिणी कर्मणि कर्मणि प्रतिकर्म विशेषाद् भूयात् भवतु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मणाम् । इन्द्रपत्नीमुह्वये सीताᳬ सा मे त्वन्नपायिनी भूयात्कर्मणि कर्मणि स्वाहा । अ[१]श्वावती गोमती सूनृतावती विभर्ति या प्राणभृतोऽ अतन्द्रिता । खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाᳬ सा मे त्वनपायिनी भूयात्स्वाहेति ॥ ८ ॥ ९ ॥

यत्र क्षेत्रे ग्रामे वा चरुं श्रपयिष्यन् भवति तत्र उपलिप्ते उद्धृते स्फयेन उल्लिखिते जलेनाभ्युक्षिते देशेऽग्निमावसथ्यमुपसमाधाय व्रीहिकाले व्रीहिमिश्रैर्यवकाले यवमिश्रैर्दर्भैरग्निं परिस्तीर्य आघाराज्यभागहोमानन्तरमाज्येन आहुतीः प्रतिमन्त्रं जुहुयात् । उपलेपनादिग्रहणं कृष्टेऽपि पञ्चभूसंस्कारप्राप्त्यर्थं नेतरसंस्कारव्यावृत्त्यर्थम् ॥ ८ ॥ ९ ॥

स्थालीपाकस्य जुहोति सीतायै, यजायै, शमायै, भूत्या इति ॥१०॥

'सीतायै स्वाहा' इत्येवं प्रकारेण स्वाहान्तैर्मन्त्रैश्चतस्र आहुतीः स्थालीपाकेन जुहुयात् ॥१०॥

मन्त्रवत्प्रदानमेकेषाम् ॥ ११ ॥ स्वाहाकारप्रदाना इति श्रुतेः ॥१२॥

एकेषामाचार्याणां मते मन्त्रवत् प्रदानम् यथामन्त्रं होमो न तु स्वाहाकारेणेति । कुतः—श्रुतौ हि जुहोतीनां स्वाहाकारप्रदानता श्रूयते । इदं तु न तथा किन्तु स्मार्त्तं कर्म ॥११॥१२॥

विनिवृत्तिः ॥१३॥

---

१ तामेव विशिनष्टि—अश्वावती अश्वा विद्यन्ते यस्यां साऽश्ववती सैवाश्वावती, (दीर्घश्छान्दसः) गावो विद्यन्ते यस्यां सा गोमती, सूनृतं मधुरवाक्यं तिष्ठति यस्यां सा सूनृतवती सैव सूनृतावती, प्राणभृतोऽशेषजीवान् विभर्ति पुष्णाति । अतन्द्रिता आलस्यरहिता सती । खलमालिनी खले धान्यराशिस्थाने मालते शोभते इति तामुर्वरां सर्वसस्याढ्यां ध्रुवाम् स्थिरां तां सीतामस्मिन्कर्मण्युपह्वये । सा मे अनपायिनीःअविध्वंसिनी तु विशेषाद् भूयात् भवतु । तस्यै स्वहेति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वोक्तपक्षस्य मन्त्रवत्प्रदानमित्यस्य विनिवृत्तिर्निरासः । स्मार्तेऽपि कर्मणि—"स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् ।
हन्तकारो मनुष्याणां स्वधाकारः स्वधाभुजाम्" ॥
इति कातीयस्मृतिवचनात् ॥१३॥

स्तरणशेपकूर्चेषु सीतागोप्तृभ्यो बलिर्दि० हरति—"[1]पुरस्ताद्ये तऽ आसते सुधन्वानो निषङ्गिणः । ते त्वा पुरस्ताद् गोपायन्त्वप्रमत्ताऽ अनपायिनो नमऽ एषां करोम्यहं बलिमेभ्यो हरामीममिति ॥१४॥

अथ दक्षिणतोऽनि[2]मिषा वर्मिणऽआसते । ते त्वा दक्षिणतो गोपायन्त्वप्रमत्ता ऽअनपायिनो नम ऽएषां करोम्यहं बलिमेभ्यो हरामीममिति ॥१५॥

अथ पश्चात्—[3]आभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिः । ते त्वा पश्चाद् गोपायन्त्वप्रमत्ता ऽअनपायिनो नम ऽएषां करोम्यहं बलिमेभ्यो हरामीममिति ॥१६॥

अथोत्तरतः—भी[4]मा वायुसमा जवे । ते त्वोत्तरतः क्षेत्रे

१—पुरस्ताद्ये इत्यादीनां चतुर्णां परमेष्ठी ऋषिः यजुश्छन्दो लिङ्गोक्ता देवता बलिहरणे विनियोगः ।

हे सीते ? ये देवाः सुधन्वानः शोभनधनुष्मन्तः निषङ्गिणः सतूणीराः ते तव पुरस्ताद् पूर्वभागे आसते तिष्ठन्ति ते त्वां पुरस्ताद् प्राच्यां दिशि गोपायन्तु रक्षन्तु । किम्भूताः अप्रमत्ताः सावधानाः । अनपायिनः कष्टहराः । अहं च एषां देवानां देवेभ्यो नमस्करोमि । एभ्य इमं बलिं हरामि ॥

एवम्—दक्षिणतस्तव दक्षिणपार्श्वे ये अनिमिषाः निमेषमकुर्वाणाः वर्मिणः सन्नद्धाः शेषं समानम् । अथैवम् पश्चिमायां दिशि आभुवः आसमन्ताद्भवाः, प्रभुवः प्रकृष्टेन भवाः, तानेवाह—भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिरित्येवं नामानः । शेषं समानम् । अथैवमुत्तरत उत्तरपार्श्वे भीमाः भीषणाः । जवे वेगे वायुना समास्ततुल्याः । क्षेत्रे खले गृहे अध्वनि वा वर्तमानां त्वा त्वाम् गोपायन्तु । शेषं समानम् ॥१४,१५,१६,१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खले गृहेऽध्वनि गोपायन्त्वप्रमत्ताऽ अनपायिनो नमऽ एषां करोम्यहं बलिमेभ्यो हरामीममिति ॥१७॥

अग्नेः परिस्तरणे ये कुशा व्रीहिमिश्रा वा शेषभावमङ्गभावं प्राप्तास्त एव कूर्चेषु आसनेषु अर्थात् परिस्तृतकुशोपर्येव सीता लाङ्गल-पद्धतीर्यें देवा गोपायन्ति तेभ्यो देवेभ्योऽर्थं पूर्वादिक्रमेण मन्त्रचतुष्टयेन बलिं स्थालीपाकेन ददाति ॥१४॥१५॥१६॥१७॥

प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म ॥१८॥

प्रकृतात् प्रधानभागसंबन्धिनः सिद्धो लौकिको गृहीतश्चरुः तस्मात्, आज्यशेषेण च पूर्ववत् इन्द्रपर्जन्यादिभ्यो लाङ्गलयोजनदेवताभ्यो बलि-हरणं कार्यम् ॥१८॥

स्त्रियश्चोपयजेरन्नाचरितत्वात ॥१९॥

यजमानस्य स्त्रियो भार्यादिका अपि बलिपटलकेन (कल्माषौदनादिना) बलिहरणम् । कुतः ? प्राचीनाभिः स्त्रीभिर्बलिकर्मणः कृतत्वात् । अतो वृद्धव्यवहारेण स्त्रीभिरपि बलिकर्म अनुष्ठेयम् ॥ १९ ॥

सꣳस्थिते कर्मणि ब्राह्मणान् भोजयेत सꣳस्थिते कर्मणि ब्राह्मणान भोजयेत ॥२०॥

द्विरभ्यासः काण्डसमाप्तिसूचनार्थः ॥२०॥

इति द्वितीयस्य सप्तदशी कण्डिक ॥१७॥

समाप्तं चेदं द्वितीयं काण्डम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ तृतीयं काण्डम् ।

अनाहिताग्नेर्नवप्राशनम् ॥१॥

आहिता अग्नयो येन स आहिताग्निः न आहिताग्निः अनाहिताग्निः तस्य अनाहिताग्नेः अकृतश्रौताधानस्य अर्थात् आवसथ्याग्निमतः नवप्राशनम् नवं च तत् प्राशनं नवप्राशनम् नवान्नप्राशनाख्यं कर्म व्याख्यास्यते । एतत्कर्म कृत्वैव नवमन्नं प्राशनीयं नाकृत्वेत्यर्थः ॥१॥

नवᳬ स्थालीपाकᳬ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति ॥२॥

शरदि नूतनं व्रीहिमयं, वसन्ते नूतनं यवमयं स्थालीपाकं चरुं श्रपयित्वा आज्यभागौ इष्ट्वा आज्याहुती द्वे घृताहुती 'शतायुधायेति' वक्ष्यमाणमन्त्राभ्यां जुहोति ॥२॥

(१) शतायुधाय शतवीर्याय शतोतयेऽ अभिमातिषाहे ।
शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा ॥१॥
(२) ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।

---

(१) मन्त्रार्थः—द्वयोः प्रजापतिस्त्रिष्टुप् आद्यस्येन्द्रः परस्य विश्वे देवा आज्य होमे विनियोगः ।

स इन्द्रो नोऽस्मान् शतं शरदो वर्षाणि अजीजान् जीवयतु । यद्वा नोऽस्मभ्यं धान्यं जनयतु । स नोऽस्माकं दुरितानि दुर्व्यसनानि पापानि वा विश्वा विश्वानि सर्वाणि अतिनेषत् अतिनेष्यति । तस्मै स्वाहा सुहुतमस्तु । किंभूताय शतायुधाय शतमपरिमितान्यायुधानि यस्य तस्मै । तथा शतवीर्याय अपरिमितशक्तये । तथा शतोतये अनन्तलीलाय । तथा अभिमातिषाहे अभिमातयः अरातयः तान् सहते जयतीत्यभिमातिषाट् तस्मै ॥१॥

(२) हे सर्वे देवाः ये चत्वारः पथयः पन्थानः देवपितृमनुष्यसर्पाणां मार्गाः देवयाना देवनं क्रीडां सम्पादयन्तः । देवादिभिर्गम्यमाना वा । अन्तरा द्यावापृथिवी । द्यावापृथिव्योर्मध्यस्थाः । पृथिवीशब्देनात्र पृथ्वीतलं लक्ष्यते । वियन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषां योऽज्यानिमजीजिमावहात्तस्मै
नो देवाः परिधत्तेह सर्वे स्वाहेति ॥३॥

स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति, स्विष्टकृते च [1]स्विष्टमग्नेऽ अभि तद् पृणीहि विश्वांश्च देवः पृतनाऽ अविष्यत्। सुगन्नु पन्थां प्रदिशन्नऽ एहि ज्योतिष्मद्धेह्यजरन्नऽ आयुः स्वाहेति ॥४॥

अथ स्थालीपाकस्य स्थालीपाकेन चरुणा आग्रयणस्य देवताः आग्रयणदेवताः ताभ्यः आग्रयणदेवताभ्य इन्द्राग्नी, विश्वे देवा, द्यावापृथिवी, इत्येताभ्यः प्रत्येकम् एकैकामाहुतिं हुत्वा स्विष्टमग्न इत्यनेन मन्त्रेण स्विष्टकृद्धोमात् पूर्वं चकारात् पश्चाच्चाज्याहुतिं जुहोति। मध्ये स्थालीपाकेन सौविष्टकृतं स्विष्टमग्न इति मन्त्रेण। स्विष्टकृद्धोमस्य उभयत आज्याहुती भवत इत्यर्थः ॥४॥

वियत्तुल्याः अतिनिर्मला इत्यर्थः। यद्वा विविधत्वं यन्ति भिन्नत्वेनेत्यर्थः। तेषां चतुर्णां पथां मध्ये यः पन्था अजीजिम् अजेयत्वम् परैरनभिभवनमिति यावत्। आवहात् आवहेत् प्रापयेत्, तस्मै पथे नोऽस्मान् परिधत्त परिदत समर्पयतेत्यर्थः। तं पन्थानम् अस्मान् प्रापयतेत्यर्थः। इह अस्मिन् कर्मणि कृते सति अनेन कर्मणा सन्तोषम्प्राप्येत्यर्थः। किम्भूतामजीजिम्। अज्यानिम् ज्यानिर्ग्लानिः हानिर्वा तद्रहितां क्षेमेणाभीष्टपदप्राप्तिहेतुमित्यर्थः। युष्मभ्यं स्वाहेत्युक्तार्थम् ॥२॥

(१) मन्त्रार्थः—प्रजापतिर्विराडग्निराज्यहोमे विनियोगः।

हे अग्ने प्रजापते यत् स्विष्टं स्विष्टकृते हुतं तत् अभि अभितः, उभयत आदावन्ते च पृणीहि पूर्णं कुरु। देवः प्रकाशात्मा विश्वान् सकलपरिवारयुतान् अस्मान् अविष्यत् अवतु।

किम्भूतान् पृतनाः सेनाः तद्वत् परिचारकानित्यर्थः। यद्वा पृतना इति पञ्चम्यर्थे प्रथमा। तेन पृतनाभ्यः शत्रुसेनाभ्योऽस्मानवत्विति। किञ्च नोऽस्माकं सुगं सुखगम्यम् अर्चिरादिरूपं पन्थां पन्थानं प्रदिशन् उपदिशन् एहि आगच्छ। नु एत्रार्थे। किञ्च—नोऽस्मभ्यम् ज्योतिष्मत् प्रकाशयुक्तम् कीर्तियुक्तमजरम् जरा रोगाद्युपद्रवः तद्रहितमायुर्धेहि चिन्तय आशंसेत्येर्थः। यद्वा धेहि देहीत्यर्थः। तुभ्यं स्वाहेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ प्राश्नाति—

[1]अग्निः प्रथमः प्राश्नातु स हि व्वेद यथा हविः । शिवाऽ अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वया वशेन समशीमहि त्वा । स नो मयोऽभूः पितोऽ आ विशस्व शं तोकाय तनुवे स्योन इति ॥५॥

अथ महाव्याहृतिहोमानन्तरं अग्निः प्रथमः इत्यादि 'तन्मे स्योन' इत्यन्तेन ऋग्द्वयात्मकेन मन्त्रेण प्राश्नाति संस्रवम् ॥५॥

अन्नपतीयया वा ॥ ६ ॥

अथवा अन्नं पतिर्देवता यस्याः सा अन्नपतीया ऋक् तया अन्नपतीयया ऋचा अन्नपतेऽन्नस्येत्यादिकया प्राश्नाति । अन्नपतिशब्दो यस्यामृचि अस्ति सा अन्नपतीया इति वाऽर्थः ॥ ६ ॥

१—मन्त्रार्थः—प्रजापतिः क्रमेणानुष्टुप् त्रिष्टुभौ जाठरोऽग्निः संस्रवप्राशने विनियोगः—

इदं हविरग्निर्जाठरः प्रथमो मुख्यः प्राश्नातु भुनक्तु । स एवाग्निः हि यतः यथा यादृशं पावनं पोषणं वा इदं हविर्वेद जानाति । अतोऽस्मभ्यमोषधीर्ग्राम्या आरण्याश्च शिवाः सुखकरीः कृणोतु करोतु । किंभूतः विश्वचर्षणिः सर्वधान्याधिपः । हे देवाः इन्द्रादयः यूयम् नोऽस्मान् प्रति श्रेयः नवान्नप्राशनभवमारोग्यं समनैष्ट सम्यक् प्रापय । किम्भूतान् भद्रान् भन्दनीयान् युष्मत्प्रसादेन नवान्नप्राशनार्हान् । किञ्च हे पितो अन्नत्वोहे वयं त्वत्प्रसादप्राप्तसामर्थ्यास्त्वा त्वां समशीमहि सम्यक् संस्कृतमेवाशीमहि अश्नाम । केन साधनेन त्वया अनुग्राहकेण । त्वत्प्रसाद एव तत्र कारणमित्यर्थः । किम्भूतेन त्वया अवशेन अनधीनेन । किञ्च हे पिता अन्न स त्वमेवं विधिना प्राशितः सन् नोऽस्मान् आविशस्व बलादिहेतुत्वेनास्मद् कुक्षिं प्रविशस्व । किञ्च मयोभूः मयः सुखं तद्रूपोऽभूः भव । तथा शं कल्याणाय तथा तोकाय अपत्याय तथा तनुवे शरीरावयवपालनाय स्योनः परिणामेन सुखकरः सेवनीयो वा अभूर्भव ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ यवानाम्-[1]'एतमु त्यं मधुना संयुतं यवꣳ॰सरस्वत्याऽअधि वनाय चकृषुः । इन्द्रऽआसीत् सीरपतिः शतक्रतुः कीनाशाऽआसन् मरुतः सुदानव इति ॥ ७ ॥

अथ व्रीहिप्राशनमन्त्राभिधानानन्तरं यवानां प्राशने मन्त्रमाह—अथेति ॥ ७ ॥

ततो ब्राह्मणभोजनम् ॥८॥

कारयेदिति शेषः ॥८॥

इति तृतीयस्य प्रथमा कण्डिका ॥१॥

आग्रहायणी कर्मनिरूपणम्

मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म ॥१॥

मृगशीर्षानक्षत्रेण युक्ता पौर्णमासी मार्गशीर्षा, तस्यां मार्गशीर्ष्याम् आग्रहायण्याम् पौर्णमास्याम् आग्रहायणीसंज्ञं कर्म भवति ॥१॥

स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति—

१—प्रजापतिर्जगती इन्द्रो यवान्नप्राशने विनियोगः।

उ एवार्थे। एतम् एतत् प्रत्यक्षम् त्यं त्यत् परोक्षम् अन्नम् यु मिश्रणे यौति लीयतेऽस्मिन्निति यवः परमात्मा तत्प्राप्तिसाधनत्वादयममपि यवः। तं यवं मरुतो देवविशेषाः सरस्वत्याः सर इत्युदकनाम तद्वत्या नद्या अधिवनाय उपरि वनेषु केदारेषु चकृषुः कृष्टवन्तः। यद्वा सरोऽस्यामस्तीति सरस्वती पृथिवी तस्या अधि उपरि वनाय सम्भाजनाय पञ्चमहायज्ञाद्यर्थमित्यर्थः। किम्भूतं मधुना मधुररसेन संयुक्तम्। अथवा एतं त्वं पदार्थं जीवं त्यं तत्पदार्थं परं ब्रह्म तत् यवं मिश्रीभूतमेकत्वमापन्नं कर्मभूमौ वनाय अतन्निरसनाय चकृषुः आकृष्टवन्तः उपाददुरित्यर्थं। तत् साधनत्वेन प्रथममिदमपि कर्म चक्रुरिति विवक्षितम्। तत्र किमित्यत आह—यत्र इन्द्रः शतक्रतुः अतः सीरस्य लाङ्गलस्य पतिरासीद् बभूव। मरुतश्च कीनाशाः कृषीवलाः कर्षका इत्यर्थः। सुदानवः शोभनस्य भोजादेर्दानवः दातारः आसन् बभूवुः, तदनेन यवोत्पत्तिः प्रशस्यते ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१) यां जनाः प्रति नन्दन्ति रात्रीन्धेनुमिवायतीम् ।
संवत्सरस्य या पत्नी सा नोऽ अस्तु सुमङ्गली स्वाहा ।

(२) संवत्सरस्य प्रतिमा या ताᳬं रात्रीमुपास्महे ।
प्रजाᳬं सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा ।

(३) संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः । तेषां वयᳬं सुमतौ यज्ञियानां ज्योग् जीताऽ

तत्र स्थालीपाकं चरुं श्रपयित्वा श्रवणाकर्मणि यथा द्वे आज्याहुतीं हुता तथाऽत्र अपश्वेतपदा जहीति द्वाभ्यां मन्त्राभ्यां हुत्वा ततोऽनन्तरमपराः यां जना इत्यादिभिश्चतस्र आज्याहुतीर्जुहोति ॥२॥

१—मन्त्रार्थः—यां जना इति द्वयोः प्रजापतिरनुष्टुप् रात्रिराज्यहोमे विनियोगः ।
तत्र धेनुरूपेण तावद्रात्रिः प्रस्तूयते—

यां रात्रीम् आयतीम् आगच्छन्तीम् जनाः सन्तः प्रतिनन्दन्ति प्रजाप्यायनदात्रीत्वेनाद्दत्य हृष्टाः समर्द्धयन्ति । वनादागच्छन्तीं धेनुमिव । या च रात्री संवत्सरस्य प्रजापतेः पत्नी यज्ञसंयोगभाग् । "पत्युर्नो यज्ञसंयोगे" इति स्मरणात् । 'संवत्सरो वै यज्ञ' इति श्रुतेः । धेनुपक्षे संवत्सरस्य पत्नीत्वं प्रजापालयित्रीत्वेन । स्वाहेत्युक्तार्थम् । सा रात्रिर्नोऽस्माकं सुमङ्गली शोभनकल्याणकीर्त्री अस्तु भूयात् ॥

२—या रात्री संवत्सरस्य प्रतिमा आकृतिर्जायेति यावत् "अर्द्धो वा एष आत्मनो यज्जायेति" श्रुतेः । अहोरात्रे हि संवत्सरस्य शरीरम् । तद्भावभावात् । तां रात्रीमुपास्महे आराधयामः । तत्फलमाह—प्रजां पुत्रादिरूपां सुवीर्यां शोभनैश्वर्यां दीर्घमखण्डितमायुश्च व्यश्नवै प्राप्नवानि स्वाहेत्युक्तार्थम् ।

३—संवत्सरायेति द्वयोर्विराट् ऋषिः त्रिष्टुप् प्रथमस्य संवत्सरादिपञ्चदेवता द्वितीयस्यार्तव आज्यहोमे० । ये स्तोतारो भवन्तो याभ्यः संवत्सरादिसंज्ञिकाभ्यः कालविशेषदेवताभ्यो बृहत् महत् यथा तथा नमः नमस्कारं कृणुते कृण्वते हविः समर्पयन्तीत्यर्थः तासां च प्रसादात् सुमतौ शोभनबुद्धौ वर्तमाना वयं ज्योक् चिरं जीताः दोषाणां दुष्टानां च जेतारः अहताः अनुपहताः स्याम भवेमेति प्रार्थना । किम्भूतानाम् यज्ञियानां यज्ञार्हाणाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहताः स्याम स्वाहा ॥ ग्रीष्मो हेमन्तऽ उत नो वसन्तः शिवा वर्षाऽ अभया शरन्नः । तेषामृतूनाꣳ शतशारदानां निवातऽ एषामभये वसेम स्वाहा' इति ॥२॥

स्थालीपाकस्य जुहोति–सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति ॥ ३ ॥

ततः स्थालीपाकेन सोमायेत्यादिभिश्चतुर्भिर्मन्त्रैः स्वाहान्तैश्चतस्र आज्याहुतीर्जुहोति ॥३॥

प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्या मार्जनात् ॥४॥

ततः स्विष्टकृत्प्रभृति प्राशनान्ते संस्रवप्राशनान्ते कृते वलिहरणार्थं सक्तुशेषं शूर्पे कृत्वा उपनिष्क्रमणादि आ मार्जनात् द्वारदेशे मार्जनं यावत् श्रवणाकर्मवत् कुर्यात् ॥४॥

मार्जनान्तऽ उत्सृष्टो वलिरित्याह ॥५॥

मार्जनस्य अन्तं मार्जनान्तम् तस्मिन् मार्जनान्ते मार्जनावसाने उत्सृष्टो वलिरिति वचनं ब्रूयात् ॥५॥

॥ एतावदाग्रहायणीकर्म ॥

स्रस्तरारोहणनिरूपणम् ।

पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुताऽ अहत वाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथा कनिष्ठमुत्तारतः ॥६॥

---

(४) ग्रीष्मो हेमन्तः । उत अप्यर्थे । वसन्तोऽपि नोऽस्माकं शिवाः कृतो भवन्तु । तथा वर्षाः शिवाः सन्तु । शरच्च नोऽस्माकमभया नीरुक् अस्तु । तेषां ग्रीष्माद्यधिष्ठातॄणां प्रसादाद्व वयम् एषाम् संवत्सरादीनां निवाते अन्तर्हितप्रदेशे आश्रये वा अभये निर्भये वसेम तिष्ठामेत्यपि प्रार्थना । किम्भूतानां शतशारदानाम् शतवर्षसंवन्धिनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पश्चादग्नेः आवसथ्यस्य पश्चिमप्रदेशे प्रागग्रैः कुशैः स्रस्तरमास्तीर्य विरचय्य अहतं च वसनं सकृत् प्रक्षालितं वस्त्रं तदुपरि आस्तीर्य आप्लुताः स्नाताः अहते वाससी येषां ते अहतवाससः स्वामिप्रभृतयः प्रत्यवरोहन्ति स्रस्तरं निविशन्ते । कथं प्रत्यवरोहन्ति सर्वेषां दक्षिणतः स्वामी गृहपतिर्भवति, तस्योत्तरा जाया-पत्नी, तस्या उत्तरतः अपत्यानीति-शेषः । कथम् । यथाकनिष्ठम् कनिष्ठमनतिक्रम्य यथाकनिष्ठम् यो यस्मात् कनिष्ठः स तदुत्तरत इति ॥ ६ ॥

दक्षिणतो ब्रह्माणमुपवेश्योत्तरतऽ उदपात्रꣳ शमीशाखा सीतालोष्ठाश्मनो निधायाग्निमीक्षमाणो जपति 'अयमग्निर्वीर-तमोऽयं भगवत्तमः सहस्रसातमः । सुवीर्योऽयꣳ श्रैष्ठ्यं दधातु नाविति ॥ ७ ॥

तत्र स्वामी स्रस्तरं प्रत्यवरोहयन् दक्षिणतोऽग्नेर्ब्रह्माणं यथाविध्यु-पवेश्य उत्तरत उदपात्रं जलपूर्णभाजनम् शमीवृक्षस्य शाखां सीतां लोष्ठं हलपद्धतिभवं मृच्छकलम् अश्मानं प्रस्तरं निधाय स्थापयित्वा अग्नि-मीक्षमाणः आवसथ्यं पश्यन् अयमग्निर्वीरतम इत्येतं मन्त्रं जपति ॥७॥

पश्चादग्नेः प्राञ्चमञ्जलिं करोति ॥८॥

अग्नेः पश्चिमतः स्थित्वा प्रागग्रमञ्जलिं करसम्पुटं निदधाति ॥८॥

दैवीं नावमिति तिसृभिः स्रस्तरमारोहन्ति ॥९॥

"दैवीं नावमित्यारभ्य मध्वा रजाꣳसि सुक्रतू' इत्यन्ताभिस्तिसृभि-र्ऋग्भिः स्रस्तरं यथोक्तमारोहन्ति ॥९॥

ब्रह्माणमामन्त्रयते ब्रह्मन् प्रत्यवरोहामेति ॥१०॥

तत्र स्वामी ब्रह्माणमामन्त्रयते पृच्छति । कथम् ? । ब्रह्मन् प्रत्यवरोहा-मेति वाक्येन ॥१०॥

---

१ मन्त्रार्थः—प्रजापतिरनुष्टुप् अग्निस्तदुपस्थाने विनियोगः ।

अयम् आवसथ्याग्निर्वीरतमः अचिन्त्यशक्तिः भगवत्तमः ऐश्वर्यादिषड्गुणाश्रयः सहस्रं सन्वते ददतीति सहस्रसातमः नानार्थप्रदमुख्यः । सुवीर्यं शोभनमेव वीर्यं यस्य सोऽयं नौ आवाम् जायापती सपरिकरौ श्रैष्ठ्यं श्रेष्ठे कर्मणि दधातु स्थापयतु ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मानुज्ञाताः प्रत्यवरोहन्ति [1]आयुः कीर्तिर्यशो बलमन्नाद्यम्प्रजामिति ॥११॥

ब्रह्मणाऽनुज्ञाता ब्रह्मानुज्ञाताः (प्रत्यवरोहध्वम्, इति वाक्येन) ब्रह्मणाऽनुज्ञाताः प्रसूताः प्रत्यवरोहन्ति स्रस्तरमधि तिष्ठन्ति आयुः कीर्तिरित्यादिमन्त्रेण ॥११॥

उपेता जपन्ति—

सुहेमन्तः सु[२] वसन्तः सु ग्रीष्मः प्रति धीयतान्नः । शिवा नो वर्षाः सन्तु शरदः सन्तु नः शिवा इति ॥१२॥

तत्र ये उपेता उपनीतास्ते स्रस्तरमारुह्य सुहेमन्त इत्यादिकं मन्त्रं जपन्ति ॥१२॥

स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति ॥१३॥

स्रस्तरमारुह्य स्योना पृथिवीत्यनेन मन्त्रेण स्वामी जाया अपत्यानि प्राक्शिरसः प्राक् शिरो येषां ते प्राक्शिरसः पूर्वस्यां दिशि शिरांसि निधाय दक्षिणपार्श्वैः उदङ्मुखाः संविशन्ति स्वपन्ति शेरते स्रस्तरोपरीत्यर्थः॥१३॥

उपोदुत्तिष्ठन्ति [1]उदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या

१—आसुरी गायत्री लिङ्गोक्ता आरोहणे विनियोगः।

मन्त्रार्थः—आयुः आरोहेम लभेम इति प्रार्थना। एवम् कीर्तिमारोहेम लभेम। यशः आरोहेम। बलम् आरोहेम। अन्नाद्यम् आरोहेम। प्रजाम् आरोहेम लभेम इति ॥११॥

२—आश्वलायनः पङ्क्ति ऋतवो जपे विनियोगः।

नोऽस्माकं सु शोभनो हेमन्तः प्रतिधीयताम् सम्पद्यताम् तथा वसन्तः सु शोभनः सम्पद्यताम्। नः अस्माकम् वर्षाः शिवाः सन्तु—तथा शरदः नः अस्माकं शिवाः सन्तु इति ॥१२॥

१—गौतमी, गायत्री, अग्निः उत्थाने विनियोगः।

मन्त्रार्थः—उदायुषा दीर्घायुषा तथा स्वायुषा शोभनजीवितेन उत् उत्कृष्टस्य पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तभिर्धामभिः श्रेष्ठस्थानैः सह भवामेति प्रार्थना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथिव्याः सप्त धामभिरिति ॥१४॥

उप स्रस्तरसमीपे उदु तिष्ठन्ति उत्थाय तिष्ठन्तीत्यर्थः । उपपदमनर्थकम् । उदायुषा स्वायुषोत्पर्जग्यस्येति मन्त्रेण स्रस्तरात् ॥१४॥

एवं द्विरपरं ब्रह्मानुज्ञाताः ॥१५॥

एवम् उक्तप्रकारेण ब्रह्मन् प्रत्यवरोहामेत्यारभ्य उत्थानपर्यन्तं ब्रह्मानुज्ञाताः सन्तो द्विरपरम् अन्यत् स्रस्तरम् आरोहन्ति संविशन्ति उत्तिष्ठन्ति च ॥१५॥

अधः शयीरंश्चतुरो मासान् यथेष्टं वा॥१६॥

अत ऊर्ध्वं चतुरो मासान् पौषादीन् अधः खट्वां व्युदस्य भूमौ शयीरन् गृहपतिप्रमुखाः । यथेष्टं वा अथवा इष्टमनतिक्रम्य यथेष्टम् यथाकामम् अधो वा खट्वायां वा शयीरन्निति विकल्पः ॥१६॥

इति तृतीयस्य द्वितीया कण्डिका ॥२॥

अष्टका-निरूपणम् ।

ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः ॥१॥

आग्रहायण्याः मार्गशीर्ष्याः पूर्णिमायाः ऊर्ध्वमुपरि तिस्रः अष्टकाः त्रीणि अष्टकाख्यानि कर्माणि श्राद्धानि भवन्ति "हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका" इत्यश्वलायनगृह्यम् । अश्नन्ति पितरोस्यामित्यष्टका पितृदेवत्या तिथिः ॥१॥

ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येति ॥२॥

तत्र प्रथमा अष्टका पौषकृष्णाष्टमी ऐन्द्री । इन्द्रो देवता अस्या इति ऐन्द्री इन्द्रदेवत्येत्यर्थः । द्वितीया माघकृष्णाष्टमी वैश्वदेवी, विश्वे देवा देवता अस्या इति वैश्वदेवी विश्वेदेवदेवत्येत्यर्थः । तृतीया फाल्गुनकृष्णाष्टमी प्राजापत्या प्रजापतिर्देवता अस्या इति प्राजापत्या प्रजापतिदेवत्येति यावत् । चतुर्थी चैत्रकृष्णाष्टमी (आश्वलायनानाम्) पित्र्या पितरो देवता अस्या इति पित्र्या पितृदेवत्येत्यर्थः । मध्यावर्ष इति वक्ष्यमाणत्वादाश्विनकृष्णाष्टम्यां चतुर्थी अष्टका । तिस्र इत्युपक्रम्य चतुर्थ्या अभिधानमयुक्तमिति चेन्न ? तिसृणां देवताभिधानावसरे चतुर्थ्या अपि देवताया आचार्यस्य बुद्धिस्थत्वेन तदभिधानात् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपूपमांसशाकैर्यथासंख्यम् ॥३॥

अपूपश्च मांसं च शाकाश्च अपूपमांसशाकास्तैः अपूपमांसशाकैः, संख्यामनतिक्रम्य यथासङ्ख्यं यजेत इत्यध्याहारः। चतुर्थ्यामपि शाको द्रव्यम्। अत्र मांसादीनामुपकरणत्वेनान्वयः। प्रधानद्रव्यं अपूपादिकमस्त्येव ॥३॥

प्रथमाष्टका पक्षाष्टम्याम् ॥४॥

प्रथमा आद्या अष्टका अष्टकाख्यं कर्म पक्षाष्टम्यां पौषकृष्णाष्टम्यां भवति ॥४॥

स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति—

(१)त्रिꣳशत् स्वसारऽ उपयन्ति निष्कृतꣳ समानं केतुं प्रति मुञ्चमानाः। ऋतूँ स्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा ॥५॥

स्थालीपाकं चरुं श्रपयित्वा उक्तविधिना संसाध्य आज्यभागौ हुत्वा दशाज्याहुतीः त्रिंशत्स्वसार इत्यादिभिः दशभिर्मन्त्रैर्जुहोति ॥५॥

(२) ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य

१—त्रिंशदित्यादिदशानां प्रजापतिस्त्रिष्टुप् अष्टम्या अनुष्टुप् लिङ्गोक्ता आज्यहोमे०।

अष्टकायास्तदधिष्ठात्रिदेवतायाः त्रिंशत्तिथयः स्वसारो भगिन्यः। ताश्च अष्टकाया उप समीपं यन्ति गच्छन्ति हविर्भागग्रहणाय। मुख्यत्वादष्टकायास्तद्द्वारा ता अपि प्राप्नुवन्तीत्यर्थः। किम्भूताः निष्कृतं शुद्धं समानं तुल्यं केतुं चिह्नं चन्द्रादिरूपं प्रतिमुञ्चमाना धारयन्त्यः। ऋतून् हेमन्तादीन् तन्वते सम्भूय विस्तारयन्ति। पुनः किंभूताः कवयः क्रान्तदर्शनाः। प्रजानतीः पूर्वकालस्वरूपं जानानाः। छादनात् व्यापकत्वात् छन्दो वत्सरः तस्य मध्ये परियन्ति आवर्तन्ते। कीदृश्यः भास्वतीः दीप्तिमत्यः। ताभ्यः स्वाहा सुहुतमस्तु इति सर्वत्र समानम् ॥१॥

२—या रात्री ज्योतिष्मती आप्यायनद्वारा ओज आदिकर्त्री नक्षत्रप्रचुरा वा, देवी देवता रूपा संसारचक्रे क्रीडन्तीति वा। नभ आकाशं प्रतिमुञ्चते आवृणोति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रतानि । वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्याऽ उपस्थे स्वाहा ॥

(१) एकाऽष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून् व्यसहन्त देवी हन्तासुराणामभवच्छचोभिः स्वाहा ॥

(२) अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छऽ एतत् । भूयासमस्य सुमतौ यथा यूयमन्या वो ऽअन्यामति मा प्रयुक्त स्वाहा

एतेन स्वरूपं व्याख्यातम् । सूर्यस्य व्रतानि दिवसोचितकर्माण्यप्याप्नोति न प्रवर्तन्त इत्यर्थः । यस्यां रात्र्यां पशवो गवादयः अस्याः मातुः पृथिव्या उपस्थे-उपरि स्थितं वस्तु विशेषेण पश्यन्ति । "द्यौः पिता पृथिवी माते" ति श्रुतेः । किम्भूताः पशवः । नानारूपाः विडालाद्यनेकभेदभिन्नाः । जायमाना उत्पद्यमाना अपि । जन्मदिनमारभ्येत्यर्थः ॥२॥

१—एकाऽष्टका चतुर्थी या वर्षासु प्रसिद्धा सा तप्यमाना तपसा शास्त्रविहितधर्मेण गर्भं श्रेयः प्राप्त्युपायविशेषरूपम् इन्द्रं परमैश्वर्ययुक्तम् । महिमानं महान्तमप्रतिहर्तामित्यर्थः । जजान जानितवती । तेन गर्भेण देवा इन्द्राद्या दस्यून् प्रतिपचान् व्यसहन्त पराजितवन्तः । यद्वा तान् विशेषेण स्वपहारमसहन्त असहायन्त । अन्तर्भूतोऽत्र णिच् बोद्धव्यः । यश्च गर्भः शचीभिः स्वनुष्ठितकर्मभिः असुराणामपकारिणां शत्रूणां हन्ता हिंसकोऽभवत् अभूत् । शचीति कर्मणो नामधेयं गणे पठ्यते॥१॥

२—या माघ्याः पौर्णमास्या उपरिष्टादष्टका तत्राष्टमी ज्येष्ठया सम्बध्यते । साऽप्येकाष्टकेत्याचक्षते । अथाष्टका स्वभगिनीः प्रत्याह । हे रात्र्यः ! यूयमात्मगुणैः कृत्वा अनुजाम् कनीयसीमपि माम् अनानुजाम् न अनुजा अनानुजा ताम् अनानुजाम् । दीर्घश्छान्दसः । ज्येष्ठाम् अकर्त कृतवत्यः । अहं च सत्यं युष्मत्कृतमुपकारं यथार्थं वदन्ती कीर्तयन्ती सती एतत् अनानुजात्वमन्विच्छे शिरसि धारये । यथाऽस्य यजमानस्य सुमतौ शोभनमतिप्रदाने भूयासम् भवेयम्, तथा यूयमप्येवंविधा भवथ । किन्तु युष्मान् प्रति ब्रवीमि । वो युष्माकं मध्ये अन्या रात्रयः अन्यां रात्रीं अति अतिक्रम्य मा प्रयुक्त प्रतिपचा भूत्वा यजमानकार्यं मा विच्छेदयन्तु मिथोऽनुरागवत्यो भूत्वा यजमानकार्यं संसाधयन्त्वित्यर्थः ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१)अभून्मम सुमतौ विश्ववेदा ऽआष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूममन्या वोऽ अन्यामति मा प्रयुक्त स्वाहा

(२)पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्च नाम्नीमृतवोऽनु। पञ्चदिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकंᳫं स्वाहा॥

(३) ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं विभर्ति। सूर्यस्यैका चरति निष्कृतेषु धर्मस्यैका सवितैकान्नियच्छतु स्वाहा ।

(४) या प्रथमा व्यौच्छत्व सा धेनुरभवद्यमे ।

१—हे भगिन्यः मम सुमतौ शोभननिष्ठायां वर्तमानोऽयं यजमानः विश्ववेदाः सर्वधनोऽभूत्व भवतु । विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य सः। किञ्च प्रतिष्ठां सम्यक् स्थितिम् उत्कर्ष वा आष्ट अश्नुताम् । गाधञ्चाभिलाषाम् । अविदत्व विन्दन्तु । हि शब्द एवार्थे । भूयासमित्याद्युक्तार्थम् ॥१॥

२—या पञ्च रात्रीः व्युष्टीः उपसोऽनुगताः। तत्स्वरूपमाह—पञ्च दोहाः यजमानस्याधिकारादिरूपा दोहाः दोह्या यासां ताः । तथा गां संवत्सरात्मिकां पञ्चनाम्नीं संवत्सरपरिवत्सरेदावत्सरेद्वत्सरवत्सराख्याम् । अथवा "तन्द्रा भद्रा च सुरभी सुशीला सुमनास्तथे"ति शिवधर्मप्रतिपादतनाम्नीम् । यस्याः पञ्च ऋतवो ऽनुगता वत्साः । किञ्च—दिशः पूर्वाद्या ऊर्ध्वान्ताः पञ्चदशेन स्तोमेन क्लृप्ताः समर्थीकृताः। समानमूर्ध्नीः समानस्तुल्यो मूर्धा मस्तको यासां ताः। मूर्द्धा चादित्यः एकमधिलोकम् लोकस्य पृथिव्याख्यस्य अधि उपरि द्वितीयान्तानुपाकर्तुं प्रथमान्ताः पदार्थाः कर्मार्थं क्लृप्ताः। ताभ्यः स्वाहेत्युक्तार्थम् ॥२॥

३-या रात्रिः ऋतस्य यज्ञस्य सत्यस्य वा ब्रह्मणो वा गर्भ आश्रयः कारणं वा। प्रथमा आद्या। सायं प्रातरित्यादिप्रथमत्वनिर्देशात् । व्युषिषी अन्धकारमपनयन्ती एका कृष्णा। अपां जलानां महिमानं महत्वं चन्द्रादिरूपं बिभर्त्ति धारयति पुष्णाति वा। या चैका सूर्यस्य रवेः निष्कृतेषु निम्नेषु अस्तमयेषु चरति व्यवहरति। (तामेकां सविता नियच्छतु) एका च शुक्ला धर्मस्य आतपस्य निष्कृतेषु चरति। तामेकां सविता नियच्छतु सुखदात्रीं करोतु । अष्टकाविशेषणं वा सर्वम् ॥३॥

४—सैवाष्टका रात्रिर्धेनुरूपेण स्तूयतेऽनुष्टुभा। या प्रथमा अष्टका रात्रिः व्यौच्छत्व विवासितवती। उच्छी विवासे। सा रात्रिः यमे नियमे कृते सति धर्मराजे वा धेनुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा नः पयस्वती धुक्ष्वोत्तरामुत्तराᳩ समाᳩ स्वाहा ॥

(१) शुक्रऽ ऋषभा नभसा ज्योतिषाऽगाद्विश्वरूपा शबली अग्निकेतुः समानमर्थᳩ स्वपस्यमाना बिभ्रती जरामजरऽ उषऽ आगाः स्वाहा ॥

(२) ऋतूनां पत्नी प्रथमे यमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्यौच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत् स्वाहेति ॥

पयस्विनो गौरभूः अभवत् । श्राद्धादिरूपहविः संपादनद्वारा यमस्याप्यभीष्टं प्रादा-दित्यर्थः । सा नोऽस्माकं पयस्विनी अभीष्टदात्री भूत्वा उत्तरामुत्तरामुत्तरोत्तरां समां वर्षं यावज्जीवम् अस्माकम् पुत्रपशुग्रामधनादिकामान् धुक्ष्व पूरयत्वित्यर्थः । पुरुषव्यत्ययश्छान्दसः ॥४॥

१—या रात्रिः शुक्रा शोचिष्मती ऋषभा वर्षणशीला श्रेष्ठा वा । नभसा नभसि स्थितेन ज्योतिषा सहागात् आगता । अतो विश्वरूपा नानारूपा । तदेवाह—शबली कर्बुरा शुक्लकृष्णारुणा वर्णभेदेन । अग्निकेतुः होमार्थमुद्धृतोऽग्निः केतुः प्रकाशकः चिह्नं तिलको वा यस्याः सा । अग्निर्मन्दप्रकाश उषःकाले सूर्यतेजःसम्भेदाद्वा भवति । समानं तुल्यमर्थं प्रयोजनं शोभनतया अपस्यमाना सम्पादयन्ती । उषः काले पुण्यकर्माणि क्रियन्त इति यजमाने जरानिर्दुष्टं दीर्घजीवनं बिभ्रती धार-यन्ती हे अजरे उषः त्वमागाः आगताऽसि । अजरे इति विशेषणं सर्वदैकरूपत्वात् । यजमानविशेषणं वा ॥१॥

२—अथोषोरूपाया रात्रेः स्तुतिद्वारेण स्वरूपनिरूपणमाह-इयमुषा आऽगात् आगता । किम्भूता ऋतूनां वसन्तादिपण्णां प्रथमा मुख्या पत्नी पालयित्री । उषः कालादृतोः प्रवृत्तिर्भवतीति प्रथमत्वम् । पत्नी भार्या वा । ऋतुभिः सह सन्धानात् । अह्नां वत्सराणां नेत्री प्रापयित्री । उषसो दिनानामाविर्भावात् । तथा प्रजानां जनित्री सवित्री । निद्रापगमेन जागरणधर्मत्वात् । एकैव सती बहुधा प्रकारेण व्यौच्छत् प्राकाशत । कर्तृधर्मत्वात्, या एवंरूपा सा त्वं स्वयं जीर्णा सती अन्यत् सर्वं प्राणिजातं जरयसि वयोविहीनं करोषि यातायाताभ्यां वयसोपचयाद्वा । अथवा रवि-रश्मिकदम्बप्रसारेण स्वयं जीर्णा सती अन्यत् सर्वं निमेषादि संवत्सरान्तकालावयव-जातं जरयसि अपनयसि । तथाच यास्कः—"रात्रेर्जरयिता जारः सूर्यं" इति ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थालीपाकस्य जुहोति—

(१) शान्ता पृथिवी शिवमन्तरिक्षᳪं शन्नो द्यौरभयं कृणोतु । शन्नो दिशः प्रदिशऽ आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ।

(२) आपो मरीचीः परि पान्तु सर्वतो धाता समुद्रोऽ अपहन्तु पापम् । भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याᳪं स्वाहा ।

(३) विश्वऽ आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु । ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति च ॥६॥

स्थालीपाकस्य चरोर्जुहोति । शान्ता पृथिवीत्यादिभिर्मन्त्रैः प्रतिमन्त्रम् ॥ ६ ॥

---

१ मन्त्रार्थः—त्रयाणां प्रजापतिः पङ्क्तिर्लिङ्गोक्ता होमे० ।

शान्ता सुखस्वरूपा पृथिवी नोऽस्माकमभयं कृणोतु करोतु । तथा शिवं मङ्गलमन्तरिक्षं तथा शं सुखरूपा द्यौरपि कृणोतु । तथा दिशः प्राच्याद्याः प्रदिशोऽवान्तरदिशः आदिशः सर्वा नोऽस्माकं शं कृण्वन्तु । हे अहोरात्रे युवां शं कृणुतम् कुरुतम् । एषां प्रसादाद्दीर्घमायुर्व्यश्नुवै प्राप्नुयाम् ।

२—आपो जलानि मरीचीः मरीचयः मे मम देहगेहादि सर्वं परिपान्तु रक्षन्तु । धाता अपां धारयिता समुद्रः सिन्धुः मे इति पदं तन्त्रम्, अतः सर्वत्र सम्बध्यते । तेन मे मम पापं वृजिनमपहन्तु दूरीकृत्य नाशयतु । कीदृशं पापम् तदेव प्रपञ्चयति—भूतं व्यतीतम् भविष्यदागामि, तत् विश्वं सर्वं पापम् अकृन्तत् छिनत्त्विति यावत् । कृती छेदने । यद्वा भूतं दक्षादिषु भविष्यच्च । तेष्वेव वर्तमानमभीष्टधनादिनिकरं विश्वं सर्वमकृन्तत् अनवच्छिन्नं करोतु । तत एवैरनुगृहीतस्य मे ब्रह्म वेदः अभिगुप्तः शूद्रश्रवणादिनाऽनुपहतोऽस्तु । ततोऽभिगुप्तेन वेदेनाहं सुरक्षितः धर्मानुष्ठाने निष्प्रत्यूहः स्याम् भवेयम् । सर्वैर्वा सुरक्षितः ॥६॥

३—विश्वे देवास्त्रयोदश । आदित्या द्वादश । वसवोऽष्टौ । रुद्रा एकादश । मरुतो देवविशेषा एकोनपञ्चाशत् । एते नोऽस्माकं गोप्तारो रक्षितारः सन्तु भवन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमेष्ठी प्रजापतिश्च मयि ऊर्ज्जमन्नं प्राणं बलं वा। प्रजां पुत्रादिरूपाम्। अमृतम् अमरणधर्मत्वम् परमानन्दं वा तथा दीर्घमायुश्चिरं जीवितं च दधातु सुस्थितं करोतु ॥६॥

अष्टकायै स्वाहेति ॥७॥

अष्टकायै स्वाहेति चतुर्थीमाहुतिं जुहोति ॥७॥

मध्यमा गवा ॥८॥

मध्यमा माघकृष्णाष्टका विसृष्णां द्वितीया। सा च गवा गोपशुना कर्तव्या इति सूत्रशेषः ॥८॥

तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य इति ॥९॥

तस्यै इति षष्ठ्यर्थे चतुर्थी। तस्याः गोः वपां वह वपामित्यनेन मन्त्रेण जुहोति ॥९॥

श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत् ॥१०॥

श्वः अष्टम्या उत्तरेद्युर्नवमीषु अन्वष्टकासु अष्टका अनु पश्चाद् भवन्तीत्यन्वष्टकाः तासु अन्वष्टकासु सर्वासां चतसृणामष्टकानां कर्म भवतीति शेषः। केन द्रव्येणेत्यत आह—पार्श्वसक्थिसव्याभ्याम्। पार्श्वं च सक्थि च पार्श्वसक्थिनी ते च सव्ये च पार्श्वसक्थिसव्ये ताभ्याम् पार्श्वसक्थिसव्याभ्याम् परिवृते सर्वतः प्रच्छादिते आवसथ्याग्निसदने। इतिकर्तव्यतापेक्षायामाह पिण्डपितृयज्ञवत्। अपराह्णे पिण्डपितृयज्ञ इत्याद्युक्तपिण्डपितृयज्ञविधिना ॥१०॥

स्त्रीभ्यश्चोपसेचनं च कर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनꣳ स्रजश्च ॥११॥

पिण्डपितृयज्ञादधिकमुच्यते–स्त्रीभ्यो मात्रादिभ्यश्च पिण्डान्दद्यात्। न केवलं पिण्डान् दद्यात् किन्तु उपसेचनं तर्पणं च कुर्यात्। कया सुरया। कासु कर्षूषु अवटेषु। न केवलं सुरया किन्तु तर्पणेन च। तर्पयत्यनेनेति तर्पणसाधनं सक्त्वादि तेन। त्रैककुदं सौवीराञ्जनमिति प्रसिद्धं तदलाभे लौकिकं कज्जलम् अनुलेपनं सुगन्धि द्रव्यं चन्दनादि। स्रजः अप्रतिषिद्धसुरभिपुष्पमालाः। चकारो दद्यादिति क्रियासमुच्चयार्थः ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचार्यायान्तेवासिभ्यश्चानपत्येभ्य ऽइच्छन् ॥१२॥

इच्छन् यदि कामयेत तदा आचार्याय अन्तेवासिभ्यश्च शिष्येभ्यः पिण्डान् दद्यात् । यदि ते अनपत्याः स्युः ॥१२॥

मध्या वर्षे च तुरीयाशाकाष्टका ॥१३॥

मध्या मध्ये वर्षे वृष्टिकाले प्रौष्ठपद्या उर्ध्वमष्टमीत्यर्थः । तुरीया चतुर्थी शाकाष्टजा शाकेन कालशाकाख्येन निर्वर्त्या अष्टका शाकाष्टका ॥१३॥

इति तृतीयस्य तृतीया कण्डिका ॥३॥

शालाकर्मनिरूपणम्—

अथातः शालाकर्म ॥१॥

अथ अन्वष्टकाकर्मानन्तरं यतः आवसथ्याधानादीनि कर्माणि शालाग्निसाध्यान्यनु विहितानि, शालाकरणं च नोक्तम् अतो हेतोः शालाकर्म शालायाः कर्म शालाकर्म गृहस्य क्रिया व्याख्यास्यते ॥१॥

पुण्याहे शालां कारयेत् ॥२॥

पुण्याहे पुण्यं च तदहः पुण्याहम् तस्मिन् पुण्याहे ज्योतिःशास्त्रोक्ते शुभदिने शालां गृहं कारयेत् निर्मापयेत् ॥२॥

तस्याऽ अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति ॥३॥

तस्याः शालाया अवटं स्तम्भारोपणार्थं खातम् अभिमुखेनाज्यं जुहोत्यच्युताय भौमाय स्वाहेति मन्त्रेण । अत्रावटमित्येकवचनमन्येषां त्रयाणामुपलक्षणार्थम् संस्कार्यत्वविशेषात् ग्रहं समार्ष्टीति वत् । अतश्चतुर्षु आग्नेयादिकोणेषु होमः । अच्युताय अप्रच्युतस्वरूपाय भौमाय स्वाहा सुहुतमस्तु ॥३॥

(१) स्तम्भमुच्छ्रयति—इमामुच्छ्रयामि भुवनस्य नाभिं

---

१ मन्त्रार्थः—इमामुच्छ्रयामीत्येवमादिमन्त्राणां विश्वामित्रः क्रमेण त्रिष्टुप्पङ्क्तिजगत्यनुष्टुभः स्तम्भोच्छ्रयणे वि० ।

इमां स्थूणां शालाधाररूपाम् उच्छ्रयामि उत्थापयामि । किम्भूताम् ? भुवनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसोर्धारां प्रतरणीं वसूनाम् । इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा ॥

(१) अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय ।
आ त्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः ।
(२) आ त्वा कुमारस्तरुणऽ आ वत्सो जगदैः सह ।
आ त्वा परिस्रुतः कुम्भऽ आदध्नः कलशै रुप ।
क्षेमस्य पत्नी बृहती सुवासा रयिन्नो धेहि सुभगे सुवीर्यम् ॥

भूर्लोकस्य भुवनैकदेशवर्तिना गृहस्य वा नाभिम् आधारम्, वसोर्द्धाराम् वसुनो धनस्य धारां स्रुतिं धरित्रीं वा । वसूनां गोमहिष्यश्वस्वर्णरत्नादिविविधधनानाम् प्रतरणीम् प्लावनीम् प्रसारिणीमिति यावत् । इहैव अत्रैव स्थूणायां शालां गृहं निमिनोमि स्थापयामि। कीदृशीं शालाम् ध्रुवां स्थिराम् । इयं च शाला क्षेमे निरुपद्रवे प्रदेशे घृतं सुखम् उक्षमाणा सिञ्चन्ती अस्मान् प्रापयन्ती तिष्ठतु स्थिता भवतु ।

(१) हे शाले त्वम् अश्वावती अश्वयुक्ता गोमती गोयुक्ता सूनृतावती प्रियसत्य-वाक्यवती उच्छ्रयस्व उत्थिता भव । किमर्थम् ? महते सौभगाय भाग्योदयाय । हे शाले ! त्वा त्वाम् अधिष्ठाय शिशुराक्रन्दतु बालकः क्रीड़ोत्थहासशब्दं करोतु। जातावेक वचनम् । अथवा बालाः क्रीडार्थं परस्परमाह्वयन्तु । तथा धेनवः प्रसूताः गावोऽप्रसूताश्च वाश्यमानाः आक्रन्दन्तु इति क्रियां विपरिणमय्य संबन्धः ।

(२) आ त्वा त्वाम् आश्रित्य तरुणः समर्थः कुमारो बटुः आक्रन्दतु वेदघोषं करोतु । एवं वत्सः स्तनन्धयः स्तनपानार्थमाक्रन्दतु मातरमाह्वयतु जगदैरनुगै रक्षकैः सह । तथा परिस्रुतः उत्सिञ्चत्र कुम्भो दध्नः कलशोऽन्यैः कलशैः सह उप मत्समीपे पूर्णशब्दं करोतु एतैर्युक्ता भवेत्यर्थः । पुनरपि तां स्तुत्वा प्रार्थयते क्षेमस्येति । हे शाले ! सुभगे सुन्दरि सुसमृद्धे वा ! त्वन्नोऽस्मभ्यं रयिं धनं धेहि देहि । अस्मासु धारयेति वा । किंविशिष्टा त्वम् ? क्षेमस्य रक्षणस्य पत्नी स्वामिनी । बृहती स्वरूपेण गुणैश्च महती । सुवासाः शोभनवस्त्रादिसमृद्धा शोभनवसतिर्वा । किञ्च नोऽस्मभ्यं सुवीर्यं शोभनां शक्तिं पुष्कलप्रजादेतुं वा धेहि । रयिविशेषणं वा । दानादिसुशक्तियुक्तं धनं देहीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१) अश्वावद् गोमदूर्जस्वत् पर्णं वनस्पतेरिव ।

अभि नः पूर्य्यताᳬं रयिरिदमनु श्रेयो वसान ऽइति-चतुरः प्रपद्यते ॥४॥

स्तम्भमुच्छ्रयति उत्थापयति अवटे मिनोतीत्यर्थः । इमामुच्छ्रयामीति मन्त्रैः ॥४॥

अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरतऽ उदपात्रं प्रतिष्ठाप्य स्थालीपाकᳬं श्रपयित्वा निष्क्रम्य द्वार-समीपे स्थित्वा ब्रह्माणमामन्त्रयते ब्रह्मन् प्रविशामीति ॥५॥

अभ्यन्तरतः अर्द्धनिष्पन्नायाः शालाया मध्ये अग्निमावसथ्यमुपस-समाधाय पञ्चभूसंस्कारपूर्वकं स्थापयित्वा दक्षिणतः अग्नेर्दक्षिणपार्श्वे ब्रह्माणमुपवेश्य उत्तरतः अग्नेरुत्तरप्रदेशे उदपात्रं जलपूर्णं ताम्रादिभाजनं प्रतिष्ठाप्य निधाय । अत्र पुनर्ब्रह्मोपवेशनमुदपात्रप्रतिष्ठापनावसरविज्ञाप-नार्थम् । स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वा ब्रह्माणं प्रथममृत्वि-जमामन्त्रयते सम्बोधयति । कथं, ब्रह्मन् प्रविशामीति ॥५॥

ब्रह्मानुज्ञातः प्रविशत्यृतम्प्रपद्ये शिवं प्रपद्य ऽइति ॥६॥

ब्रह्मणाऽनुज्ञातः ब्रह्मणा प्रविशस्व इत्यनुज्ञातः प्रविशति ऋतं प्रपद्ये शिवं प्रपद्ये इति मन्त्रेण शालां प्रपद्यते ॥६॥

आज्यर्ठ० संस्कृत्येह रतिरित्याज्याहुती हुत्वाऽपरा जुहोति ।

(१) किंच । भो शाले नोऽस्मान् अभि अभितः अस्मासु सर्वभावेन रयि-र्धनं पूर्यताम् । धनेनास्मान् पूरयेत्यर्थः । किं विशिष्टा रयिः—अश्वावद् अश्वावती गोमद् गोमती ऊर्जस्वद् रसवती विस्तृता वा । वनस्पतेः पर्णमिव । यथा वनस्पतेः पर्णानि वसन्तादौ पूर्यन्ते तथा । एकत्वमत्र जात्या । यद्वा अश्वा-वदित्यादीनि पर्णविशेषणानि । अश्वावद् अश्वव्यवहारयोग्यमित्यादि । इदं स्थानं वसानः अधिवसन् अहं पूर्यताम् पूर्यै पूर्णो भवानीत्यर्थः । अधिवसाने मयि रयिं पूर्यतामिति वा ॥ एवं चतुरः स्तम्भानुच्छ्रयते ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१) वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽ अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा॥

(२)वास्तोष्पते प्रतरणो नऽ एधि गयस्फानो गोभिरश्वेभिरिन्दो। अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा।

(३)वास्तोष्पते शग्मया सꣳ सदा ते सक्षीमहि रण्वया गातुमत्या।

---

(१) मन्त्रार्थः—वास्तोष्पते इत्यादि चतसृणां वशिष्ठस्त्रिष्टुप् इन्द्रो नवशालायामाज्यहोमे विनियोगः।

वसतेर्निवास कर्मणः इति निरुक्ताद्वास्तु गृहम्। तस्य वास्तोः पते स्वामिन् इन्द्र? वास्तोष्पतिर्गीष्पतिरितीन्द्रपर्यायः। अस्मान् रक्षितुं प्रतिजानीहि प्रतिज्ञाङ्कुरु ऊरीकुर्वित्यर्थः। कथम् स्वावेशः सुष्ठुप्रवेशो नोऽस्माकं भव। दीर्घश्छान्दसः। अस्मानुत्तमान् विधाय प्रवेशयेत्यर्थः। किञ्च अनमीवः अमोवम् पापं रोगो वा तद्विरोधी। किञ्च यत्किंचित् वयं त्वा त्वाम् ईमहे प्रार्थयामहे तद्वस्तु जातं प्राप्य नोऽस्मान् जुषस्व प्रीणयस्व प्रीयस्वेति वा। प्रार्थयमानानस्मान् प्रीणयित्वा त्वमपि प्रीतो भवेत्यर्थः। किंच। नोऽस्माकम् द्विपदे मनुष्यवर्गाय शं सुमङ्गलस्वरूपो भव। चतुष्पदे पशुवर्गाय शं सुखस्वरूपो भव। स्वाहाकारो मन्त्रावसानज्ञापनार्थः प्रदर्शितः सर्वत्र॥

(२) हे वास्तोष्पते त्वं नोऽस्माकं प्रतरणः आपन्निवारकः एधि भव। किम्भूतानाम्। गोभिर्गवादिभिर्द्विशफैः अश्वेभिरश्वादिभिरेकशफैर्युक्तानाम्। किञ्च हे इन्द्र परमेश्वर ! गयस्फानः प्राणवर्द्धकश्च एधि। प्राणा वै गया इति श्रुतेः। किञ्च ते तव सख्ये मैत्र्यां सति वयमजरासः अक्षीणसम्पदाः स्याम भूयास्म। पुत्रान् प्रति पितेव वर्तमानस्त्वं नोऽस्मान् प्रति जुषस्व प्रीतो भव। हे वास्तोष्पते ! तव शग्मया सुखरूपया। शिवं शग्ममिति सुखनामनी।

(३) संसदा सभया सक्षीमहि सम्बध्येमहि वयम्। षच समवाये। किं भूतया रण्वया। शास्त्रीयं रणनम् उपन्यासङ्कुर्वाणा रण्वा तया। गातुमत्या यज्ञवत्या त्रयीप्रधानया वा। त्वञ्च नोऽस्मान् योगे अलभ्यलाभे उत अपि क्षेमे लब्धरक्षणे निमित्ते वरं यथा स्यात्तथा पाहि रक्ष। हे इन्द्रानुचराः ? यूयं नोऽस्मान् स्वस्तिभिः अभीष्टफलैः सदा पात आप्याय्य रक्षत ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाहि क्षेमऽ उत योगे वरन्नो यूयम्पात स्वस्तिभिः सदा नः स्वाहा ।

(१) अमीवहा वास्तोष्पते विश्वा रूपाण्योविशन् ।
सखा सुशेव ऽएधि नः स्वाहेति ।।७।।

आज्यं संस्कृत्य इह रतिरिति मन्त्रेणाज्याहुती हुत्वा वास्तोष्पते इति चतसृभिर्ऋग्भिः अपराश्चतस्र आज्याहुतीर्जुहोति ।।७।।

स्थालीपाकस्य जुहोति—

(२) अग्निमिन्द्रं बृहस्पतिं विश्वान् देवानुपह्वये ।
सरस्वतीं च वाजीञ्च वास्तु मे दत्त वाजिनः स्वाहा ।।१।।
सर्पदेवजनान्त्सर्वान् हिमवन्तठ० सुदर्शनम् ।
वसूँश्च रुद्रानादित्यानीशानं जगदैः सह ।।
एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ।।२।।
पूर्वाह्णमपराह्णं चोभौ मध्यन्दिना सह ।
प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथाम् ।
एतान्सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ।।३।।
कर्तारं च विकर्तारं विश्वकर्माणमोषधीश्च वनस्पतीन् ।

---

(१)हे वास्तोष्पते इन्द्र ! त्वम् अमीवहा पापरोगपीडादिनाशको यतः । अतो नोऽस्माकं सखा इहामुत्र बन्धुरेधि भव । किं कुर्वन् । विश्वा विश्वानि ब्रह्मादिस्तम्ब-पर्यन्तानि रूपाणि शरीराण्याविशन् प्रविशन् सर्वशरीररूपेणास्मासु अनुकूलो भवेत्यर्थः । किम्भूतः सुशेवः शोभनः सुखहेतुः ।।७।।

(२) मन्त्रार्थः— अग्निमिन्द्रमित्यादिपञ्चानां विश्वामित्रोऽनुष्टुप् लिङ्गोक्ता होमे० अहमग्न्यादीन् देवान् हविर्ग्रहणाय उपह्वये मत्समीपमाह्वयामि न केवलमेतान् किन्तु सरस्वतीं वाचम् । वाजीम् अन्नमयीं सीतां च । हे अग्न्यादयो देवाः ! यूयमागत्य मे मह्यं वास्तु गृहं दत्त मदायत्तं कुरुतेत्यर्थः । किम्भूताः वाजिनः अन्नवन्तः वेगवन्तो वा । अनेनोत्तरमन्त्रा अपि व्याकृताः । विशेषास्तूच्यन्ते— एतान् सर्पादीन् उपह्वये इत्यनुषङ्गः । उपहूय च तान् प्रपद्ये शरणं व्रजेऽहम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥४॥
धातारं च विधातारं निधीनां च पतिठं० सह ।
एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥५॥
स्योनठं० शिवमिदं वास्तु दत्तं ब्रह्म प्रजापती' सर्वाश्च देवताः स्वाहेति ॥६॥८॥

ततः स्थालीपाकस्य चरोः अग्निमिन्द्रम् इत्यादिभिः षड्भिः मन्त्रैः प्रतिमन्त्रमाज्याहुतीर्जुहोति ॥८॥

प्राशनान्ते कांस्ये सम्भारानोप्यौदुम्बरपलाशानि ससुराणि शाड्वलं गोमयं दधि मधु घृतं कुशान् यवांश्चासनोपस्थानेषु प्रोक्षेत् ॥९॥

प्राशनान्ते स्विष्टकृदादि-संस्रवप्राशनान्ते काँस्ये काँस्यमये पात्रे सम्भारान् वक्ष्यमाणानोप्य कृत्वा उदुम्बरपत्राणि ससुराणि सक्षीराणि शाड्वलम् दूर्वां गोमयम् अरोगिण्यादिगोः शकृत् दधि मधु घृतम् यवान् निगदव्याख्यातान् । तैः आसनानि च उपस्थानानि च आसनोपस्थानानि वास्तुशास्त्रोपदिष्टानि तेषु प्रोक्षेत् । उदुम्बरपलाशादिसम्भारैस्तान्यभिषिञ्चेदित्यर्थः । तत्रासनानि, नागदन्तादिमयस्थानानि, उपस्थानानि देवतास्थानानि ॥९॥

पूर्वे सन्धावभिमृशति (१) श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेतामिति ॥१०॥

ततः शालायाः पूर्वे सन्धौ अभिमृशति पूर्वसन्धिप्रदेशमालभते श्रीश्च त्वेति मन्त्रेण ॥१०॥

जगदैरनुचरैः सह वर्तमानान् । तत्र व्युष्टाम् उपसम् देवीं द्योतनात्मिकां महापथामनेकमार्गां बहुमुखामित्यर्थः । इदं वास्तु स्योनं सुखसेव्यम् सुखरूपत्वात् । शिवं कल्याणरूपं शान्तं वा वास्तु गृहम् मह्यम् हे ब्रह्मप्रजापती वेदब्राह्मणौ युवां दत्तम् प्रयच्छतम् । हे सर्वा देवताः ! यूयमपि चकाराद्दत्तेति क्रियाविपरिणामः । स्वाहेति प्रागुक्तम् ॥८॥

(१) मन्त्रार्थः—हे शाले ! त्वा त्वाम् पूर्वे सन्धौ श्रीर्लक्ष्मीः यशः कीर्तिश्च गोपायेताम् रक्षताम् । एवमुत्तरत्रापि व्याख्येयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१) दक्षिणे सन्धावभिमृशति । यज्ञश्च त्वा दक्षिणा च दक्षिणे सन्धौ गोपायेतामिति ॥१२॥

पश्चिमे सन्धावभिमृशति । अन्नं च त्वा ब्राह्मणाश्च पश्चिमे सन्धौ गोपायेतामिति ॥१२॥

उत्तरे सन्धावभिमृशति । ऊर्क् च त्वा सूनृता चोत्तरे सन्धौ गोपायेतामिति ॥१३॥

निष्क्रम्य दिशऽ उपतिष्ठते । केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वै केताऽऽदित्यः सुकेता तौ प्रपद्ये ताभ्यान्नमोऽस्तु तौ मा पुरस्ताद् गोपायेतामिति ॥१४॥

वहिर्निष्क्रम्य दिशः प्राचीमुखाश्चतस्रः केता च मा सुकेताचेत्यादिभिश्चतुर्भिर्मन्त्रैः उपतिष्ठते स्तौति ॥१४॥

अथ दक्षिणतो गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानं रात्री रक्षमाणा ते प्रपद्ये ताभ्यान्नमोऽस्तु ते मा दक्षिणतो गोपायेतामिति ॥१५॥

अथ पश्चात् दीदिविश्च मा जागृविश्च पश्चाद् गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यान्नमोऽस्तु तौ मा पश्चाद् गोपायेतामिति ॥१६॥

अथोत्तरतोऽस्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वाऽ अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यान्नमोऽस्तु तौ मोत्तरतो गोपायेतामिति ॥१७॥

(१) ततः शालायाः दक्षिणे सन्धौ अभिमृशति दक्षिणसन्धिप्रदेशमालभते यज्ञश्च त्वेति मन्त्रेण । हे शाले ! त्वा त्वाम् दक्षिणे सन्धौ यज्ञः दक्षिणा च गोपायेताम् ।

एवं पश्चिमे सन्धौ अन्नम् ब्राह्मणाश्च गोपायेताम् ।

उत्तरे ऊर्क् तेजः प्राणनम् सूनृता शोभना वाक् च गोपायेताम् रक्षेताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्ठितां प्रपद्यते (१) धर्मस्थूणाराजं श्रीस्तूपमहोरात्रे द्वारफलके। इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह। यन्मे किञ्चिदस्त्युपहूतः सर्वगणसखाय-साधुसंवृतः। तान्त्वाशालेऽरिष्टवीरा गृहान्नः सन्तु सर्वत इति ॥१८॥

निष्ठितां निर्मितां संपूर्णामिति यावत्। प्रपद्यते प्रविशति। धर्मस्थूणे-त्यादिमन्त्रेण ॥१८॥

ततो ब्राह्मणभोजनम् ॥१९॥

कारयेदिति सूत्रशेषः ॥१९॥

इति तृतीयस्य चतुर्थी कण्डिका ॥४॥

मणिकावधान-निरूपणम्

अथातो मणिकावधानम् ॥१॥

अथ शालाकर्मानन्तरं यतः शालायां मणिकेन भवितव्यमतो मणिका वधानं वक्ष्यत इति सूत्रशेषः ॥१॥

उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षता-

---

(१) मन्त्रार्थः—द्वयोर्ब्रह्मा जगतीबृहत्यौ लिङ्गोक्ता प्रवेशने विनियोगः।

धर्मस्थूणाराजं धर्मयुक्तं स्थूणाराजं महतीं स्थूणाम्। श्रीस्तूपं लक्ष्मीस्वरूपं अगारे हि स्तूपो वध्यते। अहोरात्रे तद्देवते द्वारफलके द्वारकपाटे लोकालोक-रूपत्वात्। इन्द्रस्य इमे गृहाः इन्द्रदेवतात्वात् वसुमन्तः धनिनः वरूथिनः रक्षकाः बहुप्रजा वा तानेतानहं प्रपद्ये अधि वसामि। प्रजया पुत्रादिरूपया सह पशुभिर्गोमहिष्यादिभिश्च सह। यत्किंचिन्मे मम वस्त्वस्ति तेन सह वास्तो-ष्पतिनोपहूतः सन् हे शाले! त्वा त्वाम् याचे। किम्! नोऽस्मान् गृहान् गृहस्थान् प्राप्य सर्वे देवा इमे गृहा वा अरिष्टवीरा अरिष्ट. निराधिव्याधयो वीराः पुत्रादयो येभ्यस्तथा सन्तु सर्वतः सर्वभावेन। किंभूतोऽहम्? सर्वगणसखायसाधुसंवृतः सर्वैर्गणैःपरिवारैः सखायैर्मित्रसमूहैः साधुतया अन्यैः साधुभिर्वा संवृतो रचितः ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरिष्टकाँ-(सुमनसः कपर्दिकान्)-श्चान्यानि चाभिमङ्गलानि तस्मिन् मिनोति मणिकः समुद्रोऽसीति ॥२॥

तत्र शालाया उत्तरपूर्वस्यामैशान्यां दिशि यूपवत् अभ्यादानपरिलेखनपूर्वकमवटं मणिकमूलावस्थानपर्यन्तं गर्तं खात्वा निखाय ततः प्राचः पांसूनपोह्यावटस्योपरि प्रागग्रान् दीर्घान् कुशानास्तीर्य स्तृत्वा अक्षतान् यवान् अरिष्टकफलानि अन्यानि च सुमङ्गलानि सिद्धार्थकादीनि ओप्य तस्मिन्नवटे मणिकम् उदकधानीं मिनोति स्थापयति समुद्रोऽसीतिमन्त्रेण शम्भूरित्यन्तेन ।

अप आसिञ्चति (१) आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं विभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद् गृणते वयोऽधादिति ॥३॥

तस्मिन् मणिके अपः अशूद्राहृतनद्याद्युदकमासिञ्चति प्रक्षिपति मन्त्रचतुष्टयेन ॥३॥

आपो हि ष्ठेति च तिसृभिः ॥४॥

आपो हि ष्ठा मयो भुव इत्यादिभिस्तिसृभिर्ऋग्भिः पुनर्मणिके सकृदप असिञ्चति ॥ ४ ॥

ततो ब्राह्मणभोजनम् ॥५॥

ततो ब्राह्मणमेकं भोजयेत् ॥५॥

इति तृतीयस्य पञ्चमी कण्डिका ॥५॥

मन्त्रार्थः–आपो रेवतीरिति परमेष्ठी ऋ० त्रिष्टुप्छ० आपो दे० अपामासेचने० । हे आपः ! यूयं रेवतीः धनवत्यः । हि यस्मात् इत्थं वस्वः वसुनो धनस्य क्षयथ निवासभूताः स्थ भवथ । किञ्च भद्रं श्रेष्ठं क्रतुं यज्ञं विभृथ धारयथ । अमृतं रसं ब्रह्म वा फलं वा बिभृथ धारयथ । किंच रायो धनस्य स्वपत्यस्य शोभनापत्यस्य पत्नीः स्वामिन्यो यूयं तद्दातुं समर्था इत्यर्थः । तत् युष्मत्स्वरूपं गृणते स्तुवते मह्यं सरस्वती देवी वय आयुरधात् दधातु ददात्वित्यर्थः ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरोरोगौषधम्—

अथातः शीर्षरोगभेषजम् ॥१॥

अथ मणिकावधानानन्तरं यतः शिरोरोगवान् किञ्चित् कर्म कर्तुं न शक्नोति अतो हेतोः शीर्षणि रोगः शीर्षरोगः शीर्षरोगस्य भेषजम् शीर्षरोगभेषजम् शिरोरोगप्रतीकारः वक्ष्यते इति सूत्रशेषः ॥१॥

पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि—

[1]चक्षुर्भ्यां श्रोत्राभ्यां गोदानाच्छुबुकादधि ।
यक्ष्मं शीर्षण्यं रराटाद्विवृहामीममिति ॥२॥

पाणी हस्तौ प्रक्षाल्य अद्भिरवनेज्य भ्रुवौ युगपत् ताभ्यां पाणिभ्यां विमार्ष्टि प्रोक्षति चक्षुर्भ्यामिति मन्त्रेण ॥२॥

(२) अर्द्धे चेत्--'अवभेदक विरूपाक्ष श्वेतपक्ष महायशः ।
अथो चित्रपक्ष शिरो माऽस्याभितात्प्सीदि"ति ॥३॥

क्षेम्यो ह्येव भवति ॥४॥६॥

हि ततः क्षेम्यः शिरोरोगरहित एवासौ भवतीति ॥४॥६॥

इति तृतीयस्य षष्ठी कण्डिका ॥६॥

---

(१) मन्त्रार्थः—परमेष्ठी अनुष्टुप् वायुर्देवता अपाकरणेवि० । चक्षुरादङ्गेभ्यः अधि सकाशादिमं यक्ष्मं रोगविशेषं शीर्षणि भवं शीर्षण्यं विवृहामि पृथक्करोमि निराकरोमीत्यर्थः । तत्र गोदानं शिरोदेशः । शुबुकं चिबुकम् । रराटम् ललाटम् ॥

(२) मन्त्रार्थः—प्रजापतिरनुष्टुप् विरूपाक्षः अपाकरणे विनि० । अव अवाचीनं कृत्वाऽङ्गैर्भेदयति विदारयति इति हे अवभेदक, विरूपे विकृते अक्षिणी यस्मादिति हे विरूपाक्ष श्वेतपक्षेत्यादीन्यन्वर्थसंबोधनानि । भो एवंभूत ? शिरोरोगे अस्य रोगिणः शिरः मा ताप्सीव, त्वत्प्रसादात्तापयुक्तं मा भूत् । यद्वा भवानस्य शिरो मा सन्तापयत्विति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दासवशीकरणम्—

उतूलपरिमेहः ॥१॥

उतूलस्य परिमेहः उतूलपरिमेहः । उतूलो दास उच्यते तस्य दुर्विनीतस्य परिमेहः परि समन्तात् मेहः सेचनम् वशीकरणाभिषेक इति यावत् । कर्म कथ्यत इति सूत्रशेषः ॥१॥

स्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसलवि त्रिः परिषिञ्चन् परीयात् "[१]परि त्वा गिरेरहं परि मातुः परि स्वसुः परि पित्रोश्च सख्येभ्यो विसृजाम्यहम् । उतूल परिमीढोऽसि परिमीढः क गमिष्यसी"ति ॥२॥

स्वपतः यदा स दासः स्वपिति तदा गवादेः पशोः जीवतो विषाणे शृङ्गे स्वम्मूत्रमासिच्य सिक्त्वा तस्य स्वपतो दासस्य अपसलवि अप्रादक्षिणयेन विषाणस्थं मूत्रम् परि समन्तात् सिञ्चन् उक्षन् त्रिः त्रीन् वारान् परीयात् परिभ्रमेत् परि त्वा गिरेरिति मन्त्रेण ॥२॥

स यदि भ्रम्यादावाग्निमुपसमाधाप घृताक्तानि कुशेण्ड्वानि जुहुयात् "[२]परित्वा ह्वलनो ह्वल निर्वृत्तेन्द्रवीरुधः । इन्द्र-

(१) मन्त्रार्थः—प्रजापतिरनुष्टुप् वायुः सेचने विनि० ।

भो उतूल ! त्वा त्वाम् गिरेः पर्वतादपि परि आकृष्य विशिष्टतया सृजामि मय्यनुरक्तं करोमि मात्रादिभ्यश्च । तत्र भगिनीभ्रात्रोमातापित्रोश्चेति षष्ठ्यौ पञ्चम्यर्थे । परिशब्दावृत्तिर्मन्त्रशक्तिदार्ढ्याय । सख्येभ्यः सखिभावमापन्नेभ्योऽपि परिमीढः मन्त्रशक्त्या सेचनरूपैः पाशैर्बद्ध इत्यर्थः । शिष्टं स्पष्टम् । ॥१॥

(२) मन्त्रार्थः—परमेष्ठी अनुष्टुप् इन्द्रो होमे विनि० ।

भो ह्वल चञ्चल इन्द्रस्य ईश्वरस्य वीरुधः पाशात् सेवकः स्वामिभक्तः इत्यादित्येवंरूपात् परि समन्ततो निर्वृत्त निर्गत्य स्थितः, अथ अतः त्वा त्वां ह्वलनो ज्वलनोऽयमग्निरिन्द्रपाशेन तेनैव सित्वा बद्ध्वा अन्यं तव मनसि स्थितम् अनर्थकारि भूतविशेषं मुक्त्वा मोचयित्वा मह्यं मामाश्रयितुम् आनयेत् आनयतु मदायत्तं करोत्वित्यर्थः । यद्वा ह्वलनिर्वायुः । वृत्ता वर्तिता रचिता इन्द्रवीरुधो वेदा येन सः स । शब्दस्य वाय्वात्मकत्वात् एवम्भूतो वायुश्चेति योज्यम् । तवपक्षे त्वेति दासविशेषणमुपक्रान्तत्वात् । शेषं समानम् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाशेन सित्वा मह्यं मुक्त्वाऽथान्यमानयेदि''ति ॥३॥

स दासः यदि अस्मिन् कर्मणि कृतेऽपि भ्रम्यात् स्वेच्छया विचरेत् तदा तद्वश्यार्थमिदं कर्मान्तरं कुर्यात्—

दावाग्निमुपसमाधाय पञ्चभूसंस्कारपूर्वकं दावाग्निं स्थापयित्वा चतुर्दशाहुत्यन्ते घृताक्तानि कुशेण्डूवानि कुशकुण्डलानि त्रीणि जुहुयात्— परि त्वा ह्वलन इति मन्त्रेण ॥३॥

क्षेम्यो ह्येव भवति ॥४॥७॥

अस्मिन् कर्मणि कृते हि स्फुटं क्षेम्यः वश्य एव दासो भवति संपद्यते ॥४॥७॥

इयि तृतीयस्य सप्तमी कण्डिका ॥७॥

शूलगव उच्यते—

शूलगवः ॥१॥

स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्यऽ आयुष्यः ॥२॥

शूलगवः कर्मनामधेयम् । स च स्वर्ग्यः स्वर्गाय: हितः, पशव्यः पशुभ्यो हितः, पुत्र्यः पुत्रेभ्यो हितः, धन्यः धनाय हितः, यशस्यः यशसे हितः, आयुष्यः आयुषे हितः । अयमर्थः । यदा यजमानः स्वर्ग-पशु-पुत्र-धन-यशआयुषामन्यतमकामो भवति तदाऽनेन शूलगवाख्येन यागेन यजेत ॥२॥

औपासनमरण्यर्ठ० हृत्वा वितानर्ठ० साधयित्वा रौद्रं पशुमालभेत साण्डम् ॥३॥

औपासनम् आवसथ्यमग्निम् अरण्यम् अटवीं नीत्वा तत्र वितानं त्रेताग्निविन्यासं साधयित्वा शुल्वोक्तप्रकारेण विरचय्य रौद्रं रुद्रो देवता अस्येति रौद्रं तं पशुं छागम् आलभेत संज्ञपयति । कथंभूतं साण्डम् अण्डाभ्यां सह वर्तत इति साण्डस्तम् साण्डम् अनपुंसकमित्यर्थः ॥३॥

गौर्वाशब्दाद ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दासवशीकरणम्—

उतूलपरिमेहः ॥१॥

उतूलस्य परिमेहः उतूलपरिमेहः । उतूलो दास उच्यते तस्य दुर्विनीतस्य परिमेहः परि समन्तात् मेहः सेचनम् वशीकरणाभिषेक इति यावत् । कर्म कथ्यत इति सूत्रशेषः ॥१॥

स्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसलवि त्रिः परिषिञ्चन् परीयात् "[१]परि त्वा गिरेरहं परि मातुः परि स्वसुः परि पित्रोश्च सख्येभ्यो विसृजाम्यहम् । उतूल परिमीढोऽसि परिमीढः क्व गमिष्यसी"ति ॥२॥

स्वपतः यदा स दासः स्वपिति तदा गवादेः पशोः जीवतो विषाणे शृङ्गे स्वम्मूत्रमासिच्य सिक्त्वा तस्य स्वपतो दासस्य अपसलवि अप्रादक्षिण्येन विषाणस्थं मूत्रम् परि समन्तात् सिञ्चन् उक्षन् त्रिः त्रीन् वारान् परीयात् परिभ्रमेत् परि त्वा गिरेरिति मन्त्रेण ॥२॥

स यदि भ्रम्यादावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयात् "[२]परित्वा ह्वलनो ह्वल निर्वृत्तेन्द्रवीरुधः । इन्द्र-

---

(१) मन्त्रार्थः—प्रजापतिरनुष्टुप् वायुः सेचने विनि० ।

भो उतूल ! त्वा त्वाम् गिरेः पर्वतादपि परि आकृष्य विशिष्टतया सृजामि मय्यनुरक्तं करोमि मात्रादिभ्यश्च । तत्र भगिनीभ्रात्रोर्मातापित्रोश्चेति षष्ठ्यौ पञ्चम्यर्थे । परिशब्दावृत्तिर्मन्त्रशक्तिदार्ढ्याय । सख्येभ्यः सखिभावमापन्नेभ्योऽपि परिमीढः मन्त्रशक्त्या सेचनरूपैः पाशैर्बद्ध इत्यर्थः । शिष्टं स्पष्टम् । ॥१॥

(२) मन्त्रार्थः—परमेष्ठी अनुष्टुप् इन्द्रो होमे विनि० ।

भो ह्वल चञ्चल इन्द्रस्य ईश्वरस्य वीरुधः पाशात् सेवकः स्वामिभक्तः स्यादित्येवंरूपात् परि समन्ततो निर्वृत्त निर्गत्य स्थितः, अथ अतः त्वा त्वां ह्वलनो ज्वलनोऽयमग्निरिन्द्रपाशेन तेनैव सित्वा बद्ध्वा अन्यं तव मनसि स्थितम् अनर्थकारि भूतविशेषं मुक्त्वा मोचयित्वा मह्यं मामाश्रयितुम् आनयेत् आनयतु मदायत्तं करोत्वित्यर्थः । यद्वा ह्वलनिर्वायुः । वृत्ता वर्तिता रचिता इन्द्रवीरुधो वेदा येन सः स । शब्दस्य वाय्वात्मकत्वात् एवम्भूतो वायुश्चेति योज्यम् । तवपक्षे त्वेति दासविशेषणमुपक्रान्तत्वात् । शेषं समानम् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाशेन सित्वा मह्यं मुक्त्वाऽथान्यमानयेदि''ति ॥३॥

स दासः यदि अस्मिन् कर्मणि कृतेऽपि भ्रम्यात् स्वेच्छया विचरेत् तदा तद्वश्यार्थमिदं कर्मान्तरं कुर्यात्—

दावाग्निमुपसमाधाय पञ्चभूसंस्कारपूर्वकं दावाग्निं स्थापयित्वा चतुर्दशाहुत्यन्ते घृताक्तानि कुशेण्ड्वानि कुशकुण्डलानि त्रीणि जुहुयात्—परि त्वा ह्वलन इति मन्त्रेण ॥३॥

क्षेम्यो ह्येव भवति ॥४॥७॥

अस्मिन् कर्मणि कृते हि स्फुटं क्षेम्यः वश्य एव दासो भवति संपद्यते ॥४॥७॥

इयि तृतीयस्य सप्तमी कण्डिका ॥७॥

शूलगव उच्यते— आ॰ प॰ भा॰

शूलगवः ॥१॥

स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्यऽ आयुष्यः ॥२॥

शूलगवः कर्मनामधेयम् । स च स्वर्ग्यः स्वर्गाय: हितः, पशव्यः पशुभ्यो हितः, पुत्र्यः पुत्रेभ्यो हितः, धन्यः धनाय हितः, यशस्यः यशसे हितः, आयुष्यः आयुषे हितः । अयमर्थः । यदा यजमानः स्वर्ग-पशु-पुत्र-धन-यशआयुषामन्यतमकामो भवति तदाऽनेन शूलगवाख्येन यागेन यजेत ॥२॥

औपासनमरण्यर्ठ॰ हृत्वा वितानर्ठ॰ साधयित्वा रौद्रं पशुमालभेत साण्डम् ॥३॥

औपासनम् आवसथ्यमग्निम् अरण्यम् अटवीं नीत्वा तत्र वितानं त्रेताग्निविन्यासं साधयित्वा शुल्बोक्तप्रकारेण विरचय्य रौद्रं रुद्रो देवता अस्येति रौद्रं तं पशुं छागम् आलभेत संज्ञपयति । कथंभूतं साण्डम् अण्डाभ्यां सह वर्तत इति साण्डस्तम् साण्डम् अनपुंसकमित्यर्थः ॥३॥

गौर्वाशब्दाव ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाशब्दः पक्षव्यावृत्तौ । नैव छागः पशू रौद्रः, अपि तु साण्डो गौः। कुतः शब्दात्, शूलगव इत्येतस्मात् शब्दात् ॥४॥

वपाᳪं श्रपयित्वा स्थालीपाकमवदानानि च, रुद्राय वपा, मन्तरिक्षाय वसाᳪं, स्थालीपाकमिश्राण्यवदानानि जुहोति— अग्नये रुद्राय शर्वाय पशुपतयऽ उग्रायाशनये भवाय महादेवाये-शानायेति च ॥५॥

वपां पक्त्वा स्थालीपाकमवदानानि च हृदयादीनि सहैव श्रपयित्वा तत्र रुद्राय वपां जुहोति । अन्तरिक्षाय वसां मांसपाकभाण्डस्थितं स्नेहं जुहोति । स्थालीपाकमिश्राण्यवदानानि = अवदानहोमावसरे हृदयादीन्यवदानानि स्थालीपाकेन चरुणा संयुतानि जुहोति नवकृत्वः, अग्नये स्वाहेत्येवमादिर्नवभिर्मन्त्रैः प्रतिमन्त्रमग्नौ प्रक्षिपति ॥५॥

वनस्पतिस्विष्टकृदन्ते ॥६॥ दिग्व्याघारणम् ॥७॥

वनस्पतिश्च स्विष्टकृच्च वनस्पतिस्विष्टकृतौ तयोरन्तः वनस्पतिस्विष्टकृदन्तः तस्मिन् वनस्पतिस्विष्टकृदन्ते दिशां व्याघारणम् दिग्व्याघारणं कर्तव्यमिति सूत्रशेषः । पृषदाज्येन दधिमिश्रेणाज्येन वनस्पतये स्वाहा इति वनस्पतिहोमः । चतसृषु दिक्षु मध्ये चेति षट्सु स्थानेष्वग्नौ वसाहोमो दिग्व्याघारणमुच्यते ॥६-७॥

व्याघारणान्ते पत्नीः संयाजयन्तीन्द्राण्यै रुद्राण्यै भवान्याऽ अग्निं गृहपतिमिति ॥८॥

व्याघारणं दिशामभिघारणं, तस्य अन्तः व्याघारणान्तः तस्मिन् व्याघारणान्ते पत्नीः पञ्च वक्ष्यमाणाः संयाजयन्ति । कथम् ? इन्द्राण्यै रुद्राण्यै इत्यादि पञ्चभिर्मन्त्रैः स्वाहाकारान्तैः प्रतिमन्त्रम् । पत्नीसंयाजाः पशुपक्षेन भवन्तीति श्रौत्रसूत्रे स्पष्टम् ॥८॥

लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो वलिर्ठं० हरति यास्ते रुद्र पुरस्ताव सेनास्ताभ्यऽ एष वलिस्ताभ्यस्ते नमो, यास्ते रुद्र दक्षिणतः सेनास्ताभ्यऽ एष वलिस्ताभ्यस्ते नमो, यास्ते रुद्र पश्चात्सेनास्ताभ्यऽ एष वलिस्ताभ्यस्ते नमो, यास्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रुद्रोत्तरतः[1] सेनास्ताभ्यऽ एष वलिस्ताभ्यस्ते नमो,
यास्ते रुद्रोपरिष्टात् सेनास्ताभ्यऽ एष वलिस्ताभ्यस्ते नमो,
यास्ते रुद्राधस्ताद् सेनास्ताभ्यऽ एष वलिस्ताभ्यस्ते नम इति ॥९॥

लोहितं तस्यैव पशो रुधिरं पालाशेषु पलाशपत्रमयेषु कूर्चेषु आसनेषु प्राक्संस्थेषु उदक्संस्थेषु वा रुद्राय सेनाभ्यो रुद्रदेवतायै सेना रुद्राय सेनाः अलुक्समासः । ताभ्यो बलिमुपहरति ददाति यास्त इत्यादिभिः षड्भिर्मन्त्रैः ॥ ९ ॥

ऊवध्यं लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनति ॥१०॥

ऊवध्यं पुरीषाधानं पोटति प्रसिद्धम् । लोहितेन लिप्तं लोहितलिप्तम् रक्तसंसृष्टम् अग्नौ आहवनीये प्रास्यति प्रक्षिपति । अधो भूमौ वा निखनति निदधाति ॥१०॥

अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वाऽनुवाकाभ्याम् ॥११॥

वातमनु इति अनुवातम् वातमनुलक्षीकृत्य वाताभिमुखमित्यर्थः । पशुम् अवशिष्टं पशुशरीरमवस्थाप्य निधाय रुद्रैर्नमस्त इत्याध्यायाम्नातैः रुद्रमन्त्रैरुपतिष्ठते स्तौति । यद्वा प्रथमोत्तमाभ्यामनुवाकाभ्यां मन्त्रसमुदायाभ्याम् । तत्र प्रथमोऽनुवाको नमस्त इत्यारभ्य, षोडशर्चः उत्तमोऽन्तिमो द्रापेऽ अन्धसस्पत इत्यारभ्य विंशतिकण्डिकात्मकः ॥११॥

नैतस्य पशोर्ग्राममर्ध० हरन्ति ॥१२॥

एतस्य रौद्रस्य पशोर्मांसं ग्रामं न हरन्ति ग्रामं प्रति न नयन्ति याज्ञिकाः, किन्तु अरण्य एवोत्सृजन्ति ॥१२॥

एतेनैव गोयज्ञो व्याख्यातः ॥१३॥

एतेनैव शूलगवेनैव यज्ञेन गोयज्ञो गोयज्ञनामधेयो यागो व्याख्यातः कथितो बोध्यः ॥१३॥

---

१ मन्त्रार्थः—पण्णां परमेष्ठी यजुः रुद्रो वलिहरणे विनियोगः । अर्थः सुगमः । ते तुभ्यं चेति योज्यम ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र द्रव्यविशेषमाह:—

पायसेनानर्थलुप्तः ।।१४।।

पायसेन पयसि संसिद्धेन चरुणा अनर्थलुप्तः शूलगवप्रधानदेवता होमलोपरहितः ।।१४।।

तस्य तुल्यवया गौर्दक्षिणा ।।१५।।

तस्य शूलगवपशोर्वयसा तुल्यं समं वयो जन्मातिक्रान्तकालो यस्य गोः स तुल्यवया गौः गोपुङ्गवः दक्षिणा परिक्रयद्रव्यं ब्रह्मणे देवमिति सूत्रार्थः ।।१५।।८।।

इति तृतीयस्याष्टमी कण्डिका ।।८।।

वृषोत्सर्गः—

अथ वृषोत्सर्गः ।।१।।

अथ शूलगवानन्तरम् वृषोत्सर्गः वृषस्य उत्सर्गः उत्सर्जनम् वक्ष्यते इति सूत्रशेषः ।।१।।

गोयज्ञेन व्याख्यातः ।।२।।

स च गोयज्ञेन गवा रौद्रेण पशुना यज्ञो गोयज्ञः तेन व्याख्यातः गोयज्ञसाध्यफलेतिकर्तव्यतावानित्यर्थः ।।२।।

कदा कर्तव्य इत्यपेक्षायामाह—

कार्तिक्यां पौर्णमास्याᳮ रेवत्यां वाऽऽश्वयुजस्य ।।३।।

कार्तिक्यां पूर्णिमायाम् आश्विनस्य रेवत्यां रेवतीनक्षत्रे वा कर्तव्य इति शेषः ।।३।।

मध्ये गवाᳮ सुसमिद्धमग्निं कृत्वाऽऽज्यᳯ संस्कृत्येह रिति षड् जुहोति प्रतिमन्त्रम् ।।४।।

मध्ये गवां गोष्ठे पञ्चभूसंस्कारपूर्वकमावसथ्याग्निं सुसमिद्धं प्रज्वलितं कृत्वा आज्यं संस्कृतस्य पर्युक्षणान्ते इह रतिरित्यादिभिः षड्भिर्मन्त्रैः प्रतिमन्त्रं षडाज्याहुतीर्जुहोति ।।४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१)"पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा व्वाजꣳ सनोतु न" इति पौष्णस्य जुहोति ॥५॥

पूषा देवता अस्येति पौष्णः तस्य पौष्णस्य चरोः पूषा गा इत्यादि मन्त्रेण सकृज्जुहोति ॥५॥

रुद्रान् जपित्वैकवर्णं द्विवर्णं वा यो वा यूथं छादयतियं वा यूथं छादयेद्रोहितो वैव स्यात सर्वाङ्गैरुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वित्तमः स्यात्तमलङ्कृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालङ्कृत्य-
(२) "एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण । मा नः साप्त्यजनुषाऽसुभगा रायस्पोषेण समिषा मदेम" त्येतयैवोत्सृजेरन् ॥६॥

रुद्रान् नमस्त इत्यध्यायान् जपित्वा, एक एव शुक्लादिवर्णो रूपं यस्य स एकवर्णः तम् एकवर्णम् । अथवा-द्वौ वर्णौ यस्य स द्विवर्णः तं वृषम् । यो वृषो यूथं कृत्स्नं वर्गं छादयति स्वपरिमाणेनाधः करोति तम्, अथवा यं वृषं यूथो वर्गश्छादयेत् अधः कुर्यात् तं वा यूथादधिकपरिमाणं वा न्यूनपरिमाणं वेत्यर्थः । रोहितो लोहित एव वा यः स्यात् । पुनः कीदृक् सर्वैरङ्गैरुपेतः समन्वितः न पुनर्हीनाङ्गोऽधिकाङ्गो वा । तथा जीवाः प्राणवन्तो वत्साः प्रसूतिर्यस्याः सा जीववत्सा, तस्या गोः पुत्रः । तथा यूथे वर्गविषये रूपमस्यास्तीति रूपस्वी, अतिशयेन रूपस्वी रूपस्वित्तमः

---

(१) मन्त्रार्थः—परमेष्ठी ऋषिर्गायत्री छन्दः पूषा देवता पिष्टहोमे विनि० । पूषा सूर्यो नोऽस्माकं गाः धेनूरिन्द्रियाणि च अन्वेतु अनुगृह्णातु । अर्वतः अश्वान् प्राणान् वा रक्षतु । वाजमन्नं सनोतु ददातु । पूषशब्दाष्टत्तिरादरार्था ॥५॥

(२) मन्त्रार्थः—भो वत्सतर्यः एतं वृषं पतिं भर्तारं वो युष्मभ्यं ददामि । तेनानेन प्रियेण सह क्रीडन्त्यो यूयम् चरथ चरत स्वच्छन्दं विहरतेति यावत् । तृणानि खादतेति वा । नोऽस्माकं स्थाने साप्त्यजनुषा सप्तजन्मसम्बन्धे पत्या सह सुभगा भवतेति शेषः । वयमपि युष्मत्प्रसादात् रायस्पोषेण धनादिपुष्ट्या सम्यग्भवेन इषा अन्नेन च मदेम तृप्याम ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषः स्यात् तमुक्तगुणविशिष्टं वृषमलङ्कृत्य वस्त्रमाल्यानुलेपनहेमपट्टिका-ग्रैवेयकघण्टादिभिर्वृषोचितभूषणैर्भूषयित्वा न केवलं वृषमात्रं किन्तु वत्सतरीरप्यलङ्कृत्य, कीदृशीः याः यूथे स्ववर्गे मुख्याः गुणैः श्रेष्ठा वत्सतर्यः । कति चतस्रः चतुःसंख्योपेतास्ताः, एतं युवानमित्येतयर्चा उत्सृजेरन् त्यजेयुः ॥६॥

नभ्यस्थमनुमन्त्रयते मयोभूरित्यनुवाकशेषेण ॥७॥

नभ्यस्थं वत्सतरीणां मध्ये तिष्ठन्तमभिमन्त्रयते आभिमुख्येन मन्त्रैः स्तौति । केन मयोभूरभि मा वाहि स्वाहेत्यारभ्य स्वर्णं घर्मः स्वाहेत्यन्तेनानुवाकशेषेणेति (शु० य० १८।४५-४६) वृषोत्सर्गसूत्रार्थः ॥७॥

अथ पायसप्राशनं नाम कर्मान्तरमुच्यते—

सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान् भोजयेत् ॥८॥

यस्य यावन्त्यो गावः दोग्ध्यः सन्ति स तासां सर्वासां पयसि दुग्धे पायसं परमान्नं श्रपयित्वा पक्त्वा ब्राह्मणान् त्रिप्रभृतीन् यथाशक्ति भोजयेत् तर्पयेत् ॥८॥

पशुमप्येके कुर्वन्ति । तस्य शूलगवेन कल्पो व्याख्यातः ॥ ॥९॥१०॥

एके आचार्याः पशुमपि छागं च कुर्वन्ति आलभन्ते उक्तविधिना । पायसश्रपणपूर्वकं ब्राह्मणान् भोजयन्ति च । तस्य पशोः शूलगवेन शूलगवाख्येन कर्मणा कल्पः इति कर्तव्यताकलापो व्याख्यातः कथितः इति सूत्रार्थः ॥१०॥

इति तृतीयस्य नवमी कण्डिका ॥९॥

आशौचनिरूपणम्—

अथोदककर्म ॥१॥

अथ पुरुषसंस्कारकर्म, क्रमप्राप्तमुदककर्म उदकेन जलेन कर्म क्रिया अञ्जलिदानमित्यर्थः । वक्ष्यते इति सूत्रशेषः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्विवर्षे प्रेते मातापित्रोराशौचꣳ शौचमेवेतरेषामेकरात्रं त्रिरात्रं वा ॥२॥

द्वे वर्षे वयो यस्य स द्विवर्षः, न द्विवर्षः अद्विवर्षस्तस्मिन् प्रेते प्रकर्षेण इतो गतः प्रेतो मृतः तस्मिन् निमित्ते माता च पिता च मातापितरौ, तयोः मातापित्रोराशौचमशुद्धिः वर्णाश्रमविहितकर्मानुष्ठानसंकोचावस्थेति यावत् । इतरेषां मातापितृभ्यामन्येषां शौचमेव नाशुद्धिः । पित्रोः कियन्तं कालमाशौचम्, एकरात्रम् एकमहोरात्रम् अथवा त्रिरात्रम् । अयं विकल्पः प्रेतस्याकृतकृतचूडत्वेन व्यवस्थितः ॥२॥

शरीरमदग्ध्वा निखनन्ति॥३॥

ऊनद्विवर्षस्य प्रेतस्य शरीरम् अदग्ध्वा अग्निदाहमकृत्वा निखनन्ति गर्ते निक्षिपन्ति ॥३॥

अन्तःसूतके चेदोत्थानादाशौचꣳ सूतकवत् ॥४॥

चेद् यदि अन्तः सूतके सूतकस्य जननिमित्तशौचस्य अन्तर्मध्ये उत्थानात् उत्थानं सूतकान्तं यावत् आशौचं जननाशौचान्तरमापतति तदा सूतकवत् पूर्वसूतकशेषेणैवोत्तरस्य शुद्धिः । यद्वा अन्तर्मध्ये सूतके सूतकान्तरे जाते उत्थानात् शुद्धिः । आशौचम् मरणाशौचं सूतकवत् । मरणाशौचमध्ये मरणाशौचे जाते पूर्वशेषेणोत्तरस्य शुद्धिरित्यर्थः ॥४॥

नात्रोदककर्म ॥५॥

अत्र ऊनद्विवार्षिके प्रेते उदककर्म उदकाञ्जलिदानं न भवति ॥५॥

द्विवर्षप्रभृति प्रेतमाश्मशानात्सर्वेऽनुगच्छेयुः ॥६॥

द्विवर्षः द्विवर्षवयस्कः तत्प्रभृतिस्तदादिर्यः प्रेतः तम् आ श्मशानात् श्मशानावधि सर्वे सपिण्डा अनु गच्छेयुः पश्चाद् व्रजेयुः ॥६॥

यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके ॥७॥

एके आचार्याः यमगाथां यमदैवत्यायामृचि गीतं साम गायन्तः पठन्तः, तथा यमसूक्तं यमदैवत्यानाम् ऋचां समुदायं सूक्तशब्दवाच्यं जपन्तोऽनुगच्छेयुरित्याहुः ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्युपेतो भूमिजोषणादि समानमाहिताग्नेरोदकान्तस्य गमनात् ॥८॥

यदि उपेतः उपनीतः प्रेतः स्यात् तदा भूमिजोषणादि कर्म समं तुल्यम्, केन आहिताग्नेः कर्मणा, यथा आहिताग्नेः औपासनिकस्य भवति। किम्पर्यन्तम् आ उदकान्तस्य उदकसमीपस्य गमनात्। एतदुक्तं भवति यद्युपनीतः प्रेतो भवति तदाऽस्याहिताग्नेर्भूमिजोषणादि उदकाञ्जलिदानपर्यन्तं कर्म यथा भवति तथैव कुर्यात् ॥८॥

शालाग्निना दहन्त्येनमाहितश्चेत् ॥९॥

चेद् यद्यसौ प्रेतः आहितः कृतावसथ्याधानः स्यात् तदैनं प्रेतं शालाग्निना औपासनेन दहन्ति पुत्रादयः ॥९॥

तूष्णीं ग्रामाग्निनेतरम् ॥१०॥

तूष्णीं मन्त्रवर्जं ग्रामाग्निना लौकिकेन पावकेन इतरम् अकृतावसथ्याधानम् दहन्तीत्यनुषङ्गः ॥१०॥

संयुक्तं मैथुनं वोदकं याचेरन् उदकं करिष्यामह इति ॥११॥

संयुक्तं केनचित् यौनेन सम्बन्धेन सम्बद्धम्। मैथुनः मिथुनस्यैकदेशलक्षणाया मैथुनशब्दवाच्याया भार्यायाः भ्राता श्याल इत्यर्थः तं वोदकं जलं याचेरन् प्रार्थयेरन् पृच्छेयुः उदकं करिष्यामह इत्यनेन मन्त्रेण ॥११॥

कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते ॥१२॥

एवं पृष्टः संयुक्तः श्यालो वा प्रति ब्रूयात्। किं, कुरुध्वम् मा चैवं पुनर्भूयादिति। क्व, अशतवर्षे प्रेते शतवर्षेभ्योऽर्वाक् मृते सति ॥१२॥

कुरुध्वमित्येवेतरस्मिन् ॥१३॥

इतरः शतवर्षप्रभृतिः, तस्मिन् मृते कुरुध्वमित्येव एतावदेव प्रतिब्रूयात् न मा चैवं पुनरिति ब्रूयात् ॥१३॥

सर्वे ज्ञातयोऽपोऽभ्यवयन्त्यासप्तमान् पुरुषाद्दशमाद्वा ॥१४॥

ज्ञातयः सपिण्डाः समानोदकाश्च सर्वे एव अपोऽभ्यवयन्ति स्नाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थम् नद्यादेर्जलं प्रविशन्ति, कियावत् आसप्तमात् पुरुषात् सप्तमं पुरुषमभिव्याप्य यावन्तः सपिण्डाः दशमाद्वा दशमं पुरुषमभिव्याप्य वा यावन्तः समानोदकाश्च तावन्त इत्यर्थः ॥१४॥

समानग्रामवासे यावत् सम्बन्धमनु स्मरेयुः ॥१५॥

समाने एकस्मिन् ग्रामे वास अवस्थानम् समानग्रामवासः तस्मिन् सति यावत् सम्बन्धम् अनु स्मरेयुः अस्मिन् पुरुषे वयं सम्बन्ध्यामहे इति जानीयुः, तावन्तः अपोऽभ्यवयन्ति इति संबन्धः ॥१५॥

एकवस्त्राः प्राचीनावीतिनः ॥१६॥

एकं परिधानीयमेव वस्त्रं येषां ते एकवस्त्राः प्राचीनावीतिनः कृतापसव्याः इत्यर्थः ॥१६॥

सव्यस्यानामिकयाऽपनोद्याप नः शोशुचदघमिति ॥१७॥

सव्यस्य वामस्य पाणेरनामिकया उपकनिष्ठिकया जलमपनोद्य अप नः शोशुचदघमित्येतावता मन्त्रेणापसार्य निमज्जन्तीत्युत्तरेण संबन्धः ॥१७॥

दक्षिणामुखा निमज्जन्ति ॥१८॥

दक्षिणामुखाः याम्यदिगभिमुखाः निमज्जन्ति युगपत् सकृत् स्नान्ति ॥१८॥

प्रेतायोदकर्ठ० सकृत् प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्तऽ उदकमिति ॥१९॥

प्रेताय मृताय उदकं जलं सकृदेकवारम् अञ्जलिना प्रसिञ्चन्ति शुद्धायां भूमौ प्रक्षिपन्ति । कथम्, असौ अमुकप्रेत एतत्ते उदकम् इत्यनेन मन्त्रप्रयोगेण ॥१९॥

उत्तीर्णान् छुचौ देशे शाड्वलवत्युपविष्टाँस्तत्रैतानपवदेयुः ॥२०॥

उत्तीर्णान् जलाद्बहिर्निर्गतान् शुचौ देशे पवित्रे भूभागे शाड्वलवति हरिततृणोपेते उपविष्टान् आसीनान् तत्र तदा अन्ये लोकयात्रिकाः सुहृदः एतान् प्रेतस्य पुत्रादीन् अपवदेयुः प्रेतगुणानुकथनेनेतिहासपुराणादि विचित्रकथाभिः संसारासारताख्यापनेन तान् शोकरहितान् कुर्युः ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनवेक्षमाणा ग्राममायान्ति रीतीभूताः कनिष्ठपूर्वाः ॥२१॥

अनवेक्षमाणाः पश्चादनवलोकयन्तः रीतीभूताः श्रेणीभूताः कनिष्ठपूर्वाः कनिष्ठो लघीयान् पूर्व अग्रिमो येषां ते स्वकनिष्ठानुसारिण इत्यर्थः । ग्राममायान्ति आगच्छन्ति ॥२१॥

निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्य प्रविशन्ति ॥२२॥

निवेशनस्य प्रेतपतिकस्य गृहस्य द्वारे पिचुमन्दस्य निम्बस्य पत्राणि विदश्य दन्तैरवखण्ड्य आचम्य स्मार्ताचमनं विधाय उदकं जलम्, अग्निम्, तथा गोमयमार्द्रम् सर्षपान् गौरान्, तैलं तिलसंभवम्, एतानि प्रत्येकमालभ्य स्पृष्ट्वा अश्मानं प्रस्तरमाक्रम्य पादेनालभ्य प्रविशन्ति गृहम् ॥२२॥

त्रिरात्रं ब्रह्मचारिणोऽधः शायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन् ॥२३॥

त्रीण्यहोरात्राणि यावत् ब्रह्मचारिणःअकृतस्त्रीप्रसङ्गाः अधः खट्वाव्यतिरेकेण शेरते इत्येवंशीलाः अधःशायिनः किंचन किमपि कर्म गृहव्यापारादि लौकिकं स्वयं न कुर्युः, न प्रकुर्वीरन् अन्यैरपि न कारयेयुः ॥२३॥

क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमांसम् ॥२४॥

क्रीत्वा पण्येनान्नं गृहीत्वा लब्ध्वा वा अयाचितमन्यतः प्राप्य दिवैव दिवसे एव न रात्रौ अश्नीयुः भुञ्जीरन् । अमांसं मांसवर्जितम् ॥२४॥

प्रेताय पिण्डं दत्त्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम् ॥२५॥

किंकृत्वा प्रेताय पिण्डम् अवयवपूरकं दत्वा। कथम् नामग्राहम् प्रेतस्य नाम गृहीत्वा। केषु अवनेजन-दान-प्रत्यवनेजनेषु अवनेजनं च अवनेजनदानप्रत्यवनेजनानि तेषु पिण्डभोजनात्पूर्वं हस्तप्रक्षालनार्थं दीयमानं जलमवनेजलम्। पश्चाद्दीयमानं प्रत्यवनेजनम् । दानं पिण्डदानम् ॥२५॥

मृन्मये तांँ रात्रीं क्षीरोदके विहायसि निदध्युः प्रेताऽत्र स्नाहीति ॥२६॥

मृन्मये शरावादौ पात्रे कृत्वा तां यस्मिन् दिने प्रेतोऽभूत तत्संबन्धिनीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रात्रीं क्षीरोदके क्षीरं च उदकं च क्षीरोदके दुग्धपानीये एकीकृते विहायसि आकाशे निदध्युः स्थापयेयुः प्रेतात्र स्नाहीत्यनेन मन्त्रेण ॥२६॥

त्रिरात्रꣳ शावमाशौचम् ॥२७॥ दशरात्रमित्येके ॥२८॥

त्रिरात्रं त्रीण्यहोरात्राणि शावम् शवसम्बन्धि अशौचम् अशुचित्वं भवति॥ एके आचार्याः मन्वादयो दशरात्रं दशाहोरात्राणि मन्यन्ते॥२७॥२८॥

न स्वाध्यायमधीयीरन् ॥२९॥

स्वाध्यायं वेदं नाधीयीरन् न पठेयुः न चाध्यापयेयुः येषां यावदाशौचम् ॥२९॥

नित्यानि निवर्तेरन् वैतानवर्जम् ॥३०॥

नित्यान्यावश्यकानि सन्ध्यावन्दनादीनि निवर्तेरन् अनधिकारात्। परन्तु वैतानवर्जम् वितानं गार्हपत्याहवनीयदक्षिणाग्नीनां विस्तारस्तत्र साध्यम् अग्निहोत्रादिकर्म वैतानम्। तद्वर्जयित्वाऽन्यन्निवर्तते इत्यर्थः। सन्ध्याऽपि मानसी प्रवर्तत एव। अर्घदानं गायत्र्या भवति ॥३०॥

शालाग्नौ चैकेऽन्य एतानि कुर्युः ॥३१॥

एके आचार्याः शालाग्निसाध्यानां कर्मणां निवृत्तिमिच्छन्ति। एके यदा न निवृत्तिस्तदाऽन्ये एतानि कुर्युः न स्वयमिति ॥३१॥

प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात् ॥३२॥

प्रेतस्पर्शो विद्यते येषां ते प्रेतस्पर्शिनः सपिण्डा ग्रामं न प्रविशेयुः न गच्छेयुः आनक्षत्रदर्शनात् नक्षत्राणां दर्शनं नक्षत्रदर्शनं तस्मात् आ अवधेः ॥३२॥

रात्रौ चेदादित्यस्य ॥३३॥

चेद्यदि रात्रौ निशि प्रेतस्पर्शस्तदा आदित्यस्य सूर्यस्य दर्शनात् प्राक् न प्रविशेयुरित्यर्थः ॥३३॥

प्रवेशनादि समानमितरैः ॥३४॥

प्रवेशनमादौ यस्य निम्बपत्रादिदशनस्य तत् प्रवेशनादि कर्म इतरैरसपिण्डैरपि समानं तुल्यं कार्यम् ॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षं द्वौ वाऽऽशौचम् ॥३५॥

पक्षं पञ्चदशाहोरात्राणि वैश्यस्याशौचं भवति। द्वौ पक्षौ त्रिंशदहोरात्राणि शूद्रस्य। वाशब्दात् द्वादशाहोरात्राणि क्षत्रियस्याशौचम् ॥३५॥

आचार्ये चैवम् ॥३६॥

आचार्ये उपनयनपूर्वकं वेदाध्यापके चैवमेवोदकदानादि कर्तव्यम् ॥३६॥

मातामहयोश्च ॥३७॥

मातामही च मातामहश्च मातामहौ तयोः मातामहयोश्च चकारादेवमेवोदकदानादि सर्वं कर्तव्यम् ॥३७॥

स्त्रीणां चाप्रत्तानाम् ॥३८॥

अप्रत्तानामपरिणीतानां स्त्रीणां कन्यानां चकारादेवमेव सर्वं कर्तव्यम् ॥३८॥

प्रत्तानामितरे कुर्वीरन् ॥३९॥ ताश्च तेषाम् ॥४०॥

प्रत्तानां परिणीतानां स्त्रीणामितरे भर्त्रादयो दाहादिकर्म कुर्वीरन् न पित्रादयः ॥ ताश्च प्रत्ताः स्त्रियः तेषां पत्यादीनां यथाधिकारमुदकदानादि कर्म कुर्युः ॥३९॥४०॥

प्रोषितश्चेत प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन् ॥४१॥

प्रोषितः प्रवासं गतश्चेद्यदि प्रेयात् म्रियेत तदा तस्य पुत्रादयः तन्मरणश्रवणकालमारभ्य कृतम् दत्तं स्नानपूर्वकमुक्तविधिना उदकं यैस्ते कृतोदकाः सन्तः कालशेषम् आशोचसमयशेषम् आसीरन् आशौचधर्मेण वर्तेरन् इत्यर्थः ॥४१॥

अतीतश्चेदेकरात्रं त्रिरात्रं वा ॥४२॥

चेद्यदि आशौचकालोऽतीतः ततः प्रोषितमरणं च श्रुतन्तदा एकरात्रमाशौचं त्रिरात्रं वा ॥४२॥

अथ कामोदकान्यृत्विक्-श्वशुर-सखि-सम्बन्धि-मातुल-भागिनेयानाम् ॥४३॥

कामोदकानि। कामेन इच्छया उदकदानार्हाणि भवन्तीति सूत्रशेषः। केषाम्, ऋत्विजः याजकाः, श्वशुरौ भार्यायाः मातापितरौ,सखायो मित्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्बन्धिनो वैवाह्याः, मातुलाः मातृभ्रातरः, भागिनेयाः भगिनीपुत्राः, एतेषां प्रत्तानाम् ऊढ़ानां दुहितृभगिन्यादीनां स्त्रीणाम् चकारात् इच्छयोदकदानम् । अदाने प्रत्यवायो नास्ति ॥४३॥

एकादश्यामयुग्मान् ब्राह्मणान् भोजयित्वा मांसवत् ॥४४॥
प्रेतायोद्दिश्य गामप्येके घ्नन्ति ॥४५॥

एकादश्यामेकादशेऽहनि ब्राह्मणः कर्ता चेत् अयुग्मान त्रिप्रभृति विषम संख्याकान् द्विजोत्तमान् भोजयित्वा भोजनं कारयित्वा एकोद्दिष्टश्राद्धविधिना मांसवत् मासेन सहितं पायसौदनादि भवति । एके आचार्याः प्रेतमुद्दिश्य गामपि घ्नन्ति इति ॥४४॥४५॥

पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात् पुत्रवाँश्चेत् ॥४६॥

पिण्डानां करणं पिण्डकरणं तस्मिन् पिण्डकरणे अमावास्यायां साग्नेः पुत्रस्य पिण्डपितृयज्ञे तत्र पितॄणां प्रथम आद्यः प्रेतः स्यात् तत् प्रभृति पिण्डदानमित्यर्थः । चेद्यदि स प्रेतः पुत्रवान् अधिकृतेन साग्निना पुत्रेण पुत्री भवति ॥४६॥

निवर्तेत चतुर्थः ॥४७॥

सपिण्डने कृते पित्रादिभ्यस्त्रिभ्यः पिण्डादिदानम् । चतुर्थः पिण्डो निवर्तेत "पिण्डस्त्रिष्वि"ति श्रुतेः ॥४७॥

संवत्सरं पृथगेके ॥४८॥

एके आचार्याः साग्नेरपि पुत्रस्य संवत्सरं यावत् पृथगेकस्यैव पितुः पिण्डदानमिच्छन्ति ॥४८॥

न्यायस्तु न चतुर्थः पिण्डो भवतीति श्रुतेः ॥४९॥

तुशब्दः पक्षव्यावृत्तौ । नैतदेवं संवत्सरं यावत् पृथक् दानमिति । नच श्रुतिविरोधे न्यायो युक्तः । कोऽसौ विरोधः, न चतुर्थः पिण्डो भवतीति श्रुतेः ॥४९॥

अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात् ॥५०॥

अहरहः प्रतिदिनम् अस्मै प्रेतायोद्दिश्य ब्राह्मणाय संप्रदानभूताय अन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोजनपर्याप्तान्नम् उदकुम्भं च जलपूर्णं घटं संवत्सरं च यावद् दद्यात् प्रयच्छेत् ॥५०॥

पिण्डमप्येके निपृणन्ति ॥५१॥

एके आचार्याः अहरहः पिण्डनिर्वपणमपीच्छन्ति ॥५१॥

इति तृतीयस्य दशमी कण्डिका ॥१०॥

पशुयागनिरूपणम्

पशुश्चेदाप्लाव्याग्रेणाग्नीन् परीत्य पलाशशाखां निहन्ति॥१॥

चेद्यदि स्मार्तः पशुः क्रियते तदा तं पशुं गोपशुमाप्लाव्य स्नापयित्वा नियुञ्ज्यात्। गोपशौ आप्लाव्याभावः। पशुनियोजनं च यूपे श्रूयते, अस्य तु कुत्रेत्यपेक्षायामाह—अस्य अग्रेण पुरस्तात् अग्नीत् वितानपक्षे गार्हपत्यादीन् आवसथ्यपक्षे एकाग्निं परीत्य प्रादक्षिण्येन गत्वा पलाशस्य शाखां निहन्ति निखनति ॥१॥

परिव्ययणोपाकरण-नियोजन-प्रोक्षणान्यावृता कुर्याद्यच्चान्यत् ॥२॥

परिव्ययणं त्रिगुणरशनया द्वादशहस्तया शाखाया वेष्टनम्, उपाकरणं तृणेन पशोः स्पर्शनम्, नियोजनं द्विगुणरशनया अष्टहस्तया अन्तरा शृङ्गबद्धस्य पशोः पलाशशाखायां बन्धनम्, प्रोक्षणं प्रोक्षणीभिरद्भिः पशोरासेचनम्। एतानि परिव्ययणो-पाकरण-नियोजन-प्रोक्षणानि आवृता पशुप्रकरणविहितेतिकर्तव्यतया मन्त्रवर्जितया क्रियया कुर्यात् विदधीत, न केवलम् एतान्येव किन्तु अन्यदपि यत् पशुसंस्कारकम् पशुसमञ्जनम् पर्यग्निकरणादिकं तदपि तथैव क्रियामात्रेण मन्त्रवर्जं तूष्णीं कुर्यात्। आवृच्छब्दो मन्त्ररहितक्रियामात्रपरः ॥२॥

परिपशव्ये हुत्वा तूष्णीमपराः पञ्च ॥३॥

पशुसंज्ञपनं परि उभयतः हूयेते ये द्वे आज्याहुती स्वाहा देवेभ्यः देवेभ्यः स्वाहेति ते परिपशव्ये, ते तूष्णीं मन्त्रवर्जम् हुत्वा अपराः पञ्च आज्याहुतीर्जुहुयात् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वपोद्धरणं चाभिघारयेद्देवतां चादिशेत् ॥४॥

पशोर्वपायाः उद्धरणं कृत्वा तां वपाम् अभिघारयेत् । उद्धृत्यैव देवतां चादिशेत् ॥४॥

कुत्रेति जिज्ञासायामाह —

उपाकरण-नियोजन-प्रोक्षणेषु स्थालीपाके चैवम् ॥५॥

उपाकरणं च नियोजनं च प्रोक्षणं च उपाकरण-नियोजनप्रोक्षणानि । तेषु उपाकरणनियोजनप्रोक्षणेषु स्थालीपाके चरौ च एवं देवतामादिशेत् ॥५॥

वपाँ हुत्वाऽवदानान्यवद्यति । सर्वाणि त्रीणि पञ्च वा ॥६॥७॥

वपां यथोक्तेन विधिना हुत्वा अवदानानि पशोः हृदयादीनि अवद्यति छिनत्ति । कति ? सर्वाणि-हृदयं जिह्वां, क्रोडम्, सव्यसक्थि पार्श्वद्वयम्, यकृद्, वृक्कौ गुदमध्यम्, दक्षिणां श्रोणिमित्येकादश प्रधानार्थानि । दक्षिणबाहुं, गुदतृतीयाणिष्ठम्, सव्यां श्रोणिमिति त्रीणि सौविष्टकृतानि ॥

यद्वा त्रीणि हृदयम् जिह्वां क्रोडम् इति । अथवा पञ्च हृदयजिह्वाक्रोडसव्यबाहुदक्षिणपार्श्वानि ॥६॥७॥

स्थालीपाकमिश्राण्यवदानानि जुहोति ॥८॥

स्थालीपाकेन चरुणा मिश्राणि संयुक्तानि स्थालीपाकमिश्राणि अवदानानि हृदयादीनि जुहोति ॥८॥

पश्वङ्गं दक्षिणा ॥९॥

पशोः अङ्गम् पश्वङ्गम् अस्य पशुबन्धस्य दक्षिणा ॥९॥

यद्देवते तद्देवतं यजेत्तस्मै च भागं कुर्यात् तं च ब्रूयादिममनु प्रापयेति ॥१०॥

एतदर्घ्यपशुं प्रकृत्य कर्माभिहितम् । तत्र यस्यार्घ्यस्य आचार्यादेर्या देवता तद्दैवतः स पशुयागस्तस्मिन् तद्दैवते यागे तद्दैवतम् अर्घ्यदैवतं बृहस्पत्यादिकं च यजेत् । तस्मै चार्घ्याय आचार्यादये भागं पशोः किंचिदङ्गं कुर्यात् विभजेत् तं चार्घ्यमाचार्यादिकं इममनु प्रापयेति ब्रूयात् ॥१०॥

नद्यन्तरे नावं कारयेन्न वा ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं प्रेतोद्देशेन गामप्येके घ्नन्तीति यदुक्तं तत् प्रदेशविधानार्थमाह—नद्यन्तरे नद्या अन्तरे द्वीपे नावम् नवम् एकादशाहश्राद्धम् तदर्थमिमं नावम् गोपशुं कारयेत् अनुतिष्ठेत्। कोऽर्थः प्रेतोद्देशेन गोपशुमेकादशेऽह्नि नद्यन्तरे आलभेत न वा आलभेत इति सूत्रार्थः ॥११॥

इति तृतीयस्यैकादशी कण्डिका ॥११॥

अवकीर्णिप्रायश्चित्तम्—

अथातोऽवकीर्णिप्रायश्चित्तम् ॥१॥

अथ इदानीं यतः पशुरभिहितः अतस्तत् प्रसङ्गात् अवकीर्णिनः स्खलितब्रह्मचर्यस्य ब्रह्मचारिणः प्रायश्चित्तम् शुद्धिसम्पादकं कर्म वक्ष्यते इति सूत्रशेषः ॥ १ ॥

अमावास्यायां चतुष्पथे गर्दभं पशुमालभते ॥२॥

यो ब्रह्मचारी सन् स्त्रीगमनादवकीर्णी भवति स पुनः प्रायश्चित्तं चिकीर्षुः अमावास्यायां कस्यांचित् चतुष्पथे चत्वारः पन्थानो यत्र भूभागे स चतुष्पथः, तस्मिन् देशे गर्दभं पशुमालभते ॥ २ ॥

निर्ऋतिं पाकयज्ञेन यजेत ॥ ३ ॥

निर्ऋतिं देवतां पाकयज्ञेन पाकयज्ञविधानेन पशुना यजेत ॥ ३ ॥

अप्स्ववदानहोमः ॥ ४ ॥

अप्सु जले अवदानानां होमः देवतोद्देशेन प्रक्षेपो भवति न त्वग्नौ। अवदानग्रहणात् आघारादीनां लौकिकाग्नावेव होमः ॥ ४॥

भूमौ पशुपुरोडाशश्रपणम् ॥ ५ ॥

भूमावेव पुरोडाशस्य श्रपणम् पाको भवति, न कपालेषु ॥५॥

तां छविं परिदधीत ॥ ६ ॥

ताम् आलब्धस्य गर्दभस्य छविं कृत्तिं परिदधीत आच्छादयीत ॥६॥

ऊर्ध्ववालामित्येके ॥ ७ ॥

एके आचार्याः ताम् ऊर्ध्ववालाम् उपरिपुच्छाम् परिदधीतेति वर्णयन्ति। अपरे तिर्यगवालाम्। ततश्च विकल्पः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवत्सरं भिक्षाचर्यं चरेत् स्वकर्म परिकीर्तयन् ॥८॥

गर्दभपश्वालम्भनानन्तरं तच्छविं परिदधानः सम्वत्सरं यावद् भिक्षाचर्यं चरेत्। किं कुर्वन्? स्वकर्म स्वीयमवकीर्णित्वं परिकीर्तयन् सर्वतः प्रकटयन् अहमवकीर्णी भवति भिक्षां देहीत्येवमादिना ॥८॥

अथोपरमाज्याहुती जुहोति—

[1]कामावकीर्णोऽस्म्यवकीर्णोऽस्मि, काम कामाय स्वाहा ।
कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि काम कामाय स्वाहेति ॥९॥

अथेदानीम् अन्यत् प्रायश्चित्तान्तरमवकीर्णिनोऽभिधीयते । कामावकीर्णोऽस्मि कामाभिद्रुग्धोऽस्मीत्येताभ्यां मन्त्राभ्यां प्रतिमन्त्रमेकैकामेवम् आज्याहुती द्वे जुहोति ॥ ९ ॥

अथोपतिष्ठते "[2]सम्मा सिञ्चन्तु मरुतः समिन्द्रः सां बृहस्पतिः ।
सम्माऽयमग्निः सिञ्चतु प्रजया च धनेन चेति" ॥१०॥

अथ होमानन्तरमुपतिष्ठते ऊर्ध्वीभूय सम्मा सिञ्चन्त्वित्यादिना मन्त्रेण लिङ्गोक्ता देवताः प्रार्थयते । संवत्सरमित्यत्राप्यनुवर्तते ॥१०॥

एतदेव प्रायश्चित्तम् ॥११॥

एतदेव यदुक्तं गर्दभपश्वालम्भनरूपम् आज्याहुतिहोमात्मकं च तदवकीर्णिनः प्रायश्चित्तद्वयं विज्ञेयमिति सूत्रार्थः ॥११॥

इति तृतीयस्य द्वादशी कण्डिका ॥१२॥

१—मन्त्रार्थः—द्वयोः प्रजापतिरनुष्टुप् कामो देवता आज्यहोमे वि० ।

हे काम अहं त्वत्कृतक्षोभेण अवकीर्णः अभिभूतोऽस्मि, अतोऽवकीर्णः क्षतव्रतोऽस्मि । अतः कामाय शोधकत्वेन हविः कामयमानाय तुभ्यं स्वाहा सुहुतमस्तु । एवमभि द्रुग्धो हिंसितः, शिष्टं समानम् ॥९॥

२—मन्त्रार्थः—प्रजापतिऋ० अनुष्टुप्० लिङ्गोक्ता देवता उपस्थाने वि० ।

मरुतो देवा मां सम्यक् सिञ्चन्तु अभीष्टप्रदानेन समर्द्धयन्तु, प्रजया च पुत्रादिरूपाय तथा धनेन धर्मानुकूलसमृद्ध्या च चकाराद सिञ्चन्तु । तथेन्द्रः सम्यक् सिञ्चत्वित्युत्तरत्रापि योज्यम् ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सभाप्रवेशः—

अथातः सभाप्रवेशनम् ॥१॥

आवसथ्याग्निसाध्यकर्मविधानानन्तरं साधारणानि कर्माणि अनुविधेयानि यतः, अतो हेतोः सभाप्रवेशनं कर्म वक्ष्यत इति सूत्रशेषः ॥१॥

सभामभ्येति-"[1]सभाऽङ्गिरसि नादिर्नामाऽसि त्विषिर्नामाऽसि तस्यै ते नम इति ॥२॥

यदा द्विजः सभां गच्छति तदा सभाम् अभि आभिमुख्येन एति गच्छति। सभाङ्गिरसीत्यादिना मन्त्रेण ॥२॥

अथ प्रविशति-"[2]सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ। यो मा न विद्यादुप मा स तिष्ठेत स चेतनो भवतु सꣳसथे जन" इति ॥३॥

अथाभिमुख्येन सभा च मा समित्यादिना मन्त्रेण सभां प्रविशति ॥३॥

पर्षदमेत्य जपेत्—"[3]अभिभूरहमागमविराडप्रतिकाश्याः। अस्याः पर्षदऽ ईशानः सहसा सु दुष्टरो जनऽ इति ॥४॥

परिषदं सभामेत्य प्रविश्य अभिभूरहमिति मन्त्रं जपेत् ॥४॥

१—मन्त्रार्थः—अङ्गिरा ऋषिर्गायत्री छन्दः सभाप्रवेशने विनियोगः।

सह धर्मेण सद्भिर्वा भातीति सभा। तथा नादिर्नन्दनशीला नाम्नाऽसि। हे आङ्गिरसि आङ्गिरोदेवते बृहस्पत्यधिष्ठिते वा त्विषिर्दीप्ता नाम प्रसिद्धम् असि। तस्यै वक्तगुणवत्यै ते तुभ्यन्नमोऽस्तु ॥२॥

२—मन्त्रार्थः—प्रजापतिस्त्रिष्टुप् सभा समितिश्च प्रवेशने विनियोगः।

सभा च संसद समितिश्च सङ्गरः ते उभे प्रजापतेर्ब्रह्मणो दुहितरौ पुत्र्यौ मा माम् अवतामिति शेषः। यत एते सचेतसौ शोभनज्ञानदात्र्यौ। अथ वचनं सभासदः प्रति। यः पुमान् मां न विद्यात मद्व्यवहारं न जानीयात स पुमान् मा माम् उपतिष्ठेत् उपासीत। ततोऽसौ संसथे सम्भाषणाय सचेतनः सुबुद्धिः वादकुशलो भवतु मत्प्रभावादित्याशंसा ॥३॥

३—मन्त्रार्थः—प्रजापतिरनुष्टुप् पर्षद सभोपस्थाने विनियोगः।

अभिभूः परेषामभिभवनशीलोऽहम् आऽगमम् आगतोऽस्मि। किंभूतः अविराट्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स यदि मन्येत क्रुद्धोऽयमिति तमभि मन्त्रयते—
"या¹ तऽ एषा रराट्या तनूर्मन्योः क्रोधस्य नाशनी।
तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः ॥
द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्यसहासावि" ति५

स सभां प्रविष्टः यदि चेन् मन्येत जानीयात् अयं सभापतिः क्रुद्धः इति तं क्रुद्धमभिलक्षीकृत्य क्रोधापनयनाय मन्त्रयते या त एषेत्यादिना मन्त्रेण । असाविति क्रुद्धस्य नामग्रहणम् ॥५॥

अथ यदि मन्येत द्रुग्धोऽयमिति तमभिमन्त्रयते--²तान्ते वाचमास्यऽ आदत्तो हृदयऽ आदधे यत्र यत्र निहिता वाक् तां ततस्तत ऽआददे यदहं ब्रवीमि तत् सत्यमधरो मत्ताद्यस्वेति ॥६॥

विरुद्धतया राजते सविराट् रुद्धवीर्यः न विराट् अविराट् । तथा अप्रतिकाशी प्रतिवादिशून्यः श्राः इत्यव्ययं सम्बुद्ध्यर्थम् । यद्वा अप्रतिकाश्या इति पर्षदो विशेषणम् । अप्रतिक्षेपाया अस्याः पर्षदः सभाया ईशानः स्वामी स्वासु प्रजासु दुष्टरोऽपि स मयि सुजनः अस्त्विति शेषः । दुष्टरश्चोग्रः ॥४॥

(१)मन्त्रार्थः—प्रजापतिरनुष्टुप् लिङ्गोक्ता क्रोधापनये वि० ।

हे असौ अमुक नामन् सभेश ! ते तव रराटं ललाटं तत्र भवा रराट्या या क्रोधस्य तनूः देवा इन्द्राद्या ब्रह्मचारिणश्च सनकाद्या विनयन्तु अपनयन्तु । कथम्भूतस्य क्रोधस्य मन्योर्दीप्तस्य । किंभूता देवाः सुमेधसः स्वबुद्ध्या क्रोधमपाकर्तुं शक्ताः । किम्भूता तनूः नाशनी चतुर्वर्गस्येत्यर्थाद् एषा । ललाट्या वालिरूपा । मन्त्राभ्यासेनात्मनोऽप्युत्कर्षमाह-द्यौराकाशरूपोऽहमिति क्रोधाकारकत्वमुक्तम् । पृथिवी च क्षिति-रूपश्चाहमिति क्रोधाधारत्वेन स्वातन्त्र्यं चोक्तम् । अतस्तौमि तद् स्वरूपो भूत्वा ते तव क्रोधन्नयामसि तन्त्रबलेनापनयामि । कथम् अश्वतरी गर्भपुष्टिमसहमाना अमार्गेण मुञ्चन्ती तथेति व्याख्येयमिति ।

(२) मन्त्रार्थः—प्रजापतिरनुष्टप् ईशो वशीकरणे विनियोगः ।

हे सभेश भगवान् ! यद् द्रोहकारिणीं वाचम् आस्ये मुखे वर्तमानाम् आदत्ते उपक्रामति । तामहं ते तव हृदय एवादधे स्थापयामि । किञ्च यत्र यत्र स्थाने वाक् वायुवशान्निहिता तान्ततस्ततः स्थानाद् आददे यद् वश्यां करोमि । किंच । यदहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ यदि द्रुग्घो द्रोहकर्ताऽयम् इति मन्येत तर्हि तमभिमन्त्रयते तान्ते-वाचमित्यादिमन्त्रेण ॥६॥

एतदेव वशीकरणम् ॥७॥

एतदेव वशीकरणम् ॥७॥

इति तृतीयस्य त्रयोदशी कण्डिका ॥१३॥

रथाद्यारोहणादि ।

अथातो रथारोहणम् ॥१॥

अथ इदानीं कार्यार्थं जिगमिषोर्द्विजस्य यतो यानमपेक्षितमतो हेतो रथारोहणाख्यं कर्म गद्यत इति सूत्रशेषः ॥१॥

युङ्क्तेति रथं संप्रेष्य युक्त इति प्रोक्ते साविराडित्येत्य चक्रेऽ अभिमृशति ॥२॥ रथन्तरमसीति दक्षिणम् ॥३॥ बृहद-सीत्युत्तरम् ॥४॥

तत्र युङ्क्तेति सारथिं संप्रेष्य आज्ञाप्य ततः प्रेषितेन सारथिना युंक्तो रथ इति प्रोक्ते सति साविराडित्येतेन मन्त्रेण एत्य रथसमीपमागत्य चक्रे रथाङ्गे अभिमृशति । कथम् ? रथन्तरमसीत्यनेन मन्त्रेण दक्षिणम् बृहदसीत्यनेनोत्तरं चक्रम् ॥२॥३॥४॥

वामदेव्यमसीति कूवरीम् ॥५॥

वामदेव्यमसीत्यनेनमन्त्रेण कूवरीम् ईषादण्डाग्रम् अभिमृशतीत्यनुवर्तते॥५॥

हस्तेनोपस्थमभिमृशति-

(१)अङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनु संचरन्तौ

ब्रवीमि तव सत्यमस्तु । त्वं च यव मत्तः अधरो नीचश्च । य अय इदानीं स्व भव । अयेत्यत्रवर्णलोपः । अधर उ इति छेदः । तत्र उ इति दार्ढ्यार्थम् अतिशयेन स्वभूयाः यद्वतां मद् द्रोहकारिणीं वाचम् तव हृदय एव अतिशयने यस्त्र अवखण्डय शिष्टम् समानम् ॥१॥

(१) मन्त्रार्थः—अङ्कौ द्वौ अङ्काख्यगणावग्निविशेषौ एवं न्यङ्कावपि एवंभूतौ यावग्नी अभितो रथम् रथस्य सर्वतो रक्षकत्वेन ध्वान्तं दुर्गम्प्राप्य वातस्याग्रं मुख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरे हेतिरिन्द्रियवान् पतत्रि ते नोऽग्नयः पत्रयः पारयन्त्विति ॥६॥

हस्तेन करेण उपस्थं रथमध्यम् उपवेशनस्थानमिति यावत् अभिमृशति आलभते । हस्तेनेति सर्वत्र सम्बध्यते ॥६॥

(१)नमो माणिचरायेति दक्षिणन्धुर्यं प्राजति ॥७॥

नमो माणिचरायेत्यनेन दक्षिणं धूर्यं दक्षिणधुरायां युक्तम् अश्वं वृषभं वा प्राजति प्रतोदेन प्रेरयति, तूष्णीं वामम् ॥७॥

अप्राप्य देवताः प्रत्यवरोहेत् सम्प्रति ब्राह्मणान् मध्ये गाऽ अभिक्रम्य पितॄन् ॥८॥

अप्राप्य अनासाद्य दूरत एव देवता हरिहरब्रह्मादिकाः प्रत्यवरोहेत् रथादवतरेत् । ब्राह्मणान् विप्रान् संप्रति निकटे प्रत्यवरोहेत् मध्ये गाः सुरभीः प्राप्य प्रत्यवरोहेत् । पितॄन् पित्रादीन् मान्यान् अभिक्रम्य अभिमुखमेत्य प्रत्यवरोहेत् ॥८॥

न स्त्रीब्रह्मचारिणौ सारथी स्याताम् ॥ ९ ॥

स्त्री नारी ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च स्त्रीब्रह्मचारिणौ सारथी न स्याताम् न भवेताम् ॥९॥

मुहूर्तमतीयाय जपेदिहरतिरिह रमध्वम् ॥१०॥

(२)एके माऽस्त्विह रतिरिति च ॥११॥

अनु अनुसृत्य चरन्तौ सम्यग् गच्छन्तौ वर्तेते ये चापरे दूरे हेतिर्बृहज्ज्वालः तथा इन्द्रियानुग्राहकः इन्द्रियब्धात्रेन्द्ररथः तथा पतत्रि पक्षिकुलानुग्राहकमग्निस्त्रन्दम । एतेऽग्नयः नोऽस्मान् पारयन्तु निर्विघ्नमभीष्टं देशं प्रापयन्तु । किंभूताः पत्रयः अस्मन्मनोरथपूरणशीलाः ॥६॥

(१) मन्त्रार्थः—प्रजापतिऋषिरुष्णिक्छन्दः मणिचरो देवता प्रेरणे वि० । माणिचरो रथाधिष्ठात्री देवता ।

(२) मन्त्रार्थः—प्रजापतिर्यजुरग्निः रमणे विनियोगः ।

हे अग्नयः ! यूयम् एके मुख्या इह रथे रमध्वम् क्रीडध्वम्, यतो मम इह रथे रतिरस्तु । अतो मा माम् प्राप्य भवतामपि इह मद्रथे सुशोभना रतिरस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुहूर्तम् क्षणम् आतीयाय अत्येत्य जपेत् इह रतिरित्यादिकं मन्त्रम्॥१०-११॥

स यदि दुर्बलो रथः स्यात्तमास्थाय जपेदयं(१)वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति ॥१२॥

स रथी यदि चेदध्वानं गच्छन् दुर्बलः क्षीणो रथोऽस्येति दुर्बलरथः स्याद् भवेत् तदा तं रथमास्थायारुह्य अयं वामिति मन्त्रं जपेत् ॥१२॥

स यदि पुनर्भ्रम्यात् स्तम्भमुपस्पृश्य भूमिं वा जपेदेष वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति ॥१३॥

स रथो यदि पुनर्भ्रम्यात् चलने कुटिलो भवेत् तदा स्तम्भम् रथध्वज-दण्डं भूमिं वा उपस्पृश्य जपेत् एष वामश्विना रथ इति मन्त्रम् । मन्त्रो व्याख्यातः ॥ १३ ॥

तस्य न काचनार्तिर्न्न रिष्टिर्भवति ॥१४॥

तस्य रथिनः न काचन आर्तिः पीडा न च रिष्टिरुपसर्गो भवति य एवं दुर्बलरथ उद्भ्रान्तरथो वा जपति ॥१४॥

यात्वाऽध्वानं विमुच्य रथं यवसोदके दापयेदेषऽ उ वाहन-स्यापह्नव इति श्रुतेः ॥१५॥

यात्वा गत्वा अध्वानं मार्गं विमुच्य मुक्त्वा किं रथं रथयुक्तं वाहम् यवसं च उदकं च यवसोदके घासपानीये ते दापयेत् अश्वेभ्यो यवसोदके दीयेतामिति भृत्यान् प्रेषयेत् । कुतः ? एष उ वाहनस्य अपह्नवः क्षमापनम् इति श्रुतेः श्रवणात् । तस्माद्येन वाहनेन धावयेत्तद्विमुच्य ब्रूयात् पाययतैनं सुहितं कुरुतेति सूत्रार्थः ॥१५॥

इति तृतीयस्य चतुर्दशी कण्डिका ।

हस्त्याद्यारोहणम्—

अथातो हस्त्यारोहणम् ॥१॥

अथ रथारोहणानन्तरं हस्त्यारोहणं वक्ष्यते ॥१॥

---

(१) मन्त्रार्थः-तत्र द्वयोः प्रजापतिरनुष्टुप् अश्विनौ जपे विनियोगः । हे अश्विना ! अश्विनौ ! अयं वां युवयोः रथः दुर्गे विषमस्थाने स्तरः हिंसकाद्धेतोः मां मा रिषत् मा हिंसिष्ट । स्तृञ् रिषौ हिंसाथौं । एतेनोत्तरोऽपि व्याख्यातः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एत्य [1]हस्तिनमभिमृशति "हस्ति यशसमसि हस्तिवर्चसमसी"ति ॥२॥

एत्य हस्तिसमीपमागत्य हस्तिनं गजम् अभिमृशति आलभते हस्तियशसमसीति मन्त्रेण ॥२॥

अथारोहती"न्द्रस्य[2] त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारये"ति ॥३॥

अथाभिमर्शनानन्तरम् आरोहति हस्तिनम् इन्द्रस्य त्वेति मन्त्रेण ॥३॥

एतेनैवाश्वारोहणं व्याख्यातम् ॥४॥

एतेनैव हस्त्यारोहणेनैव अश्वारोहणं व्याख्यातं कथितम् ॥४॥

उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि[3] त्वष्टृदैवत्यः स्वस्ति मा संपारयेति ॥५॥

उष्ट्रं क्रमेलकम् आरोक्ष्यन् आरोढुमिच्छन्नभिमन्त्रयते त्वाष्ट्रोऽसीत्यादिना ॥५॥

रासभमारोक्ष्यन्नभिमन्त्रयते शूद्रोऽसि[4] शूद्रजन्माग्नेयो वै द्विरेताः स्वस्ति मा सम्पारयेति ॥६॥

रासभं गर्दभमारोक्ष्यन्नारोढुमिच्छन्ननमिन्त्रयते शूद्रोऽसीत्यादिना

१ मन्त्रार्थः—हस्तिनामैरावतत्वेन प्रसिद्धं यश एव हस्तियशसं तद्रूपोऽसि तथा तेषां वर्चो दीप्तिरेव हस्तिवर्चसं तद्रूपश्चासीति ॥२॥

२ मन्त्रार्थः-इन्द्रस्य वज्रेणायुधेन सहाहमिन्द्रो भूत्वा त्वा त्वामधितिष्ठामि सर्वशत्रुजयार्थमारोहामि । त्वं च मा मां स्वस्ति कल्याणं यथा तथा पारयेत्युक्तार्थम् ॥३॥

३ मन्त्रार्थः—परमेष्ठी यजुरुष्ट्रास्तदारोहणे विनियोगः । स्पष्टोऽर्थः ।

४ मन्त्रार्थः—विश्वामित्रः पङ्क्तिः रासभस्तदारोहणे विनियोगः।

हे रासभ ! त्वं शूद्रः हीनः असि । यतः शूद्रं शोकावहं जन्म यस्य स आग्नेयः अग्निदेवत्यः अश्वगर्दभाभ्यामुद्भूतत्वात् द्विरेताः ।

२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रेण अभिमुखः सन् मन्त्रं पठति । रासभोऽत्राश्वतरः प्रतीयते ॥६॥

चतुष्पथमभिमन्त्रयते-

नमो रुद्राय पथिषदे[1] स्वस्ति मा सम्पारयेति ॥ ७ ॥

चत्वारः पन्थानो यस्मिन् स चतुष्पथः चतुर्मार्गाभिसरणप्रदेशः तमभिमन्त्रयते नमो रुद्राय पथिषद इत्यादिमन्त्रेण ॥७॥

नदीमुत्तरिष्यन्नभिमन्त्रयते—

नमो रुद्रायाप्सुषदे स्वस्ति मा सम्पारयेति ॥ ८ ॥

नदीम् स्रवन्तीमुत्तरिष्यन् पारं जिगमिषन् नमो रुद्रायाप्सुषद इति मन्त्रेणाभिमन्त्रयते ॥ ८ ॥

नावमारोक्ष्यन्नभिमन्त्रयते—सुनावमिति ॥ ९ ॥

नावम् तरीम् आरोढुमिच्छन् सुनावमारोहेत्यनयर्चाऽभिमन्त्रयते ॥९॥

नदीमुत्तरिष्यन्नभिमन्त्रयते—सुत्रामाणमिति ॥१०॥

उत्तरिष्यन्ननुत्तर्तुंम्प्रत्यवरोढुमिच्छन् तामेवाभिमन्त्रयते सुत्रामाण- मित्यनयर्चा ॥ १० ॥

वनमभिमन्त्रयते—

नमो रुद्राय वनषदे स्वस्ति मा सम्पारयेति ॥११॥

वनं प्रवेष्टुमिच्छन् नमो रुद्राय वनसद इत्यादिनाऽभिमन्त्रयते ॥११॥

गिरिमभिमन्त्रयते—

नमो रुद्राय गिरिषदे स्वस्ति मा सम्पारयेति ॥१२॥

गिरिं पर्वतमारोढुकामोऽभिमन्त्रयते नमो रुद्राय गिरिषद इति मन्त्रेण ॥१२॥

श्मशानमभिमन्त्रयते—

नमो रुद्राय पितृषदे स्वस्ति मा सम्पारयेति ॥१३॥

१ मन्त्रार्थः—पथिषु सीदति तिष्ठतीति पथिषत्तस्मै । एवमुत्तरत्रापि ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्मशानं प्रेतदहनभूमिं कार्यवशात् प्राप्य नमो रुद्राय पितृषदे इति मन्त्रेणाभिमन्त्रयते ॥ १३ ॥

गोष्ठमभिमन्त्रयते—

नमो रुद्राय शकृत् पिण्डसदे स्वस्ति मा सम्पारयेति ॥१४॥

गोष्ठम् गोवाटं कार्यवशात् प्राप्य नमो रुद्राय शकृत् पिण्डसद इत्यादि मन्त्रेणाभिमन्त्रयते ॥ १४ ॥

यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदꣳ सर्वमिति श्रुतेः ॥ १५ ॥

यत्र च अन्यत्रापि अन्येष्वपि अनुक्तकार्येषु पूर्वं नमो रुद्रायेत्येव ब्रूयात् पश्चात् तानि कर्माणि कुर्यात् । कुतः ! हि यतः इदं विश्वम् रुद्र एवेति श्रुतेर्वेदवचनात् ॥१५॥

सिचाऽवधूतोऽभिमन्त्रयते—सिगसि न वज्रोऽसि नमस्तेऽअस्तु मा मा हिꣳसीरिति ॥१६॥

सिचा वस्त्रप्रान्तेनावधूतः तद्वाताहतस्तदा तां सिचमभिमन्त्रयते सिगसीत्यादिमन्त्रेण ॥१६॥

स्तनयित्नुमभिमन्त्रयते—

(१) शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः ।
शिवा नस्ताः सन्तु यास्त्वꣳ सृजसि वृत्रहन्निति ॥१७॥

स्तनयित्नुं मेघं गर्जन्तं शिवा नो वर्षा इत्यादि मन्त्रेणाभि मन्त्रयते॥१७॥

शिवां वाश्यमानामभिमन्त्रयते—शिवो नामेति ॥१८॥

शिवां शृगालीं वाश्यमानां शब्दं कुर्वाणां शिवो नामेत्यादि मा मा हिꣳसीरित्यन्तेन मन्त्रेणाभिमन्त्रयते ॥१८॥

१—हे इन्द्र ! शिवाः कल्याणकारिण्यो नोऽस्माकं वर्षा वृष्टयः सन्तु । तथा हेतयः ऐन्द्राण्यायुधानि शिवा नोऽस्माकं सन्तु । हे वृत्रहन् ! याश्च हेतीस्त्वं शत्रुषु सृजसि क्षिपसि ता अपि नः शिवाः सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शकुनिं वाश्यमानमभिमन्त्रयते—

[1]हिरण्यपर्ण शकुने देवानां प्रहितं गम ।

यम दूत नमस्तेऽस्तु किन्त्वाकार्कारिणोऽब्रवीदिति ॥१९॥

शकुनिं पक्षिणं कृष्णकाकमिति यावत् वाश्यमानं कूजन्तं हिरण्यपर्णेत्यादि मन्त्रेणाभिमन्त्रयते ॥१९॥

लक्षण्यं वृक्षमभिमन्त्रयते—

[2]मा त्वाऽशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः ।

अङ्कुरास्ते प्ररोहन्तु निवाते त्वाऽभिवर्षतु ।

अग्निष्टे मूलम्माहिंꣳसीत्स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पत इति ॥२०॥

लक्षण्यं वृक्षं मङ्गल्यं तरुमाम्रादिकमभिमन्त्रयते मा त्वाऽशनिरित्यादिमन्त्रेण ॥२०॥

स यदि किञ्चिल्लभेत तत् प्रति गृह्णाति—

द्यौस्त्वा ददातु पृथिवी त्वा प्रति गृह्णात्विति साऽस्य न ददतः क्षीयते भूयसी च प्रतिगृहीता भवति ।

अथ यद्योदनं लभेत तत् प्रतिगृह्य द्यौस्त्वेति तस्य द्विः

(१) हे हिरण्यपर्ण ! शीघ्रग ! हे शकुने ! देवानां प्रहितं प्रेषितं स्थानं गच्छतीति देवादिष्टं शुभाशुभं गमयतीति वा । भो यमस्य दूत ! ते तुभ्यं नमोऽस्तु त्वा त्वाम् कार्कारिणः इति द्वितीयार्थे षष्ठी कार्कारक्काकजात्यनुरूपं शब्दं कुर्वन्तं प्रति यमः किमत्रवीत । यद्वा कार्कारिणस्तव स्वामी यमस्त्वा किमब्रवीद मा ब्रवीत्वित्यर्थः ॥

(२) मन्त्रार्थः—प्रजापतिरनुष्टुप् वृक्षस्तद्रक्षणे विनियोगः—

हे वृक्ष ! त्वा त्वाम् अशनिर्वज्रो मा हिंसीत मा नाशयतु । एवमुत्तरत्रापि योज्यम् । परशुः कुठारः राजप्रेषितो दण्डो राजोपद्रवः अग्निश्च ते तव मूलं मा हिंसीत । ते तवाङ्कुराश्च प्ररोहन्तु पल्लवा उद्गच्छन्तु । निवाते निर्वाते अल्पवायौ वा त्वां प्राप्य देवेन्द्रोऽभिवर्षतु । ते तव स्वस्ति कल्याणमस्तु । हे वनस्पते ! मे ममापि स्वस्त्यस्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राश्नाति ब्रह्मा त्वा प्राश्नातु ब्रह्मा त्वा प्राश्नात्विति ॥२१॥

स द्विजः यदि चेत् किंचित् गोभूहिरण्यादिकं लभेत प्राप्नुयात् तदा द्यौस्त्वेति मन्त्रेण तत् प्रतिगृह्णाति स्वीकुरुते। सा दक्षिणा एवं विधाय दीयमाना अस्य ददतः दातुः उपयुज्यमानाऽपि न क्षीयते न ह्रसति प्रत्युत एवं प्रतिगृहीता सती भूयसी च उत्तरोत्तरमभिवर्द्धमाना भवति। अथ कदाचित् ओदनं भक्तं यदि लभेत प्राप्नुयात्तदा तत् प्रतिगृह्य आदाय द्यौस्त्वा ददात्विति मन्त्रं पठेत् मन्त्रपाठस्तु आदानानन्तरम् सर्वत्र स्वसत्ताप्राप्तये। तस्य लब्धस्यौदनस्य द्विः द्विवारं प्राश्नाति भक्षयति । कथं ब्रह्मा प्राश्नात्विति प्रथमम् ब्रह्मा त्वा प्राश्नात्विति द्वितीयम् ॥२१॥

अथ यदि मन्थं लभेत तम्प्रतिगृह्य द्यौस्त्वेति तस्य त्रिः प्राश्नाति ब्रह्मा त्वा प्राश्नातु ब्रह्मा त्वा प्राश्नातु ब्रह्मा त्वा पिबत्विति ॥२२॥

स द्विजः यदि मन्थं दधिमन्थं लभेत प्राप्नुयात्तदा तम्प्रतिगृह्यादाय द्यौस्त्वा ददात्विति मन्त्रेण स्वीकृत्य तस्य दधिमन्थस्य त्रिस्त्रिर्वारं प्राश्नाति। कथम्? ब्रह्मा त्वा प्राश्नातु इति प्रथमम्, ब्रह्मा त्वा प्राश्नात्विति द्वितीयम्, ब्रह्मा त्वा पिबत्विति तृतीयमिति त्रिभिर्मन्त्रैः ॥२२॥

अथातोधीत्याधीत्यानिराकरणम् ।
[1]प्रतीकम्मे विचक्षणं जिह्वा मे मधु यद्वचः ।
वर्णाभ्यां भूरि शुश्रुवे मा त्वं हार्षीः श्रुतम्मयि ॥

ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मणः कोशोऽसि । सनिरसि शान्तिरस्य निराकरणमसि ब्रह्मकोशं मे विश ॥ वाचा त्वा पिदधामि वाचा त्वा पिदधामीति स्वरकरण-

(१) मन्त्रार्थः—परमेष्ठी गायत्री अङ्गानि तदालम्भने विनियोगः— प्रतीकम् मुखम् मे मम विचक्षणं विशिष्टवर्णोच्चारणसमर्थम् । अस्त्विति शेषः। मधु मधुरं यद्वचस्तद् वदत्विति शेषः। भूरि बहु बहुकालं वा शुश्रुवे शृणवानि। शेषः। भो ब्रह्मन्! वेदपुरुष! मयि विषये यच्छ्रुतं शास्त्रं तज्ज्ञानं च त्वम् मा हार्षीः मा हर तदर्थं स्तौति। ब्रह्मणो वेदस्य प्रवचनमध्ययनं त्वमसि । ब्रह्मणः अधीतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवतु आप्यायन्तु मेऽङ्गानि वाक् प्राणश्चक्षुः श्रोत्रं यशो बलम् । यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥२३॥

इति तृतीयस्य पञ्चदशी कण्डिका

समाप्तं चेदं तृतीयं काण्डम् ॥

अथातोऽधीत्याधीत्य आवृत्यावृत्य अनिराकरणं अविस्मरणं कर्म कर्तव्यम् प्रतीकम्मे विचक्षणमिति मन्त्रेणाङ्गालम्भनम् ॥

इति पारस्कराचार्य विरचितं गृह्यसूत्रं समाप्तम् ॥ १५ ॥

इति श्रीमन्महामहोपाध्याय-प्रभुदत्तशास्त्रिपौत्रेण
श्रीविद्याधरशर्मपुत्रेण श्रीवेणीरामशर्मणा कृता
पारस्करगृह्यसूत्रवृत्तिः
समाप्ता ॥

वेदस्य प्रतिष्ठानं स्थितिराधार इति यावत् । ब्रह्मणस्तस्य कोशो गोपनं गृहम् । सनिः सम्भजनीयम् । शान्तिरनिष्टनिवृत्तिः । अनिराकरणमप्रमादः अविस्मरणमिति यावत् । किञ्च । मे मम ब्रह्मकोशं वेदाशयं विश प्रविश । सर्वेषां वेदानाम् हृदयमेकायनमिति श्रुतेः । अहञ्च वाचा सत्यवाण्या त्वा त्वाम् पिदधामि गोपायामि छादयामीत्ति वा । यथा मत्तो नापैषि । आवृत्तिर्दार्ढ्यार्था । स्वरा उदात्तादयः, करणानि संवृत्तादीनि कण्ठ्याः कण्ठे भवा अकुहविसर्जनीयाः, औरसाः ह्य हकारा वर्गपञ्चमान्तस्थाः। दन्त्याः लृतुलसाः । ओष्ठ्याः उपूपध्मानीयाः, तेषां ग्रहणमुपादानम् धारणं स्थिरीकरणम्, उच्चारणं प्रयोगः । तेषु शक्तिर्मय्यस्तु । अङ्गानि गात्राणि आप्यायन्तु । तान्याह—वाक् गीः प्राणो वायुः प्रधानभूतः, चक्षुर्नेत्रबलम्, श्रोत्रं तत् पाटवम् । कीर्तिः, बलं शारीरम्, एतान्यङ्गान्याप्यायन्त्विति संबन्धः । परस्मैपदं छान्दसम् । यन्मे मया श्रुतम् मीमांसादि अधीतम् ऋगादि । यद्वा श्रुतं गुरुमुखात् अधीतम् अभ्यस्तम् अधिगतं वा तत् सर्वं मे मम मनसि हृदये तिष्ठतु स्थिरमस्तु मापयत्वित्यर्थः । वीप्सा ग्रन्थसमाप्तिद्योतनार्था ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेपककण्डिकाः ।

गर्भाधानम् ।

अथर्तुमतीं जायामभि गच्छेत् ॥१॥

अथ विवाहानन्तरम् ऋतुमतीम् ऋतुस्नातां भार्यां मैथुनाय अभिगच्छेत् ॥१॥

पिण्डपितृयज्ञेन यजेत ॥२॥

साग्निकोऽमायां गृह्याग्नौ श्रौतसूत्रोक्तेन पिण्डत्रयदानात्मकेन पिण्डपितृयज्ञेन यजेत पुत्रप्राप्त्यर्थम् । श्रौताग्निमांस्तु दक्षिणाग्नौ । अनग्नेस्तु न पिण्डपितृयागः ॥२॥

मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा ॥३॥

पितृ-पितामह-प्रपितामहेभ्यः पिण्डदानं क्रियते तत्र मध्यमस्य पिण्डस्य प्राशनं कुर्यात्पत्नी ॥३॥

ततऽ एतामाहुतिं जुहोत्याधत्त पितर इति ॥४॥

आधत्त इति मन्त्रेण एतां पिण्डभक्षणरूपामाहुतिं पत्नी जठरे जुहोति पिण्डं भक्षयतीति यावत् । "आधत्त इति मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा" (का.श्रौ.सू.अ.४कं.१.) इति कात्यायनश्रौतसूत्रे एकवाक्यत्वात् । एतेनैव सिद्धे होमविधानार्थं पुनर्वचनमित्यपरे ॥४॥

अलङ्कारमवजिघ्रति ॥५॥

अथवा पिण्डस्यावघ्राणमेव कुर्यात् ॥५॥

अथर्तुमतीजायाहृदयमालभ्य पूर्ववत् ॥६॥

पूर्ववत् यत्ते सुसीम (१, ११) इति मन्त्रेण पत्न्या हृदयं स्पृशेत् ॥६॥

सव्येन पाणिनोपस्थमभिमृशति भग प्रणेतरिति प्राणुतेदानीमिति ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"उतेदानीम्" (३४, ३८) इति मन्त्रात् पूर्ववचनेन "भग प्रणेतः" (३४, ३७) इति मन्त्रेण योनिं स्पृशेत् ॥७॥

रेतो मूत्रमिति सन्धत्ते ॥८॥

'रेतो मूत्रम्' इति मन्त्रेण (१६, ७६) शिश्नं प्रवेशयति ॥८॥

गायत्रेणेति प्रतिमन्त्रं मन्थति ॥९॥

मन्त्रत्रयेणादौ मैथुनम्, ततस्तूष्णीम् ॥९॥

पुत्रकामोऽभिगच्छेन्नित्यम् ॥१०॥

इति गर्भाधानस्य प्रथमा कण्डिका ॥१॥

अथ गर्भाधानम् ॥१॥

वक्ष्यत इति सूत्रशेषः ॥१॥

स्त्रियाः पुष्पवत्याश्चतुरहादूर्ध्वं स्नात्वा विरजायास्तस्मिन्नेव दिवाऽ आदित्यं गर्भमित्यादित्यमवेक्षते ॥२॥

ऋतुमती यदा चतुर्थेऽहनि शुध्यति तदनन्तरं दिवा सूर्यावेक्षणं कुर्यात् ॥२॥

गृहे वा स्नापयित्वा तामभिगच्छेदिति श्रुतेः ॥३॥

गृहे वा नद्यादौ वेति विकल्पः ॥३॥

तस्मिन् प्रजायाः संभवकाले निशायां कुर्यात् ॥४॥

रात्रौ मैथुनं कार्यं न दिवा ॥४॥

दिवा गमने दोषमाह—

यदि दिवा मैथुनं व्रजेत् क्लीवाऽ अल्पवीर्याऽ अल्पायुषाश्च प्रसूयन्ते तस्मादेतद् वर्जयेत्प्रजाकामो गृही श्रुति-स्मृति-विरोधाभ्याम् ॥५॥

स्पष्टोऽर्थः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्षिणेन पाणिना ऊरू प्रसार्य प्रजास्थानमभिमृशति- "पूषा भगꣳ सविता मे ददातु रुद्रः कल्पयतु ललामगुम् । विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥ गर्भं तेऽ अश्विनौ देवावाधत्तां पुष्करस्रजाविति सꣳ सृजेथास्तेजो वैश्वानरो दद्याद् ब्राह्मणमामन्त्रयते ब्रह्मा गर्भं दधातु" इति ॥६॥

स्पष्टम् ॥६॥

प्राङ्मुखऽ उदङ्मुखो वोपविष्टो मन्थेत ॥७॥

रेतो मूत्रमिति चैके स्रावणं कुर्यात् ॥८॥

एके आचार्या रेतो मूत्रमिति रेतो विसर्जयेदिति वदन्ति । एके तूष्णी-मिति विकल्पः ॥८॥

गर्भाधानस्य द्वितीया कण्डिका ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमलजननशान्तिः

अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामः ॥१॥

जायमानस्य पुत्रद्वयस्य कन्याद्वयस्य कन्यापुत्रयोर्वा जनने शान्तिरुच्यते॥१॥

अन्यत्रापीयं शान्तिरिष्यते तदाह—

यस्य भार्या गौर्दासो महिषी वडवा वा विकृतं प्रसवेत्प्रायश्चित्ती भवेत् ॥२॥

विकृतं यमम् ॥२॥

तत्र कर्तव्यमाह—

चतुर्णां क्षीरवृक्षाणां काषायमुप सꣳहरेत् ॥३॥

चतुर्णां केषां चन क्षीरवृक्षाणां काषायं कुर्यात् ॥३॥

प्लक्षवटौदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषाम् ॥ ४ ॥

एतेषां च काषायं कुर्यात् ॥४॥

अपो हिरण्यं दूर्वाङ्कुराम्रपल्लवैरष्टौ कलशान् प्रपूर्य सर्वौषधीनां च ॥५॥

पूर्वोक्तैः कषायैरद्भिर्हिरण्येन दूर्वादिभिः सर्वौषधीभिश्च अष्टौ कलशान पूरयेत ॥ ५ ॥

दम्पतो स्नापयित्वाऽऽपोहिष्ठेति तिसृभिः कयानश्चित्रऽ इति द्वाभ्यां पञ्चैन्द्रेण पञ्चवारुणेनेदमापः प्रवहतेत्त्यपाघमिति स्नापयित्वा ॥६॥

दम्पती सन्तानं चैभिर्मन्त्रैः स्नापयेत् ॥६॥

अलङ्कृत्य तौ दर्भेषूपवेश्य तत्र मारुतꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः ॥७॥

मरुद्देवताकस्थालीपाकश्रपणानन्तरमादौ स्नानमन्त्रैराज्यहुतिहोमः॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा पावकाय स्वाहा मरुताय स्वाहा मारुताय स्वाहा मरुद्भ्यः स्वाहा यमाय स्वाहाऽन्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥८॥

एतदेव गृहोत्पातेषूलूकः कपोतो गृध्रो वा श्येनो वा गृहं प्रविशेद्वल्मीकं मधुजालं वा भवेदुदकुम्भप्रज्वलनासनशयनयानभङ्गेषु गृहगोधिका कृकलासशरीरसर्पणे छत्रध्वजविनाशे सार्पे नैर्ऋते गण्डयोगेष्वन्येष्वप्युत्पातेषु भूकम्पोल्कापातकाकसर्पसङ्गमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशान्त्युक्तेन विधिना कृत्वाऽऽचार्याय वरं दत्वा ब्राह्मणान् भोजयित्वा स्वस्ति वाच्याशिषः प्रतिगृह्य शान्तिर्भवति शान्तिर्भवति ॥९॥

एतदेव पूर्वोक्तं प्रायश्चितं गृहोत्पातेषु भवति । तानेव गृहोत्पातानाह ऽलूक इत्यादिना ॥ ९ ॥

यमलजननशान्तौ प्रथमा कण्डिका ॥१॥

अथ यमलचरुं मारुतं व्याख्यास्यामः ॥१॥

यस्य च यमलौ पुत्रौ दारिका वा प्रजायेत पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमाहृत्याश्वत्थन्यग्रोधौदुम्बराश्चत्वारः ॥२॥

अविधवा स्नापयति, ब्रह्मचारिणो वा शुक्लवाससऽऐन्द्रीं दिशमुदीचीं मङ्गलं पूर्ववद् गायन्त्यो यमलिनीं स्नापयन्ति ॥३॥

आचार्यः स्नापयति वसोः पवित्रेण शतधारेण चेति ॥४॥

मन्त्रेण ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टभिः कलशैः स्नात्वाऽप्रतिरथं जपेदिदमापः प्रवहतेति ॥५॥

अप्रतिरथमाशुः शिशान इति सप्तदशर्चं द्वादशर्चं वा सूक्तम्, इदमाप इति मन्त्रं च जपेत् ॥५॥

तौ स्नापितौ वरं प्रयच्छति ॥६॥

आचार्यायाभिलषितं वस्तु प्रयच्छतः ॥६॥

अनडुहमातृभ्यश्च ॥७॥

गोभ्यो घासं प्रयच्छेदित्यर्थः ॥७॥

हिरण्यं वस्त्रमेव परीतोषणम् ॥८॥

सुवर्णं वस्त्रं च दद्यात् ॥८॥

वाजे वाजेऽवतेति जपेत् ॥९॥

आघारं मारुतं चरुं जुहोति—मरुताय स्वाहा मारुताय स्वाहा मरुद्भ्यो विष्णवे प्रजापतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृते स्वाहेति ॥१०॥

आघाराज्यभागौ हुत्वा चरुहोमः कार्यः ॥१०॥

प्राशनान्तेऽश्वत्थं प्रदक्षिणीकृत्योपविशेत् ॥११॥

तदेव तन्त्रꣳ समाप्य ततो ब्राह्मणभोजनम् ॥१२॥

एवं प्रकारेण तन्त्रमनुष्ठानं समापयेदिति ॥१२॥

इति यमलजननशान्तौ द्वितीया कण्डिका ॥२॥

मूलशान्तिः

अथातो मूलविधिं व्याख्यास्यामः ॥१॥

मूलांशे प्रथमे पितुर्नेष्टा, द्वितीये मातुस्तृतीये धनधान्यस्य, चतुर्थे कुलशोकावहः, स्वयं पुण्यभागी स्यात् ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलनक्षत्रे मूलविधानं कुर्यात् ॥ ३ ॥

सर्वौषध्या सर्वगन्धैश्च संयुक्तं तत्रोदकुम्भं कृत्वा वस्त्र-गन्धपुष्परत्नसहितश्वेतसिद्धार्थ-कुसुमायुक्तं कुर्यात् ॥४॥

तस्मिन् रुद्रान् जपित्वाऽप्रतिरथꣳ राक्षोघ्नꣳ सूक्तम् ॥५॥

रुद्रा नमस्ते इत्यध्यायः । अप्रतिरथ आशुः शिशानः इति । राक्षोघ्नं कृणुष्व पाज इति पञ्चर्चं सूक्तम् ॥५॥

द्वितीयोदकुम्भं कृत्वा चतुःप्रस्रवणसंयुक्तम् ॥६॥

द्वितीयं कलशं चतुर्दिक्षु चतुश्छिद्रसंयुक्तं स्थापयेत् ॥६॥

तस्मिन्नुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बद्ध्वा ॥७॥

तस्य कलशस्योपरि वस्त्रबद्धानि वक्ष्यमाणानि वंशपात्रे निधाय स्थापयेत् ॥७॥

तस्मिन्प्रधानानि मूलानि वक्ष्यामि—हिरण्मयमूलꣳ सप्त धान्यानि, प्रथमां कार्ष्मर्या सहदेव्यपराजिता वाला पाठा शङ्खपुष्प्यधोपुष्पी मधुयष्टिका चक्राङ्किता मयूरशिखा काक-जङ्घा कुमारीद्वयं जीवन्त्यपामार्ग भृङ्गराज लक्ष्मणा सुलक्ष्मणा जाती व्याघ्रपत्रश्चक्रमर्दकः सिद्धेश्वरोऽश्वत्थोदुम्बरपलाश प्लक्षवटार्कदूर्वारोहितकशमीशतावरीत्येवमादि मूलं पूरयित्वा ॥८॥

तत्र सुवर्णादीनि शतमौषधानि यथासंभवं प्रक्षिपेत् ॥८॥

तस्मिन्निषिद्धानि मूलानि वक्ष्यामि-बैल्व-धव-निम्ब-कदम्ब-राजवृक्षोक्षशाल - प्रियालु-दधि-कपित्थ-कोविदार-श्लेष्मान्तक-विभीतक-शाल्मलि ररलु सर्वकण्टकिवर्जम् ॥९॥

विल्वादीनि नोपयुञ्जीत ॥ ९ ॥

तत्राभिषेकं कुर्यात्पितुः शिशोर्जनन्याः ॥१०॥

देवस्य त्वेत्यौदुम्बर्यासन्दीमुदगग्रामास्तृणाति तत्रासी-नात्संपातेनैकेनाभिषिञ्चति शिरसोऽध्यनुलोमꣳ शिरो मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रोर्यश इति यथालिङ्गमङ्गानि संस्पृशति ॥११॥

अभिषेकार्थामौदुम्बरीमुद्गमासन्दीं निधाय तत्र पितरौ शिशुं चोपवेश्य देवस्य त्वेत्यारभ्य यज्ञे इत्यन्तैर्मन्त्रैरभिषिञ्चति। शिरस आरभ्य पादान्तं प्रतिलोमम्। तत्र शिरो म इत्यादि मन्त्रोच्चारणकाले शिरआदीनामङ्गानां स्पर्शं च कुर्यादाचार्यः ॥ ११ ॥

स्नात्वा तदूर्ध्वं नैर्ऋतं पायसꣳ श्रपयित्वा कार्ष्मर्यमयꣳ स्रुक् स्रुवं प्रतप्य संमृज्यान्वारब्धऽ आघारावाज्यभागौ हुत्वाऽसुन्वन्तमिति चतस्रः स्थालीपाकेन जुहुयात् ॥१२॥

असुन्वन्तमित्यारभ्य चतसृभिर्ऋग्भिर्होमः ॥१२॥

पञ्चदशाज्याहुतीश्चतुर्गृहीतेन जुहोति— कृणुष्व पाज इति पञ्च, मानस्तोक इति द्वे, या ते रुद्र शिवा तनूरिति "अग्नी रक्षाꣳसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावकऽ ईड्य" इति, त्वन्नः सोम विश्वतो रक्षा राजन्नघायतो न रिष्यत्वावतः सखेति ॥१३॥

स्विष्टकृदादि प्राशनान्ते कृष्णा गौः कृष्णाश्च तिला हेममयमूलꣳ० सप्तधान्यसंयुक्तमाचार्याय वरं दद्यात् ॥१४॥

कृष्णोऽनड्वान् ब्रह्मणे दद्यान्नक्षत्रसूचकेभ्यो वासो दद्यात् ॥१५॥

अन्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात् ॥१६॥

कृशरान्न—पायसेन ब्राह्मणान् भोजयेत् ॥१७॥

सार्पनैर्ऋते गण्डजातानामेष एव विधिः कात्यायनेनोक्तः कात्यायनेनोक्तः ॥१८॥

आश्लेषायां मूले गण्डयोगे चोत्पन्नस्य एष एव शान्तिप्रकारः कात्यायनोक्तो बोध्यः ॥१८॥

इति मूलशान्तिकण्डिका ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्णवेधः—

अथ कर्णवेधः ॥१॥

वर्षे तृतीये पञ्चमे वा पुष्ये तु चित्रा-हरि-रेवतीषु पूर्वाह्णे ॥२॥

कुमारस्य मधुरं दत्वा प्राङ्मुखायोपविष्टाय ॥३॥

दक्षिणं कर्णमभिमन्त्रयते भद्रं कर्णेभिरिति ॥४॥

सव्यं वक्ष्यन्तीवेदिति च ॥५॥

अथ भिन्द्यात् ॥६॥

ततो ब्राह्मणभोजनम् ॥७॥

स्पष्टम् ॥१-७॥

इति कर्णवेधकण्डिका ॥१॥

वेदव्रतादेशः—

अथोपनीतो ब्राह्मणस्त्रिशिखः शिखी जटिलो मुण्डो वाऽक्षारालवणाशी स्यात् ॥१॥

अथोपनयनानन्तरं ब्राह्मणो यथागोत्रं त्रिशिख्यादिमान् भवेत्। तथा च स्मृतिः—'मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखा जटः' इति।

ब्रह्मचर्ये स्थितः क्षारलवणे वर्जयेत् ॥१॥

सावित्रꣳ षड्रात्रं त्रिरात्रꣳ सद्यस्कालं वा चरेत् ॥२॥

सावित्रं व्रतमादौ चरेत्। अत्राऽग्निं संस्थाप्य आज्यभागान्ते वेदारम्भाऽऽहुतयो हुत्वा सावित्रीप्रदानम्, सन्ध्योपासनम्, अग्निपरिचरणम्, अभिवादनम्, भिक्षाचरणम्, पुनराज्यभागौ, वेदाहुतीः, सन्ध्यामग्निपरिचरणम्, व्रतोत्सर्गं च कृत्वा 'अप्स्वन्तरि'ति त्रिभिर्मन्त्रैः क्रमेण दण्ड-मेखला-यज्ञोपवीतानि अप्सु प्रक्षिप्य दधि-घृत-शर्कराणां प्रत्येकं प्राशनं कुर्यादिति॥२॥

एतदेव व्रतमुदीक्ष्य दण्डमपो निधाय मेखलां यज्ञोपवीतं चाप्स्वन्तरिति प्रत्यृचम् ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सावित्रं व्रतमुद्दिश्य दण्डादिकमप्सु निदध्यादिति पूर्वसूत्रे उक्तम्। तत उपनयनवत् पुनः दण्डादिकं गृह्णीयात्, एतच्च सर्वत्र व्रतारम्भे बोध्यम् ॥ ३ ॥

नमो वरुणायेति त्रिमधुरं दत्वा ॥४॥

दधि-घृतं-शर्करा चेति मधुरत्रयमुच्यते ॥४॥

ततोऽस्याऽऽग्नेयं प्रथमं वेदव्रतमादिशेत् ॥५॥

आग्नेयादिषु पञ्चसु व्रतेषु सावित्रव्रतवत् सर्वो विधिरनुष्ठेयः ॥५॥

ब्राह्मण-क्षत्रिय-विशां पञ्च सांवत्सरिकाणि वेदव्रतानि भवन्ति ॥६॥

वक्ष्यमाणानि आग्नेयादीनि एकैकसंवत्सरसाध्यानि भवन्ति ॥६॥

तान्येवाह—

आग्नेयꣳ शुक्रियमौपनिषदꣳ शौलभं गोदानमिति॥७॥

एतानि आग्नेयादीनि पञ्च व्रतानि एकैकसम्वत्सरसाध्यानीत्युक्तम्, तत्राऽऽग्नेयव्रते प्रतिदिनं सावित्रव्रतवत् भिक्षाचरणान्तं कर्म कृत्वा सायमग्निं परिचर्य 'सामिधाग्निन्दुवस्यत' इत्याद्याग्नेयवेदविभागं सम्वत्सरपर्यन्तं पठेत्, अन्ते सावित्रव्रतवद् व्रतमुत्सृजेत्। एवम्—अन्येष्वपि व्रतेषु व्रतग्रहण-व्रतोत्सर्गौ बोध्यौ। विशेषस्तु अनुपदमेव वक्ष्यते ॥ ७ ॥

पञ्च सांवत्सरिकाणि वेदव्रतानि चरित्वा स्नात्वोपव्रतं चरेत् ॥ ८ ॥

स्नात्वा=समावर्तनं कृत्वा उपव्रतं तिस्रोरात्रीर्व्रतं चरेदित्यादिना वक्ष्यमाणं व्रतं कुर्यात् ॥ ८ ॥

त्रिस्ववगुण्ठनꣳ शुक्रियादिषु ॥९॥

शुक्रियौपनिषच्छौलभेषु त्रिषु व्रतेषु "अवगुण्ठनं निशामुखे त्रिगुणेन वस्त्रेण नाभिमात्रं यावत् माणवकस्य प्रच्छादनम्" तत्कुर्यात्। एवम्- प्रच्छादितो ब्रह्मचारी सूर्योदयपर्यन्तं तिष्ठेत्। एतच्चावगुण्ठनम् सम्वत्सरस्यान्तिमेऽह्नि कर्तव्यम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्रियर्ठ० शुक्राभिः श्रावयेदौपनिषदमौपनिषद्भिः शौलभर्ठ० शौलभिनोभिः ॥ १० ॥

शुक्रियादिषु त्रिषु व्रतेषु सम्वत्सरं यावत् क्रमेण 'ऋचं व्वाचम्' इति शुक्रियम्, 'द्वया ह वै प्राजापत्या' इत्याद्युपनिषद्भागम्, शौलभिनीर्ऋचश्च पठेत् ॥ १० ॥

अथवाऽविद्यमानऽ आ ब्रह्मन्नुदीरतामानो भद्राऽ अंशुः शिशानऽ इमा नु कमिति च ॥ ११ ॥

पूर्वोक्तानाम् ऋचं व्वाचमित्यादिमन्त्राणामज्ञाने आ ब्रह्मन् इत्यादीन् मन्त्रान् पठेत् ॥ ११ ॥

वेदशिरसाऽवगुण्ठयेत् ॥१२॥

पूर्वोक्तमवगुण्ठनं वेदशिरसा गायत्र्या कुर्यात् ॥ १२ ॥

अवगुण्ठनीं त्रिवलिं पञ्चवलिं वा नाभिदेशात्प्रच्छाद्य वाग्यतोऽरण्येऽधः शयीत ग्रामे गोष्ठे देवतायतने वा ॥१३॥

अवगुण्ठनीं-अवगुण्ठनवस्त्रं त्रिबलिं त्रिगुणितं पञ्चवलिं पञ्चगुणितं वा नाभिदेशं यावत् माणवक आत्मानं प्रच्छाद्य रात्रावरण्यादौ शयीत॥१३॥

व्युष्टायामवगुण्ठनीमरण्ये विसृजेत् ॥१४॥

ग्रामशयनपक्षे प्रातररण्यं गत्वा अवगुण्ठनवस्त्रमपसारयेत् ॥१४॥

अदृश्रमस्योदु त्यं चित्रं देवानामित्युदितेऽर्के जपति ॥१५॥

स्पष्टोऽर्थः ॥१५॥

द्यौः शान्तिरिति शान्तिं करोति ॥१६॥

ताम्रपात्रे उदकं कृत्वा द्यौः शान्तिरित्यभिमन्त्रयेत् । इदमेव शान्तिःकरणम् ॥१६॥

शान्तिभाजनं गुरवे दद्यादेवमेवावगुण्ठनीं च ॥१७॥

शान्तिभाजनं पूर्वोक्तं ताम्रपात्रम्, अवगुण्ठनवस्त्रं च आचार्याय दद्यात् ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोदाने गोमिथुनं तस्माद्गोदानमिति तस्माद्गोदानमिति ॥१८॥

गोदानेव्रते त्रिष्ववगुण्ठनमिति सूत्रणात् अवगुण्ठनवस्त्र-शान्तिभाजनादीनामभावात् न तयोर्दानम्, किन्तु गोमिथुनं दद्यात्। तस्मादेतस्य व्रतस्य गोदानमिति नामसम्पन्नम्। अत्राऽस्मिन् व्रतविसर्गे दण्ड-मेखला-यज्ञोपवीतानामप्सु प्रक्षेपाभावः। अग्र्यत्वे एतेषां व्रतानामनुष्ठानं न प्रचलति॥१८॥

इति वेदव्रतादेशकण्डिका ॥१॥

पृष्टोदिविविधानम्—

अथातो धर्मजिज्ञासा ॥१॥

केशान्तादूर्ध्वमपत्नीकऽ उत्सन्नाग्निरनग्निको वा प्रवासी वा ब्रह्मचारी वा ॥२॥

अथावसथ्याग्निमतः औपासनहोमविधानानन्तरं अपत्नीकादीनां होमविधिरुच्यते— एतच्च मातृपूजाभ्युदयिकश्राद्धानन्तरं कर्तव्यम्॥१॥२॥

अन्वग्निरिति ग्रामाग्निमाहृत्य पृष्टोदिवीत्यधिष्ठाप्य त्रिभिश्च सावित्रैः प्रज्वाल्य ताँ सवितुस्तत्सवितुर्विश्वानि देव सवितरिति ॥३॥

त्रिभिश्च सावित्रैः 'तत्सवितुः, ताँ सवितुः, विश्वानि देव, इति तिसृभिर्ऋग्भिरग्नेः प्रज्वालनं कुर्यात्। शेषं सुगमम् ॥३॥

पूर्ववदक्षतैर्हुत्वा पाकं पचेत् ॥४॥

पूर्ववत् औपासनहोमवत् अक्षतादिना एतस्मिन्नेवाऽग्नौ हुत्वा वैश्वदेवभोजनाद्यर्थं पाकं कुर्यात् ॥ ४ ॥

तत्र वैश्वदेवं ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायाऽनुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृत इति ॥५॥

तत्र-तस्मिन्नेवाऽग्नौ वैश्वदेवं कुर्यात्। अत्र निरग्नेः सप्त आहुतयः तास्तु पञ्चेत्युक्तम् प्राक् ॥५॥

उपस्पृश्य पूर्ववद्बलिकर्म ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप उपस्पृश्य पूर्ववत् बलिकर्म-भूतयज्ञादिकं कुर्यात् ॥ ६ ॥

एवं कृते न वृथापाको भवति ॥ ७ ॥

एवं कृते "अनग्निकस्तु यो विप्रः वृथापाकस्तु स स्मृतः । वृथापाकस्य भुञ्जानः प्रायश्चित्तं समाचरेत्" इति स्मृतिविहितो दोषो न भवति ॥७॥

न वृथापाकं पचेन्न वृथोपाकमश्नीयात् ॥८॥

स्पष्टोऽर्थः ॥८॥

अत्र पिण्डपितृयज्ञः पत्ताद्याग्रयाणादि कुर्यात ॥९॥

अस्मिन्नेव पृष्टोदिवि।विधिना स्थापितेऽग्नौ सायं प्रातर्होमादि कुर्यात् ॥ ९ ॥

इति पृष्टोदिविकण्डिका ॥ १ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ साग्नेः प्रवसतो गृहस्थितस्य च पक्वान्नभक्षणनिर्णयः—

तत्र गृहे वर्तमानस्य साग्नेः गृह्याग्निपक्वमेवाऽशनीयम्—

"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि ।
पञ्च यज्ञविधानं च पक्तिं चान्वाहिकीं गृही ॥"
(मनु०)

इति गृह्याग्निपक्वस्य विधानात् ।

"नित्यपाकस्य शालाग्ने-रेकदेशस्य कार्यतः ।
पाकार्थमुल्मुकं हृत्वा तत्र पक्त्वा महानसे ॥
वैश्वदेवोऽग्न्यगारे स्यात् पाकार्थः सोऽप्यलौकिकः ।
भूरिपाको भवेद्यत्र श्राद्धादावुत्सवेषु च ॥
कृतेऽपि वैश्वदेवे स लौकिको नैव कार्यतः ।
होमेनान्तरितं केचिदाहुः सर्वत्र लौकिकम् ॥
न तत्समञ्जसं तेषामुपयड्ढोमदर्शनात् ।"

इत्यादिना शाङ्खायनकारिकावचनेन पाकार्थाऽऽहृतस्योल्मुकस्य समासे कृते महानसस्थस्यावशिष्टाग्नेरपि श्राद्धादिपाकाद्यर्थतोऽलौकिकत्वोक्तेः । ततोऽपि धूपाद्यर्थं नीतानामग्नीनां लौकिकत्वोक्तेश्च । शेषाग्नौ महानसे पक्वस्य भक्षणे न दोषः, न प्रायश्चित्तम् (स्मा०पृ०१६९–१७५) इति साग्निकस्य सायं प्रातर्भोजने पाकाग्निः निर्णीत एव । यदि दैवात् मानुषाद्वाऽपराधात् शान्ते महानसस्थेऽग्नौ उपवासप्रसङ्गः । अत्रार्थे यो हि प्रोषितस्य निर्णयः स एव ग्राह्यः । स च (स्मा० पृ० २६६–२७१) "अथ पाकभोजनविधिरित्युपक्रम्य "इति साग्निकप्रवासे भक्ष्याऽभक्ष्यनिर्णयः" इत्यन्तेन ग्रन्थेनोक्तः । तत्र—

"इक्षुक्षीरविकाराश्च भ्राष्ट्रभृष्टयवा अपि ।
पराग्निपक्वं न ज्ञेयं प्रवासे चाग्निहोत्रिणः॥"(ध०सि०पृ० २३७)

इति भ्राष्ट्राग्निभृष्टान्नस्य तथेक्षुविकारस्य गुडशर्करादेः, क्षीरविकारस्य पायस-दधि-घृत-तक्र-किलाट-चूर्णिकाऽऽमिक्षादेश्च पराग्निपक्वस्याऽपि भक्षणं कार्यम् । न तु एतद्व्यतिरिक्तस्य फलान्नवार्यादेरपि पराग्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

पक्वस्य भक्षणं कर्त्तव्यम्। यच्च-"यदन्नं वारिहीनमिति" (ध० सिं० पृ० २३७)। तथा—"जलं विना यदन्नमिति" (स्मा० पृ० २७१) च वचनं तद् भ्राष्ट्रभृष्टाभिप्रायकमेव। यतः—

"पराग्निपक्वं नाश्नीयाद्विहाय गुडगोरसौ" इति (स्मा० पृ०।२६८) पूर्वार्धेन गुडगोरसातिरिक्त-पराग्निपक्वभक्षणं निषिध्य शक्तस्य—

"शाकपिण्याकसक्त्वादि-आममद्यात् फलादिकम्"।

इत्युत्तरार्धेन शाक-फलमूलादेः आमस्यैव भक्षणमनुवदता सक्त्वाद्युक्त्या च भ्राष्ट्राग्निरेवाऽनुमतः। यत्तु—

"कन्दुपक्वं न निषिद्धं शिष्टाऽऽचारात्"(स्मा. पृ. २६८) इति। तत्र "कन्दुपक्वं भाषायां (हलवाई) कृतमिति कैश्चिद् व्याख्यातम्। तन्न? कन्दुपक्वेन भ्राष्ट्रभृष्टयवादेरेव ग्रन्थकृतोऽभिप्रेतत्वात्। यतः—उत्तरग्रन्थे "तथा च त्रिकाण्डमण्डनः"—"इक्षुक्षीरविकारांश्च भ्राष्ट्रभृष्टयवाँस्तथा" इत्यादौ तथैवाऽवगतेः। किञ्च "फलादि शब्दो हविष्यान्नेऽपि वर्त्तते" इत्युपक्रम्य"अग्न्युदकलवणादि-सर्वसंयोगेन यत् पक्वं तन्निषिध्यत इत्यादि-ज्ञातव्यम्" (स्मा. पृ. २७१) इत्यन्तेन ग्रन्थेन वारिहीनं पक्वमन्नमपि फलवदिति यदुक्तं तन्निरग्निकेन शूद्रस्पृष्टमपि ग्राह्यमित्यर्थाऽवबोधकम्। न तु साग्निकस्य जलं विना पराग्निपक्वान्नभक्षणार्थकम्। पूर्वोत्तरग्रन्थविरोधात्। तथा हि "निरग्नेस्तु" (स्मा. पृ. २७०) इत्यादिः पूर्वो ग्रन्थः। "स्पर्शत्व-निषेधादन्नशब्दस्तन्न भवति" इत्याद्युत्तरो ग्रन्थः। किञ्च निर्णयामृतमप्ये-तदर्थपोषकम्भवति। यथा—

"विनोदकेन पचितं यदन्नं जातवेदसि।
तदन्नं फलवद् ग्राह्यं दुःस्पृष्टं तन्न दुष्यति॥"

"(नि. मृ. पृ. २३६ वें. मु.) इति।

इत्थं शक्तस्य साग्निकस्य गृह्याग्निशेषे शान्ते प्रोषितस्य च गृह्याग्न्य-सन्निधौ 'भ्राष्ट्रभृष्टयवादीन् पराग्निपक्वेक्षुक्षीरविकारान् आमशाकफलमूलादींश्च भक्ष्यत्वेन प्रकल्प्य कालनयनं बोधितम्॥

अशक्तस्य पुनः प्रोषितस्य साग्नेर्गृह्याग्न्यसन्निधौ अरणीसमारोपिताग्नेः उच्छिन्नाग्नेश्च पृष्ठोदिवि विधानेन पाकं कृत्वा भोजनं विहितम्। तथा हि—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

DATE DUE
०७।१९।९६

।
८) इति ।
नेत्यर्थः ।
क्रि
पच
सम) इति ।
ाय वैश्व-
देवं मत्रैव वैश्व-
देव
“अ
पर २६९)इति ।
ल्यन्यायेन
सा ः सूतिका-
याश
।

पर्णान्यपि च यत्पक्ति-मश्नीयान्नैव दोषभागिति ॥

इति प्रवसतो गृहस्थितस्य च साग्नेः पक्वान्नभक्षणनिर्णयः ।

समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Acc. No. 440
Class No 294.5921 Book No PAR
Author पारस्कराचार्य
Title गृह्यसूत्रम्
Returned

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०६

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu